ई-ग्रन्थमाला-१

# शास्त्र-परिचायिका


प्रधानसम्पादकः

**प्रो. गोपबन्धु मिश्रः**

कुलपतिः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

सम्पादकः

**डॉ. दीपेश विनोद कतिरा**

लेखकाः

**डॉ. शत्रुघ्न पाणिग्राही**

**डॉ. ललितकुमार पटेलः**

**डॉ. पङ्कजकुमार रावलः**

**डॉ. दीपेश विनोद कतिरा**

**डॉ. जानकीशरण आचार्यः**

**श्री नित्यानन्द ओझा**

**श्री जिगर एम. भट्टः**


**श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्**

**शास्त्र-परिचायिका**

**प्रकाशकः**

**डॉ. दशरथ जादवः**
*कुलसचिवः*
श्रीसोमनाथसंस्कृतयुनिवर्सिटी,
राजेन्द्रभुवनमार्गः, वेरावलम् – ३६२ २६६ गीर-सोमनाथजनपदम् (गुजरातम्)
दूरभाषः – 02876 – 244532, फेक्स – 244417
www.sssu.ac.in

**सहायकसम्पादकः संयोजकश्च**

डॉ. कार्तिक पण्ड्या
*संशोधनाधिकारी,*
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

**© *Shree Somnath Sanskrit University, Veraval - 2020***

संस्करणम् – प्रथमम्
वर्षम् – २०२०
प्रतिकृतयः – E-book in PDF
ISBN - 978-93-83097-44-9
मूल्यम् – PDF
मुद्रकः – श्री सोमनाथ संस्कृत विश्वविद्यालयः,
राजेन्द्र भुवन रोड, वेरावल – ३६२ २६६ जि. गीर सोमनाथ, गुजरात (भारत)
दूरभाष - 02876 – 244532

E-Granthamala-1

# ŚĀSTRA-PARICĀYIKĀ

*Cheif Editor*

**Prof. Gopabandhu Mishra**

Vice-Chancellor, Shree Somnath Sanskrit University, Veraval

*Editor*

**Dr. Dipesh Vinod Katira**

*Authors*

**Dr. Shatrughna Panigrahi**
**Dr. Lalit Kumar Patel**
**Dr. Pankajkuamr Rawal**
**Dr. Dipesh Vinod Katira**
**Dr. Janakisharan Acharya**
**Nityanand Ojha**
**Jigar M Bhatt**

**Shree Somnath Sanskrit University, Veraval**

**ŚĀSTRAPARICĀYIKĀ**

**Published by:**

**Dr. Dashrath Jadav**
*The Registrar*
Shree Somnath Sanskrit University,
Rajendra Bhuvan Road, Veraval - 362 226.
Dist.: Gir-Somnath, Gujarat, India.
Phone: 02876-244532, Fax: 02876-244417
Website : www.sssu.ac.in

**Assistant Editor & Coordinator:**

Dr. Kartik Pandya
*Research Officer*
Shree Somnath Sanskrit University, Veraval

***© Shree Somnath Sanskrit University, Veraval - 2020***

Edition : First
Year : 2020
Copies : E-book in PDF
ISBN : 978-93-83097-44-9
Price : PDF
Printed by : Shree Somnath Sanskrit University,
Rajendra Bhuvan Road, Veraval - 362 226.
Dist.: Gir-Somnath, Gujarat, India.
Phone: 02876-244532

# शुभाशंसनम्

परिवारे यथा बाल: तत्सम्बद्धजनस्य परिचयं प्राप्यैव सहास्यं तेन सह आत्मन: सङ्गतिं योजयति, स्वयं प्रसीदति सम्बद्धजनमपि प्रसादयति, तद्वत् अनधीतशास्त्रत्वाद् तद्विषये बालत्वमाप्तो विद्यार्थी विश्वविद्यालयप्रवेशकाले एव यदि अध्येतव्यशास्त्रविषयकं परिचयं प्राप्नुपयात् तर्हि तत्र सानन्दं प्रवृत्तो भवेत्। तेन तस्य सहर्षं विकास:, किं च पठ्यमानशास्त्रविषयिण्य: चर्चा: पुष्टिं गच्छेयु: इत्येवं लक्ष्यविशेषं मनसि निधाय श्रीसोमनाथसंस्कृतविश्वविद्यालय: मौलिकतया पाठ्यमानानां शास्त्रविशेषाणां वेद-व्याकरण-पुराण-ज्योतिष-साहित्य-दर्शनानां परिचयदातृ पुस्तकं "शास्त्रपरिचायिका" इत्याख्यं प्रकाशयतीति महदिदं प्रमोदस्थानम्। एवमपि "अपरिचयाद् अवज्ञा" इति लोकोक्त्या परिचयाभावेन गङ्गाजलस्यापि सामान्यजलस्येव व्यवहारदर्शनात् शास्त्राणां परिचयाभावेन केवलं तत्तच्छास्त्रगतपाठ्यपुस्तकान्तर्गतकतिपयांशान् एव अधीत्य पूर्णशास्त्रज्ञानावाप्तये प्रवृत्त्यभावाशङ्कापि एतेन पुस्तकेन निराकरिष्यते।

सरलमानकसंस्कृतभाषामुखेन अपेक्षानुसारं विवरणात्मकशैलीं किं च आकाङ्क्षापद्धतिम् अवलम्ब्य उपर्युक्तशास्त्राणां प्रतिशास्त्रम् अनुबन्धचतुष्टयस्य, तत्तच्छास्त्रगतमूलपुस्तकानाम्, तद् भाष्यटीकादीनां किं च समीक्षाग्रन्थानां तथा परिचयोऽत्र प्रदत्तोऽस्ति येन कश्चिदपि अध्येता सम्बद्धशास्त्रविषयकं सर्वविधम् अपेक्षितं ज्ञानम् अवश्यमेव प्राप्स्यति। किं च एकस्मिन्नेव पुस्तके खण्डश: एतेषां समेषामपि शास्त्राणां परिचयप्रस्तुतौ संक्षिप्तत्वम् अथ च सारगर्भत्वं सुतरां परिपालितमिति हेतो: न केवलं विद्यार्थिनां कृते, अपि तु तत्तच्छास्त्रजिज्ञासूनां प्राध्यापकानां विदुषां कृते तथा च विविध-यू.जी.सी.-नेट्-जे.आर्.एफ्, सेट् इत्यादीनां प्रतियोगितानां सिद्धतां कुर्वाणानां कृते पुस्तकमिदम् अत्यन्तम् उपयोगित्वं निर्वक्ष्यतीति विश्वास: संजागर्त्येव।

पुस्तकस्य तत्तत्खण्डलेखकानां प्राध्यापकानां कृते भूय: साधुवादा व्याह्रियन्ते। किं च सर्वं किमपि संकलय्य सम्पादनम् अतीव धैर्येण कृतवन्तौ डॉ. दीपेश कतिरा, डॉ. जानकीशरण आचार्यश्च सुतरां वर्धाप्येते। प्रकाशने प्राशासनिकप्रोत्साहनार्थं कुलसचिव: डॉ. दशरथ जादव:, संशोधनाधिकारी डॉ. कार्तिक पण्ड्या च धन्यवादै: पुरस्क्रियेते।

शास्त्रपरिचायिकापुस्तकमिदं सर्वेषामपि तत्तच्छास्त्रप्रविविक्षूणां जिज्ञासोपशान्तये सहजतया साहाय्यं वितनोतु इत्यभ्याकाङ्क्षया तत्पूर्तये भगवान् श्रीसोमनाथः प्रार्थ्यतेतराम्।

(प्रो. गोपबन्धु मिश्रः)
कुलपतिः

# भूमिका

भारतीय-संस्कृतेः आद्याः ग्रन्थाः 'वेदाः'। रामायणस्य, महाभारतस्य, भगवद्-गीतायाः, श्रीमद्-भागवत-महापुराणस्य अन्येषां च नैकेषां प्राचीन-ग्रन्थानां महान् प्रभावः भारतीय-समाज-जीवने अद्यापि अस्ति एव। वस्तुतः एतद्-ग्रन्थानुरूपा जीवन-शैली एव भारतीयतायाः परिचायिका। अत्र स्थिताः विचाराः, जीवन-दृष्टिः च समग्रस्य विश्वस्य कल्याणाय कल्पन्ते।

बहुलं प्राचीन-भारतीय-साहित्यं '**संस्कृतेन**' विरचितम्। संस्कृतं ज्ञातुम् असमर्थानां कृते विद्वांसः विश्वस्य नैकाभिः भाषाभिः अस्य अनुवादं कृतवन्तः। मूलं वा एतान् अनुवादान् वा आश्रित्य एतादृशानां ग्रन्थानाम् अध्ययनम्, अनुसन्धानं च अद्य समग्रे विश्वे प्रवर्तते।

नित्य-व्यवहारे एषः सर्वेषाम् अनुभवः यत् मातृ-भाषया भाषण-काले अपि 'डेबिट्-कार्ड', 'बैंक', 'रिचार्ज', 'बेलेन्स', 'ट्यूशन', 'बॅच', 'मिनिट्' चेत्यादीनां शब्दानां प्रयोगं वयं यथावत् कुर्मः। मातृ-भाषायाम् एतेषां प्रतिशब्दानां चिन्तने, उच्चारणे, अवगमने चापि क्लेशः अनुभूयते। मातृ-भाषायां केषाञ्चन शब्दानां प्रतिशब्दः कः? इत्यपि वयं न जानीमः। केषाञ्चन प्रतिशब्दानां प्रयोगः क्रियते एव चेद् अपि सः अस्वाभाविकः, कृत्रिमः च भाति। श्रोतुः कृते सः तथा अर्थ-बोधकः अपि न भवति।

वेदादीनां ग्रन्थानां रचना एव संस्कृतेन जाता। तत्र वर्तमानानां 'घृतम्', 'धर्मः', 'आश्रमः', 'यज्ञः' इत्यादीनां संस्कृत-शब्दानां आङ्ग्लादिभिः भाषाभिः अनुवादः कष्टसाध्यः, यतः क्वचित् ताः सङ्कल्पनाः एव तासु संस्कृतिषु न विद्यन्ते। संस्कृतेन एव एतेषां यथार्थ-ज्ञानं, रसास्वादः च सम्भवति। अतः एतेषाम् अनुवाद-पठनस्य अपेक्षया, आदौ संस्कृत-भाषायाः अध्ययनं, ततश्च संस्कृतेन एतेषां ग्रन्थानाम् अध्ययनम् एव वरम्। एतेन प्रकारेण कृतम् अध्ययनम् एव सुदृढं, मूल-गामि च भवति। भविष्यति काले इतर-भाषाभिः अनुवादाय वा कैश्चित् तु एते ग्रन्थाः संस्कृतेन अध्येतव्याः एव खलु? भारतीय-भाषाः प्रायः संस्कृतोद्भवाः। अतः भारतीयानां कृते तु संस्कृताध्ययनं सुकरम् एव।

भारते नैके संस्कृत-विश्वविद्यालयाः संस्थापिताः। एतादृशेषु संस्थानेषु प्रवेशात् पूर्वं विद्यार्थिनः संस्कृत-भाषाध्ययनं कुर्वन्ति एव। ततः परं संस्कृत-विश्वविद्यालयेषु महाविद्यालयेषु वा संस्कृत-भाषया एव वेदानां, नैकेषां शास्त्राणां च अध्ययनस्य व्यवस्था उपलभ्यते। प्रवेश-काले विश्वविद्यालये अध्ययनाय उपलब्धेषु शास्त्रेषु स्वेन अध्येतव्य-शास्त्रस्य चयनं करणीयं भवति। अस्याम् अवस्थायां

'न्याय-शास्त्रम्', 'वेदान्तः', 'साहित्य-शास्त्रम्' इत्यादीनि केवलं सुपरिचितानि नामानि एव। कस्मिन् शास्त्रे पठनीयं तत्त्वं किम्? इति विद्यार्थिनः न जानन्ति। तस्मात् ते रुचेः अनुरूपस्य विषयस्य चयने महान्तं क्लेशम् अनुभवन्ति। प्रवेश-काले भाषायाः अभ्यासः अपि सर्वथा सुदृढः न भवति। अतः साक्षात् शास्त्र-ग्रन्थानां भाषायाः अवगमने अपि क्लेशः अनुभूयते। अस्याम् अवस्थायां नैके संस्कृतेन एव शास्त्राध्ययनस्य श्रेष्ठात् मार्गात् भ्रष्टाः सन्तः अनुवाद-मार्गम् आरोहन्ति। इत्थं संस्कृत-विद्यालयानां स्थापनायाः मूलम् उद्देश्यम् एव व्याहतं भवति। विद्यार्थिनः अपि मूलस्य रसास्वादात् वञ्चिताः भवन्ति।

शास्त्र-परिचायिका इयम् अस्याम् एव अवस्थायां विद्यार्थिनां साहाय्यार्थम् उपकल्पिता। अत्र प्रयुक्ता भाषा लेखकानां वैदुष्य-परिचायिका न, प्रत्युत प्रतिशास्त्रं विद्यार्थिनां जिज्ञासा-समाधायिका। ह्रस्वानि वाक्यानि, क्लिष्ट-समास-विरहः, शास्त्रीय-पदावल्याः अल्पः प्रयोगः, लीलया ज्ञेयानाम् एव सन्धीनां प्रयोगः च अत्र प्रयुक्तायाः भाषायाः विशेषाः। अस्याः परिचायिकायाः लेखन-समये यत्र शक्यं तत्र, संस्कृतम् अजानतः, किन्तु हिन्दी, गुजराती, मराठी इत्यादि-भाषाः मातृ-भाषात्वेन वदतः जनस्य अपि ये सुपरिचिताः स्युः ते एव संस्कृत-शब्दाः चित्वा चित्वा प्रयुक्ताः। तस्मात् संस्कृताध्ययनस्य प्रारम्भमं कृतवन्तः शास्त्रानुरागिणः जिज्ञासवः अपि एतस्याः शास्त्र-परिचायिकायाः पठनेन प्रमुदिताः भविष्यन्ति इति मन्यामहे।

अत्र वेदः, व्याकरणं, ज्योतिषं, पुराणेतिहासः, सर्वदर्शनं, साहित्यं चेति षण्णां विषयाणां परिचयः वर्तते। अत्र यद् उल्लिखितं तस्य उद्देश्यं शास्त्राणां प्रारम्भिक-परिचयः एव। अतः विषयाणां पूर्णतया निरूपणे येषां सूक्ष्मप्रसङ्गानाम् उल्लेखः आवश्यकः भवति सः बहुत्र त्यक्तः अस्ति। शास्त्राणि एतानि बहुधा परस्परं सम्बद्धानि। अतः विभिन्नानां शास्त्राणां परिचये केचन विषयाः पुनरुक्ताः अपि भवन्ति। किन्तु तत्-तत्-शास्त्रस्य अवगमने एषा पुनरुक्तिः उपकारिका एव।

विषय-प्रवेशाय समुचितः क्रमः, (यत्र शक्यं तत्र) प्रश्नोत्तर-पद्धतिः च आश्रिता। 'अहं संस्कृतेन लिखितं सर्वं बोद्धुं पारयामि' इति विश्वासः यथा विद्यार्थिषु दृढः भवेत् तथा भाषा अत्र प्रयुक्ता। 'सर्वेषु अपि शास्त्रेषु अध्येतव्याः अंशाः अत्यन्तं रोचकाः' इति यथा विद्यार्थिनः भावयेयुः तथा शैली अत्र आदृता। विशेषाध्ययनाय विद्यार्थी यं कम् अपि विषयं चिनुयात् नाम, स्वल्प-प्रवेशः तु तस्य सर्वत्र भवेत् इति अभीप्सया इयं शास्त्र-परिचायिका प्रणीता।

आयान्तु, विस्मयकारि शास्त्र-जगत् प्रविशामः...

भवदीयानि,

शास्त्र-यात्रा-मित्राणि

# कृतज्ञताभिव्यक्तिः

अस्मद्विश्वविद्यालयस्य कुलपतिचरणाः **प्रो. गोपबन्धु-मिश्र**-महोदयाः एव अस्याः शास्त्र-परिचायिकायाः सङ्कल्पकाः सन्ति। समग्रं कार्यं तेषां मार्गदर्शनेन एव सम्पन्नम्। तस्मात् तान् प्रति कृतज्ञता प्रकटीक्रियते।

अस्मद्विश्वविद्यालयस्य प्राध्यापकाः **प्रो. विनोद कुमार झा, डॉ. उमा महेश्वरी, डॉ. आशा माढक** तथैव च **सुश्री विदुषी बोल्ला** अस्याः परिचायिकायाः संशोधने महत् साहाय्यं कृतवन्तः।

**डॉ. चिन्मय धारुरकर** (केन्द्रीयविश्वविद्यालयः, केरलाः), **डॉ. तनुजा अजोतिकर** (डिजिटल संस्कृत लायब्रेरी), **श्रीमती मानसी फडके** (संस्कृताध्येत्री, बेङ्गलुरु), **श्रीलोकेशकुमारः** (शोधच्छात्रः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी) च नैकाः सूचनाः दत्त्वा अस्याः शास्त्र-परिचायिकायाः परिष्करणे साहाय्यं कृतवन्तः। सर्वान् प्रति कृतज्ञता अभिव्यज्यते।

सम्पादकः

# विषयानुक्रमणिका


| **क्रमः** | **विषयः** | **पृष्ठ-संख्या** |
|---|---|---|
| १ | **वेद-विवरणम्**<br>लेखकः - डॉ. शत्रुघ्न पाणिग्राही | १९-४९ |
| २ | **ज्योतिष-विवरणम्**<br>लेखकः – श्री नित्यानन्द ओझा | ५१-९८ |
| ३ | **व्याकरण-विवरणम्**<br>लेखकः - डॉ. दीपेश विनोद कतिरा | ९९-१३५ |
| ४ | **पुराण-विवरणम्**<br>लेखकः - डॉ. पङ्कज रावलः | १३७-१७२ |
| ५ | **सर्वदर्शन-विवरणम्**<br>लेखकः - डॉ. जानकीशरण आचार्यः | १७३-२२६ |
| ६ | **साहित्य-विवरणम्**<br>लेखकौ - डॉ. ललित पटेलः, श्री जिगर एम. भट्टः च | २२७-२५६ |

## प्रथमं प्रकरणम् - वेद -विवरणम्


| | | |
|---|---|---|
| १. | वेद-परिचयः | १९ |
| २. | वेदानां महत्त्वम् | २० |
| ३. | 'वेद'-शब्दस्य अर्थः | २१ |
| ४. | वेदानां रचना-कालः | २२ |
| ५. | वैदिक-साहित्यस्य विभाजनम् | २४ |
| ६. | ऋग्वेद-विवरणम् | २५ |
| ७. | यजुर्वेद-विवरणम् | २९ |
| ८. | सामवेद-विवरणम् | ३१ |
| ९. | अथर्ववेद-विवरणम् | ३३ |
| १०. | ब्राह्मण-साहित्य-विवरणम् | ३६ |
| ११. | आरण्यक-साहित्य-विवरणम् | ३९ |
| १२. | उपनिषत्-साहित्य-विवरणम् | ४० |
| १३. | वेदाङ्ग-विवरणम् | ४१ |
| १४. | वैदिक-यज्ञः | ४६ |
| १५. | वेदाध्ययन-परम्परा | ४७ |
| १६. | वैदिक-संस्कृतेः महत्त्वम् | ४९ |

## द्वितीयं प्रकरणम् - ज्योतिष-विवरणम्


| | | |
|---|---|---|
| १. | ज्योतिष-परिचयः | ५१ |
| १.१. | किं नाम ज्योतिषम् | ५१ |
| १.२. | वेदाङ्गेषु ज्योतिषस्य स्थानम् | ५१ |
| १.३. | ज्योतिष-शास्त्रस्य प्रवर्तकाः | ५१ |
| १.४. | ज्योतिष-शास्त्रस्य स्कन्धाः | ५२ |
| २. | ज्योतिषाध्ययनस्य प्रयोजनानि | ५४ |
| ३. | पञ्चाङ्ग-परिचयः | ५५ |
| ४. | मुहूर्त-विचारः | ५८ |
| ५. | राशिपरिचयः | ६५ |
| ६. | ग्रहपरिचयः | ७३ |
| ७. | आजीविका-विचारः | ७६ |
| ८. | रोग-विचारः | ७७ |
| ९. | प्रमुखाः योगाः | ७८ |
| १०. | आयुर्दायविचारः | ८१ |
| ११. | भूकम्प-विचारः | ८२ |
| १२. | वर्षा-ज्ञानम् | ८३ |
| १३. | शकुन-विचारः | ८४ |
| १४. | सामुद्रिक-रहस्यम् | ८५ |
| १५. | वास्तु-विचारः | ९० |
| १६. | रमल-शास्त्र-विचारः | ९२ |
| १७. | केरल-प्रश्नविचारः | ९६ |
| १८. | ज्योतिष-शास्त्रस्य प्रमुख-ग्रन्थानां रचनाकाराः | ९७ |

# तृतीयं प्रकरणम् - व्याकरण-विवरणम्


| | | |
|---|---|---|
| १. | व्याकरण-परिचयः | ९९ |
| १.१ | व्याकरणं वेदाङ्गम् | ९९ |
| १.२ | व्याकरणं दर्शनम् | ९९ |
| १.३ | व्याकरणं शास्त्रम् | १०० |
| २. | शब्द-विवरणम् | १०० |
| ३. | व्याकरणाध्ययनस्य प्रयोजनानि | १०२ |
| ४. | व्याकरणस्य रचनाकाराः | १०३ |
| ५. | पाणिनि-विरचित-ग्रन्थानां विवरणम् | १०४ |
| ६. | पाणिनीय-व्याकरण-विवरणम् | १०६ |
| ७. | सूत्र-विवरणम् | १०८ |
| ८.१ | वर्णोपदेश-विवरणम् | ११२ |
| ८.१.१ | वर्णोपदेश-निमित्तकानि सन्धिकार्याणि | ११४ |
| ८.१.१.१. | अच्-सन्धयः | ११५ |
| ८.१.१.२. | हल्-सन्धयः | ११६ |
| ८.१.१.३. | विसर्ग-सन्धयः | ११७ |
| ८.२ | पदोपदेशे प्रकृति-प्रत्यय-विभागः | ११७ |
| ८.२.१. | प्रकृति-विवरणम् | ११९ |
| ८.२.२. | प्रत्यय-विवरणम् | ११९ |
| ८.२.२.१. | प्रकृति-साधकाः प्रत्ययाः | ११९ |
| ८.२.२.१.१. | कृत्-प्रत्यय-विवरणम् | १२० |
| ८.२.२.१.२. | तद्धित-प्रत्यय-विवरणम् | १२१ |
| ८.२.२.१.३. | सनादि-प्रत्यय-विवरणम् | १२३ |

| | | |
|---|---|---|
| ८.२.२.२. | पदसाधकाः प्रत्ययाः | १२४ |
| ८.३. | समास-विवरणम् | १२७ |
| ८.३.१. | अव्ययीभाव-समासः | १२८ |
| ८.३.२. | तत्पुरुष-समासः | १२८ |
| ८.३.४. | द्वन्द्व-समासः | १३० |
| ८.३.५. | बहुव्रीहि-समासः | १३० |
| ८.३.६. | केवल-समासः | १३० |
| ८.४. | वाक्योपदेश-विवरणम् | १३१ |
| ८.४.१. | कारक-विवरणम् | १३१ |
| ८.४.२. | कारकेतर-सम्बन्ध-विवरणम् | १३३ |
| ८.४.३. | प्रत्ययैः वाक्यस्थ-पदानां परस्पर-सम्बन्ध-बोधकत्वम् | १३३ |


## चतुर्थं प्रकरणम् - पुराण-विवरणम्


| | | |
|---|---|---|
| १. | पुराण-शब्दस्य व्युत्पत्तिः अर्थः च | १३७ |
| २. | पुराणानां रचनाकालः | १३८ |
| ३. | पुराणानां संख्या | १४० |
| ४. | पुराणानां लक्षणानि | १४१ |
| ५. | महापुराणस्य लक्षणानि | १४२ |
| ६. | पुराणानां कर्ता | १४४ |
| ७. | उपपुराणानि | १४७ |
| ८. | पुराणानां महत्त्वम् | १४७ |
| ९. | पुराणेषु गुम्फिताः विषयाः | १५१ |
| १०. | पुराणेषु अवताराः | १५२ |

| | | |
|---|---|---|
| ११. | श्रीमद्-भागवत-महापुराणस्य परिचयः | १५३ |
| १२. | इतराणि पुराणानि | १५९ |
| १३. | इतिहास-पुराणयोः भेदः | १६१ |
| १४. | रामायण-विवरणम् | १६२ |
| १५. | महाभारत-विवरणम् | १६६ |

## पञ्चमं प्रकरणम् - सर्वदर्शन-विवरणम्

| | | |
|---|---|---|
| १. | दर्शन-परिचयः | १७३ |
| १.१ | दर्शन-शब्दार्थः | १७४ |
| १.२ | दर्शनस्य प्रकाराः | १७७ |
| २. | न्याय-वैशेषिक-दर्शनयोः परिचयः | १८० |
| २.२ | न्याय-दर्शनस्य ग्रन्थाः | १८२ |
| २.३ | वैशेषिक-दर्शनस्य प्रमुखाः ग्रन्थाः | १८५ |
| २.४ | न्याय-वैशेषिक-दर्शनयोः प्रमुखाः सिद्धान्ताः | १८५ |
| २.४.१ | पदार्थ-विचारः | १८६ |
| २.४.२ | प्रमाण-विचारः | १८९ |
| २.४.३ | मोक्ष-साधन-विचारः | १९१ |
| ३. | सांख्य-दर्शनस्य परिचयः | १९२ |
| ३.१ | सांख्य-दर्शनस्य प्राचीनत्वम् | १९२ |
| ३.२ | सांख्य-दर्शनस्य प्रमुखाः ग्रन्थाः | १९३ |
| ३.३ | सांख्य-दर्शने वर्णिताः प्रमुखाः विषयाः | १९४ |
| ३.३.१ | तत्त्व-विचारः | १९५ |

| | | |
|---|---|---|
| ३.३.२ | प्रमाण-विचारः | १९९ |
| ३.३.३ | सांख्य-दर्शनस्य प्रमुखाः सिद्धान्ताः | २०० |
| ३.३.४ | सांख्य-दर्शनानुसारं सृष्टि-विचारः | २०३ |
| ३.३.५ | सांख्य-दर्शनानुसारं मोक्षोपाय-विचारः | २०६ |
| ४. | योग-दर्शनस्य परिचयः | २०७ |
| ४.१ | योग-दर्शनस्य महत्त्वम् | २०८ |
| ४.२ | योग-दर्शनस्य प्रमुखाः ग्रन्थाः | २०८ |
| ४.३ | योगदर्शने वर्णिताः प्रमुखाः विषयाः | २०९ |
| ४.४.१ | योग-दर्शने वृत्तयः | २११ |
| ४.४.२ | योग-दर्शने ईश्वर-स्वरूपम् | २११ |
| ४.४.३ | अष्टाङ्ग-योगस्य स्वरूपम् | २१२ |
| ५. | पूर्व-मीमांसा-दर्शनस्य परिचयः | २१४ |
| ५.१ | पूर्व-मीमांसा-दर्शनस्य प्रमुखाः ग्रन्थाः | २१५ |
| ५.२ | पूर्व-मीमांसा-दर्शनस्य प्रमुखाः सिद्धान्ताः | २१६ |
| ६. | वेदान्त-दर्शनस्य परिचयः | २१९ |
| ६.१ | वेदान्त-दर्शनस्य प्रमुखाः ग्रन्थाः | २२० |
| ६.२ | वेदान्त-दर्शनस्य प्रमुखाः आचार्याः | २२१ |
| ६.३ | वेदान्त-दर्शनस्य प्रमुखाः भेदाः | २२२ |
| ६.४ | अद्वैत-वेदान्तस्य परिचयः | २२२ |
| ६.५ | अद्वैत-वेदान्तस्य प्रमुखाः विषयाः | २२४ |

# षष्ठं प्रकरणम् - साहित्य-विवरणम्


| | | |
|---|---|---|
| १. | साहित्य-परिचयः | २२७ |
| १.१. | साहित्य-शास्त्रस्य विविधानां नाम्नां सार्थकता | २२७ |
| १.२ | साहित्यशास्त्रस्य उद्भवः विकासः च | २३० |
| २. | साहित्यशास्त्रस्य विचारपरम्पराः | २३४ |
| २.१ | साहित्य-शास्त्रस्य मुख्य-तत्त्वानि | २३६ |
| ३. | काव्यस्य विभावनाः | २४३ |
| ३.१ | काव्यस्य लक्षणम् | २४३ |
| ३.२ | काव्यस्य प्रयोजनम् | २४४ |
| ३.३ | काव्य-निर्माणे हेतुः | २४४ |
| ३.४ | काव्यस्य भेदाः | २४५ |
| ४. | काव्यस्य उत्कर्षकाः अपकर्षकाः च धर्माः | २४७ |
| ४.१ | गुणाः | २४७ |
| ४.२ | दोषाः | २४८ |
| ५. | नाट्यतत्त्वविचारः | २४९ |
| ५.१ | रूपकाणां भेदक-तत्त्वानि | २५० |
| ५.२ | रूपकाणां भेदाः | २५३ |
| ५.३ | प्रसिद्धानि रूपकाणि | २५४ |
| ६. | पञ्च महाकाव्यानि | २५५ |

# प्रथमं प्रकरणम्

# वेद-विवरणम्

## १. वेद-परिचयः

**१. विश्वस्य प्राचीनतम-ग्रन्थः कः?**

विश्वस्य सर्वेषु ग्रन्थेषु वेदः प्राचीनतमः इति सर्वैः स्वीक्रियते।

**२. वेदस्य कर्ता कः?**

अस्य विषये पारम्परिकं मतं वर्तते यत् वेदस्य कोऽपि कर्ता नास्ति। भगवतः निश्वासभूतः अयं वेदः अपौरुषेयः, नित्यः, शाश्वतः, त्रिकालाबाध्यः वर्तते। ऋषयः मन्त्राणां 'द्रष्टारः' न तु 'कर्तारः'।

**३. वेद-मन्त्राणां पाठः कुत्र भवति?**

वेद-मन्त्राणां पाठः यज्ञे भवति। ये यज्ञे वेद-मन्त्राणां पाठं कुर्वन्ति ते 'ऋत्विजः' इति उच्यन्ते।

**४. वेदानाम् ऋत्विजः के?**

चत्वारः ऋत्विजः भवन्ति। यः ऋत्विक् ऋग्वेदस्य पाठं करोति सः'होता' इति उच्यते। यः यजुर्वेदस्य पाठं करोति सः'अध्वर्युः' इति उच्यते। यः साम-वेदस्य पाठं करोति सः 'उद्गाता' इति उच्यते। यः अथर्ववेदस्य पाठं करोति सः 'ब्रह्मा' इति उच्यते।

**५. वेदानाम् उपवेदाः के?**

ऋग्वेदस्य उपवेदः वैद्य-विद्या-बोधकः 'आयुर्वेदः'। यजुर्वेदस्य उपवेदः शस्त्र-विद्या-प्रतिपादकः 'धनुर्वेदः'। साम-वेदस्य उपवेदः गान-विद्या-प्रतिपादकः 'गान्धर्व-वेदः'। अथर्व-वेदस्य उपवेदः शिल्प-विद्या-प्रतिपादकः 'स्थापत्य-वेदः'। चरणव्यूहानुसारम् 'अर्थशास्त्रम्' अपि अथर्ववेदस्य उपवेदः वर्तते।

**६. वेदस्य ऋषयः के?**

ऋग्वेदस्य अग्निः ऋषिः, यजुर्वेदस्य वायुः ऋषिः, साम-वेदस्य आदित्यः ऋषिः, अथर्व-वेदस्य अङ्गिराः ऋषिः च वर्तते।

## २. वेदानां महत्त्वम्

**७. किम् अस्ति वेदानां महत्त्वम् ?**

न केवलं भारतीय-समाजे अपि तु समग्रे विश्वे वेदस्य महत्त्वं व्याप्तं वर्तते। भारतीय-दर्शनस्य मूलं वेदा एव सन्ति। आर्याणां सभ्यता संस्कृतिः च वेदम् एव आधारीकृत्य प्रवर्तते। वेदाः न केवलं भारतीयैः अपि तु वैदेशिकैः विद्वद्भिः अपि श्रद्धया अवलोकिताः सन्ति। वेदेषु ज्ञान-विज्ञान-धर्म-दर्शन-सदाचार-संस्कृति-नैतिक-सामाजिक-राजनैतिक-प्रभृतीनां जीवनोपयोगि-विषयाणां सन्निवेशः अस्ति। एतान् विश्वकोषान् मन्यन्ते विद्वांसः । वेदाः तु अस्माकं श्रेयः-प्रेयः-प्रभृतीनाम् अपि साधनानि सन्ति। वेदाः तु धर्म-मूलतया एव सर्वथा समादृताः सन्ति । भगवता मनुना प्रोक्तं यथा- "वेदोऽखिलो धर्ममूलम्" इति।

आचार्यः मनुः कथयति यत् सम्पूर्ण-ज्ञानस्य आधारः वेदः एव-

य: कश्चित् कस्यचित् धर्मो मनुना परिकीर्तितः।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः॥ इति (मनुस्मृतिः-२/७)।

अतः महर्षि-पतञ्जलिः कथयति - अङ्गैः सह वेदानाम् अध्ययनम् अवश्यम् एव कर्तव्यम् इति। अतः विश्व-साहित्ये वेदानां महत्त्वं वैशिष्ट्यं च स्पष्टम् एव प्रतिभाति इति।

**८. वेदाध्ययनेन कः लाभः ?**

शतपथ-ब्राह्मणे वेदाध्ययनस्य अत्यधिकं महत्त्वं वर्णितं वर्तते। शतपथ-ब्राह्मणं कथयति यत् सम्पूर्ण-पृथिव्याः दानेन यत् फलं लभ्यते तस्माद् द्विगुणं फलं प्रतिदिनं विहित-वेदाध्ययनेन लभ्यते। अतः एव 'स्वाध्यायोऽध्येतव्यः' इति विधि-वाक्यम्। वेदाध्ययनात् एव अस्माकं योग-क्षेम-प्राण-ऐश्वर्य-अन्न-समृद्धयः चलन्ति। यथा– 'यावन्तं ह वा इमां पृथिवीं वित्तेन पूर्णां ददत् लोकं जयति त्रिस्तावन्तं जयति भूयांस चाक्षय्याम् य एवं विद्वान् अहरहः स्वाध्यायमधीते तस्मात् स्वाध्यायोऽध्येतव्यः' इति (शतपथ-ब्राह्मणम्- ११/५/६/३)।

वेदाध्ययनस्य महत्त्व-विषये मनु-स्मृतौ उक्तं, 'यः द्विजः वेदम् अनधीत्य अन्यत्र श्रमं करोति सः सपरिवारं शूद्रत्वं प्राप्नोति' इति । उक्तं च -

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥
वेदमेव सदाऽभ्यस्येत् तपस्तप्यन् द्विजोत्तमः ।
वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते॥ इति (मनु-स्मृति- २/१६८, १६६)।

आचार्यः सायणः कथयति - "इष्ट-प्राप्ति-अनिष्ट-परिहारयोः अलौकिकम् उपायं यः ग्रन्थः वेदयति स वेदः" इति। अर्थात् मुक्ति-प्राप्त्यर्थं कलञ्ज-भक्षण-रूपानिष्ट-परिहारार्थं वेदाध्ययनम् अवश्यं कर्तव्यम् इति। चरित्र-शुद्ध्यर्थं, व्यवहार-कुशलता-प्राप्त्यर्थं, धर्मार्थ-काम-मोक्ष-चतुर्विध-फल-प्राप्त्यर्थं च वेदानाम् अध्ययनं करणीयम्। 'संहिता-पद-क्रमादि-पाठेन किं किं फलं वेदाध्येता बालकः प्राप्नोति?' इत्यस्मिन् विषये आचार्य-याज्ञवल्क्यस्य कथनं विद्यते -

संहिता नयते सूर्यं पदं च शशिनः पदम्।
क्रमश्च नयते सूक्ष्मं यत् तत् पदमनामयम्॥ इति (याज्ञवल्क्यशिक्षा- १/३२)।

## ३. 'वेद'-शब्दस्य अर्थः

### ९. 'वेद'-शब्दस्य कः अर्थः?

यद्-द्वारा धर्म-अर्थ-काम-मोक्षादि-पुरुषार्थ-चतुष्टयस्य सिद्धिः भवति सः एव वेदः। 'विद् - ज्ञाने' इति धातोः घञ्-प्रत्यये कृते निष्पन्नः अयं वेद-शब्दः ज्ञान-राशेः, ज्ञान-संग्रह-ग्रन्थस्य च द्योतकः भवति। संस्कृत-व्याकरण-दृष्ट्या वेद-शब्दस्य निष्पत्तिः चतुर्भ्यः धातुभ्यः दर्शयितुं शक्यते -

- विद्-सत्तायाम् (दिवादि-गणे)
- विद्-ज्ञाने (अदादि-गणे)
- विद्-विचारणे (रुधादि-गणे)
- विद्लृ-लाभे (तुदादि-गणे)

### १०. विभिन्नैः आचार्यैः ग्रन्थैः च 'वेद-शब्दस्य के अर्थाः उक्ताः?

विभिन्नैः आचार्यैः ग्रन्थैः च 'वेद'-शब्दस्य अधो लिखिताः अर्थाः उक्ताः –

| **आचार्यस्य/ग्रन्थस्य नाम** | **'वेद'-शब्दस्य अर्थः** |
|---|---|
| आचार्यः सायणः | १. अपौरुषेयं वाक्यं वेदः।<br>२. इष्ट-प्राप्ति-अनिष्ट-परिहारयोः अलौकिकम् उपायं यः ग्रन्थः वेदयति स वेदः। |
| आचार्यः यास्कः | पुरुषविद्याऽनित्यत्वात् कर्मसम्पत्तिर्मन्त्रे वेदे। |
| स्वामी दयानन्दसरस्वती | विन्दन्ति जानन्ति विद्यन्ते भवन्ति विन्ते विचारयन्ति विदन्ते लभन्ते सर्वे मनुष्याःसत्त्वविद्यां यैर्येषु वा तथा विद्वांसश्च भवन्ति ते वेदाः। |
| प्रातिशाख्यम् | विद्यन्ते धर्मादयः पुरुषार्था यैः ते वेदाः। |
| आपस्तम्बः | मन्त्रब्राह्मणयोर्वेदनामधेयम्। |
| वैशेषिक-दर्शनम् | बुद्धिपूर्वा व्याकृतिर्वेदः। |

**११. वेदस्य पर्याय-वाचक-शब्दाः के सन्ति ?**

वेदस्य पर्याय-वाचक-शब्दाः भवन्ति यथा- (१) श्रुतिः (२) निगमः (३) आगमः (४) त्रयी (५) छन्दः(६) स्वाध्यायः (७) आम्नायः ।

## ४. वेदानां रचना-कालः

**१२. वेदाः कदा रचिताः ?**

भारतीय-वैदिकाचार्याणां मते वेदाः अपौरुषेयाः। अतः सृष्टेः उत्पत्तिकाले एव वेदाः आसन्। सृष्ट्यादौ भगवतः निश्वासात् वेदाः निर्गताः। तेभ्यः एव ब्रह्मणा अखिलजगतः सृष्टिः कृता। यदा ऋषयः तपसः बलेन मन्त्राणां दर्शनं कृतवन्तः तदा गुरु-शिष्य-परम्परया श्रुति-परम्परया च अग्रे वेदानां प्रसारः जातः। सृष्टि-कर्ता परमात्मा सृष्टेः आरम्भ-काले ब्रह्मणे वेदस्य ज्ञानं दत्तवान्। 'विद् - सत्तायाम्' इति धातोः'विद्यते सर्वेषु कालेषु इति वेदः' इत्येवं 'वेद'-शब्दस्य व्युत्पत्तिः भवति। एतया व्युत्पत्त्या एव वेदस्य नित्यत्वं सिद्ध्यति। भगवता बादरायणेन अपि वेदस्य नित्यत्वं स्वीकृत्य 'शास्त्रयोनित्वात्' इति सूत्रं कृतम्।केचन पाश्चात्य-विद्वांसः दार्शनिकाः च वेदस्य

अपौरुषेयत्वं न स्वीकुर्वन्ति। तेषां मतानुसारं लौकिकानि काव्यानि, शास्त्राणि च यथा पुरुष-विरचितानि भवन्ति तथैव वेदाः अपि कैश्चित् पुरुषैः विरचिताः वर्तन्ते।

**१३. वेदानां रचना-काल-विषये पाश्चात्य-विदुषां कानि मतानि?**

वेदानां रचना-काल-विषये पाश्चात्य-विदुषां विभिन्नानि मतानि सन्ति।

मैक्स-मूलरस्य मते - वेदानां रचना चतुर्षु काल-खण्डेषु जाता। ते यथा -

| क्रमः | काल-खण्डः | काल-खण्ड-नाम | वेदस्य कः भागः रचितः? |
|---|---|---|---|
| १ | १२०० तः १००० ई.पू. | छन्दःकालः | ऋग्वेदः सामवेदः च |
| २ | १००० तः ८०० ई.पू. | मन्त्र-कालः | यजुर्वेदः, अथर्ववेदः च |
| ३ | ८०० तः ६०० ई.पू. | ब्राह्मण-कालः | ब्राह्मण-ग्रन्थाः उपनिषदः च |
| ४ | ६०० ई.पू. | सूत्र-कालः | सूत्र-साहित्यम् |

- विन्टरनित्स-मतानुसारं वेदानां रचना-कालः ३५०० ई.पू. वर्तते।
- जैकोबी-महोदयस्य ज्योतिषीय-गणनानुसारं वेदानां रचना-कालः २५०० ई. पू. वर्तते।
- वेबरस्य मते वेदानां रचना-कालः १५००ई.पू. वर्तते।

**१४. वेदानां रचना-काल-विषये प्राच्यविदुषां मतानि कानि?**

बालगङ्गाधर-तिलकेन वसन्त-सम्पातम् अधिकृत्य ज्योतिष-गणनया वेदानां रचना-कालः चतुर्षु भागेषु विभक्तः -

- अदिति-कालः - ६००० ई. पूर्वतः४००० ई.पूर्व-पर्यन्तम्। अस्मिन् काले यज्ञेषु प्रयुज्यमानाः उपास्य-देवानां गौण-मुख्य-चरितादि-बोधकाः गद्य-पद्यमयमन्त्राः रचिताः।
- मृगशिरा-कालः - ४००० ई. पूर्वतः२५०० ई.पूर्व-पर्यन्तम्। अस्मिन् काले अधिकांशाः महत्त्व-पूर्णाः ऋग्वेद-मन्त्राः रचिताः।
- कृत्तिका-कालः - २५०० ई. पूर्वतः १४०० ई.पूर्व-पर्यन्तम्। अस्मिन् काले शतपथब्राह्मण-तैत्तिरीयसंहितयोः रचना जाता।

- सूत्र-कालः - १४०० ई. पूर्वतः ४०० ई.पूर्व-पर्यन्तम्। अस्मिन् काले श्रौतसूत्र-गृह्यसूत्रादीनाम् आर्ष-ग्रन्थानां रचना जाता। आचार्य तिलकः एतेन प्रकारेणवेदस्य रचनाकालं विवृणोति।

पण्डितः शङ्कर-बालकृष्ण-दीक्षित-महोदयः वेदस्य कालनिर्धारणे नक्षत्र-निर्देशम् अधिकृत्य ज्यौतिष-गणनया शतपथ-ब्राह्मणस्य रचनाकालः ३००० ई.पू.आसीत् इति मन्यते। शतपथ-ब्राह्मणात् अपि पूर्वम् ऋग्वेदस्य रचना जाता। तस्य मते ऋग्वेदस्य रचना-कालः ३५०० ई.पू. इति भवितुम् अर्हति।

वेदानां रचना अनेक-लक्ष-वर्ष-पूर्वं जाता इति स्वीये 'ऋग्वेदिक इण्डिया' नाम्नि ग्रन्थे अविनाशचन्द्र–दास-महोदयःप्रतिपादयति। अनेन महोदयेन भौगौलिक-गणना-पद्धत्या स्वस्य मतं मण्डितम्।

## ५. वैदिक-साहित्यस्य विभाजनम्

**१५. सामान्यतया वेदस्य विभाजनं कथं क्रियते?**

सामान्यतया वेदस्य चत्वारः विभागाः कल्प्यन्ते। ते यथा –

१. संहिता-भागः (मन्त्र-भागः) २. ब्राह्मण-भागः ३. आरण्यक-भागः ४. उपनिषद्-भागः। परन्तु आपस्तम्ब-वचनानुसारं वेदस्य स्वरूपं मन्त्र-ब्राह्मणात्मकं वर्तते।

**१६. संहिता-भागस्य विभाजनं कथं क्रियते?**

चतस्रः सन्ति संहिताः - १. ऋक्-संहिता २.यजुः-संहिता ३. साम-संहिता ४.अथर्व-संहिता। ऋक्-संहितायां स्तुति-परक-मन्त्राणां, यजुः-संहितायां यज्ञ-परक-मन्त्राणां, साम-संहितायां गान-परक-मन्त्राणाम्, अथर्व-संहितायां विविध-मारण-मोहनाभिचारिक-ब्रह्म-परक-मन्त्राणां च संग्रहः विद्यते। अर्थात् ज्ञान-प्रधानः ऋग्वेदः, कर्म-प्रधानः यजुर्वेदः, उपासना-प्रधानः सामवेदः, ब्रह्म-प्रधानः अथर्ववेदः।

**१७. पूर्वमीमांसायां वेदस्य विभाजनं कथं कृतम्?**

पूर्वमीमांसायां वेदस्य पञ्च भागाः कल्पिताः। ते यथा - १) विधिः २) मन्त्रः ३) नामधेयः ४) निषेधः ५) अर्थवादः चेति।

- **विधिः** - अज्ञातार्थ-ज्ञापकः वेदभागः 'विधिः'। उदाहरणम् - अग्निहोत्रं जुहुयात् स्वर्गकामः।
- **मन्त्रः** - प्रयोग-समवेत-अर्थस्मारकाः 'मन्त्राः'। मन्त्रैः एव स्मर्तव्यम् इति नियमः। अतः कथ्यते "अनुष्ठानस्मारकाः मन्त्राः" इति।
- **नामधेयः** - नामधेयानां च विधेयार्थ-परिच्छेदकतया अर्थवत्त्वम्। यथा – 'उद्भिदा यजते पशुकामः' इत्यत्र उद्भिद्-शब्दः यागनामधेयम्। तेन च विधेयार्थस्य परिच्छेदः क्रियते।
- **निषेधः** - पुरुषस्य निवर्तकं वाक्यं 'निषेधः'। यथा - 'न कलञ्जं भक्षयेत् इति'।
- **अर्थवादः** - प्रशस्त-निन्दान्यतरपरं वाक्यम् 'अर्थवादः'। उदाहरणम् - 'वायुर्वै क्षेपिष्ठा देवता' इति।

## ६. ऋग्वेद-विवरणम्

### १८. 'ऋक्'-शब्दस्य कः अर्थः?

'ऋक्'-शब्दस्य अर्थः भवति 'स्तुतिः', 'छन्दोबद्ध-पद्यमयी रचना' च। यैः मन्त्रैः देवानां स्तुतिः क्रियते ते मन्त्राः 'ऋक्' इति कथ्यन्ते। यस्मिन् ग्रन्थे विविध-देवानां स्तवनं पद्यात्मकैः वाक्यैः भवति सः 'ऋग्वेदः' कथ्यते। 'ऋच्यते = स्तूयते यया सा ऋक्' इति 'ऋक्'-शब्दस्य व्युत्पत्तिः। ऋचां संग्रहः 'ऋग्वेदः'। 'यत्रार्थवशेन पादव्यवस्था सा ऋक्' इति भगवान् जैमिनिः अवदत्।

### १९. ऋग्वेदस्य किम् अस्ति महत्त्वम्?

वेदः भवति यज्ञ-प्रधानः। तैत्तिरीय-संहितानुसारेण यज्ञस्य यद् विधानं यजुषा क्रियते तत्तु शिथिलं भवति किन्तु ऋग्वेदेन विहितानुष्ठानं दृढं भवति। पुनश्च भारतीय-संस्कृतेः, सामाजिक-आर्थिक-राजनैतिक-शैक्षणिक-नैतिक-व्यवस्थायाः च संपूर्णं चित्रणम् ऋग्वेदे लभ्यते।

### २०. ऋग्वेदस्य विभाजनं कथं दृश्यते ?

ऋग्वेदस्य विभाजनं द्विधा भवति - अष्टक-माध्यमेन, मण्डल-माध्यमेन च। अष्टक-क्रमानुसारं समग्र-ग्रन्थः अष्टसु अष्टकेषु विभक्तः भवति। प्रत्येकम् अष्टके अष्ट अध्यायाः भवन्ति। एवं रूपेण

सम्पूर्ण-ऋग्वेदः चतुःषष्ट्याम् अध्यायेषु विभक्तः अस्ति। प्रत्येकम् अध्यायस्य अवान्तर-भेदाः वर्गनाम्ना व्यपदिश्यन्ते। वर्गाणां संख्या २००६ (षडधिक-द्विसहस्रं) भवन्ति। मण्डल-क्रमानुसारं सम्पूर्ण-ग्रन्थः दशसु (१०) मण्डलेषु विभक्तः अस्ति। अतः ऋग्वेदः 'दशतयी' इति उच्यते। सम्पूर्ण-ऋग्वेदे पञ्चाशीतिः (८५) अनुवाकाः, तत्र १०१७ (एक-सहस्र-सप्तदश-सूक्तानि) सन्ति तथा ११ (एकादश) खिल-सूक्तानि सन्ति। सम्पूर्ण-ऋग्वेदे सूक्तेषु १०५८० १/४ मन्त्राः, १५३८२६ शब्दाः, ४३२००० अक्षराणि च सन्ति।

**२१. ऋग्वेदस्य मण्डलानि किमर्थं वंश-मण्डलानि अथवा Family Book इति कथ्यन्ते ?**

वंश-विशेषेण सम्बन्ध-कारणात् ऋग्वेदस्य मण्डलानि वंश-मण्डलानि अथवा Family Book इति कथ्यन्ते। प्रत्येकं मण्डलेन सह कस्यचित् ऋषेः सम्बन्धः वर्तते। तद्-विषयकं कोष्ठकम् अधः दीयते–

| **मण्डलम्** | **ऋषिः** |
|---|---|
| प्रथमम् | शतार्चिनः |
| द्वितीयम् | गृत्समदः |
| तृतीयम् | विश्वामित्रः |
| चतुर्थम् | वामदेवः |
| पञ्चमम् | अत्रिः |
| षष्ठम् | भरद्वाजः |
| सप्तमम् | वसिष्ठः |
| अष्टमम् | कण्वः |

नवम-मण्डलं पवमान-काण्ड-नाम्ना प्रसिद्धम्। ऋग्वेदस्य दशम-मण्डलं अर्वाचीनं मन्यते।

**२२. अस्य वेदस्य प्रवचन-कर्ता कः ?**

पैलः अस्य वेदस्य प्रवचन-कर्ता।

**२३. ऋग्वेदस्य कति शाखाः वर्तन्ते?**

महर्षि-पतञ्जलिः महाभाष्ये पस्पशाह्निके कथयति यत् पूर्वे ऋग्वेदस्य एकविंशतिः (२१) शाखा

आसन् । वर्तमान-समये ऋग्वेदस्य पञ्चानां शाखानां नामानि श्रूयन्ते,यथा -१. शाकलः, २. बाष्कलः, ३. आश्वलायनः, ४. शाङ्खायनः, ५. माण्डुकायनः च।

**२४. ऋग्वेदस्य के सन्ति प्रतिपाद्य-विषयाः ?**

ऋग्वेदस्य हिरण्यगर्भ-नासदीय-पुरुषादि-सूक्तानि सृष्टि-प्रक्रियायाः विवेचनं कुर्वन्ति।एतानि सूक्तानि दर्शन-शास्त्रस्य उद्भवस्य कृते सूत्र-रूपाणि सन्ति। ऋग्वेदे राजनीति-सम्बद्ध-विषयस्यापि विवेचनं लभ्यते। यत्र सभा, समितिः, राजा इत्यादीनां कर्तव्यं राज्य-सञ्चालनादीनां वर्णनं वर्तते।

ऋग्वेदे आध्यात्मिक-दार्शनिक-कलात्मक-वैज्ञानिक-तथ्यानां निरूपणं पदे पदे प्राप्यते। विशेषतया ऋग्वेदे अग्न्यादि-देवानां स्तुतिः यशसः उपलब्धये, श्री-सम्पत्प्राप्त्यर्थम्, विद्योपार्जनाय, नैतिक-विकासाय, शारीरिक-विकासाय, मानसिक-सन्तृप्त्यर्थं च कृता दृश्यते।

**२५. ऋग्वेदानुसारं कति देवताः सन्ति? तासु काः सन्ति प्रमुखाः?**

ऋग्वेदानुसारं त्रयस्त्रिंशत् (३३) देवताः सन्ति। अष्ट वसवः, एकादश रुद्राः, द्वादश आदित्याः, इन्द्रः प्रजापतिः च। अत्र प्रमुखाः वैदिक-देवताः क्रमशः- अग्निः, सविता, विष्णुः, इन्द्रः, रुद्रः, बृहस्पतिः, अश्विनौ, वरुणः, उषाः, सोमः च सन्ति ।

**२६. 'देव'-शब्दस्य कः अर्थः ?**

महर्षि-यास्केन प्रणीते निरुक्ते उक्तं यत्, "देवो दानाद्वा, दीपनाद्वा, द्योतनाद्वा, द्युस्थानो भवतीति वा"। देवः एव देवता। अयं शब्दः त्रिषु लिङ्गेषु व्यवहृतो भवति। यथा– देवः, देवं, देवता च। क्लीबलिङ्गे 'देवम्' इत्यस्य अर्थः इन्द्रियम् इति। किन्तु स्त्री-पुंलिङ्गयोः 'देव'-शब्दस्य अर्थः समानः एव।

**२७. के सन्ति पृथ्वी-स्थानीयाः देवाः?**

नद्यः, पृथिवी, अग्निः, सोमः, बृहस्पत्यादयः पृथिवीस्थानीयाः देवाः।

**२८. के सन्ति अन्तरिक्ष-स्थानीयाः देवाः?**

इन्द्रः, अपान्नपात्, मातरिश्वा, अहिर्बुध्न्यः, रुद्रः, मरुत्, वायुः, वातः, पर्जन्यः, आपः इत्यादयः अन्तरिक्षस्थानीयाः देवाः।

**२९. के सन्ति द्युस्थानीयाः देवाः?**

द्यौः, वरुणः, मित्रः, सूर्यः, सविता, पूषा, विवस्वान्, आदित्यगणः, उषाः, अश्विनौ इत्यादयः द्युस्थानीयाः देवाः।

**३०. प्रमुख-देवानां कार्यं किम् अस्ति?**

निरुक्तानुसारम् अग्निः पृथिवी-स्थानस्य, वायुः इन्द्रः वा अन्तरिक्ष-स्थानस्य, सूर्यः द्यु-स्थानस्य च प्रमुखः देवः अस्ति। तत्र अग्नेः कार्यं देवतानाम् आवाहनं, हविर्द्रव्यस्य देवताः प्रति वहनं च। यत् किञ्चिद् दार्ष्टि-विषयकम् अग्नि-कर्म एव तत्। अग्निः हविषः वहनं करोति अतः सः देवानां दूतः अपि कथ्यते।

इन्द्रस्य कर्म रसानुप्रदानं वृत्र-वधः च। या काचित् बल-कृतिः इन्द्र-कर्म एव तत् भवति। एतदर्थम् एव इन्द्रः 'द्रविणोदाः' इति शब्देन सम्बोध्यते।

आदित्यस्य कर्म रसा-दानं किरणैः रस-धारणं च। यत् किञ्चित् प्रवह्लितम् आदित्य-कर्म एव तत् भवति।

**३१. देवानां परस्परं सम्बन्धः कः?**

देवाः स्व-शक्त्या प्रकृतिरूपात् एकस्मात् अन्य-देवम् उत्पादयन्ति। अतः एकेन देवेन सह अपर-देवस्य सम्बन्धः वर्तते। यज्ञ-कर्मणि देवाः हविर्ग्रहणे सङ्गतिं साहचर्यं च दर्शयन्ति। यज्ञे कदाचित् समत्व-प्रतिपादनार्थं देवाः युग्मरूपेण सामूहिक-रूपेण वा स्तूयन्ते। यथा- मित्रावरुणौ, अश्विनी-कुमारौ, द्यावापृथिव्यौ इत्यादयः। वैदिक-मन्त्राणां प्रयोगेण देवानां साहचर्यम् अनुभूयते। तत्र इन्द्रः, सोमः, वरुणः, पर्जन्यः, ऋतवः, पूषा इत्यादयः देवाः स्थान-भेदेन काल-भेदेन वा अग्नेः साहचर्यं लभन्ते इति दृश्यते। अग्निः, सोमः, वरुणः, पूषा, बृहस्पतिः, ब्रह्मणस्पतिः, पर्वतः, कुत्सः, विष्णुः, वायुः, मित्रः इत्यादयः देवाः इन्द्रेण साहचर्यं वहन्ति। आदित्यस्य चन्द्रमसा, वायुना, संवत्सरेण च साहचर्यं भवति।

**३२. अस्य ऋग्वेदस्य के सन्ति भाष्यकाराः?**

स्कन्दस्वामी, नारायणः, उद्गीथः, माधवभट्टः, वेङ्कमाधवः, आनन्दतीर्थः, आत्मानन्दः, सायणः, मुद्गलः इत्यादयः सन्ति ऋग्वेदस्य भाष्यकाराः।

# ७. यजुर्वेद-विवरणम्

**३३. यजुश्शब्दस्य कः अर्थः?**

आध्वर्य-कर्म-सम्पादनाय यजुषां संकलनं यत्र अस्ति सा 'यजुर्वेद-संहिता'इति उच्यते। अतः वायु-पुराणे उक्तं,'यज्ञेन यजुश्शब्दः उत्पद्यते' इति। परन्तु ऋग्वेदे उक्तम् अस्ति'येन यज्ञस्य शरीर-निर्माणं क्रियते स यजुर्वेदः' इति। यजुः शब्दः 'यत्', 'जुः' चैतौ द्वौ शब्दौ मेलयित्वा निष्पद्यते। 'यत्' धातु-शब्दस्य अर्थः 'गतिमान्' इति, 'जु' शब्दस्य अर्थः आकाशं वा स्थितिशीलतत्त्वं वा। अर्थात् 'यदिदमन्तरिक्षमेतत् ह्याकाशमनु जवते तदेतद्यजुर्वायुश्चान्तरिक्षं च यच्च जुश्च तस्माद्यजुः'। परन्तु 'यज्' धातोः 'उसि'- प्रत्यये कृते 'यजुः' इति शब्दः निष्पन्नः।

**३४. सम्प्रदायानुसारं यजुर्वेदस्य विभाजनं कथं वर्तते?**

सम्प्रदायानुसारं यजुर्वेदस्य विभाजनं द्विधा भवति। यथा - आदित्य-संप्रदायस्य शुक्लयजुर्वेदः, ब्रह्म-सम्प्रदायस्य कृष्णयजुर्वेदः चेति। शुक्ल-यजुर्वेद-संहितायां केवलं मन्त्र-भागः एव वर्तते, परन्तु कृष्ण-यजुर्वेद-संहितायां विनियोग-सहितं मन्त्राः दृश्यन्ते।

**३५. अस्य वेदस्य प्रवचन-कर्ता कः ?**

अस्य वेदस्य प्रवचन-कर्ता वैशम्पायनः।

**३६. यजुर्वेदस्य कति शाखाः वर्तन्ते?**

महाभाष्य-पस्पशाह्निकानुसारं प्राचीनकाले यजुर्वेदस्य १०० शाखाः प्रचलिता आसन्। परन्तु वर्तमान-समये शुक्ल-यजुर्वेदस्य प्रधानतया शाखाद्वयं वर्त्तते, यथा -१. माध्यन्दिनशाखा, २. काण्वशाखा च। एवञ्च कृष्ण-यजुर्वेदस्य तैत्तिरीय-मैत्रायणी-कठ-कपिष्ठलाख्याः चतस्रः शाखाः प्रधानाः भवन्ति।

**३७. शुक्ल-यजुर्वेदस्य काण्व-माध्यन्दिन-शाखयोः कति मन्त्राः अनुवाकाश्च विद्यन्ते?**

यद्यपि शुक्ल-यजुर्वेदस्य काण्व-माध्यन्दिन-शाखयोः संहिते भिन्ने स्तः तथापि तयोः बहुशः साम्यं वर्तते। माध्यन्दिन-शाखायां ४० अध्यायाः, ३०३ अनुवाकाः, १९७५ (पञ्च-सप्तत्यधिकौनविंशति-संख्यकाः) मन्त्राः, २९६२५ (पञ्चविंशत्युत्तर-षड्शताधिकोनत्रिंशत् सहस्रं) शब्दाः सन्ति। काण्व-संहितायां ४० अध्यायाः, ३२८ अनुवाकाः, २०८६ (षडाशीत्यधिक-द्विसहस्रं) मन्त्राः सन्ति।

**३८. शुक्ल-यजुर्वेदस्य माध्यन्दिन-संहितायाः अध्यायानुसारं वर्ण्य-विषयाः के सन्ति** ?

शुक्ल-यजुर्वेदस्य माध्यन्दिन-संहिता एव 'वाजसनेयी'-संहिता इति उच्यते। अस्यां संहितायां चत्वारिंशत् अध्यायाः सन्ति। तत्र प्रथम-द्वितीयाध्याययोः दर्शपौर्णमासेष्टि-सम्बद्ध-मन्त्राणां संग्रहः वर्तते। तृतीयाध्याये अग्नि-होत्राय चातुर्मास्याय च मन्त्राणां संग्रहः कृतः वर्तते। चतुर्थतः अष्टमाध्याय-पर्यन्तं सोमयागस्य वर्णनं प्राप्यते। अत्रैव अग्निष्टोमस्य प्रकृतियाग-रूपेण विस्तृतं वर्णनम् अस्ति। अग्निष्टोमे सोमस्य उपल-खण्डेन कुट्टनं कृत्वा रस-रक्षणं क्रियते। तेन एव प्रातः, मध्याह्ने, सायंकाले च अग्नौ हवनं क्रियते। इदम् एव 'सवनम्' इति अभिधीयते। नवम-दशमाध्याययोः अनेन एव सम्बद्धाः मन्त्राः सन्ति। एकादशाध्यायात् आरभ्य अष्टादशाध्याय-पर्यन्तम् अग्नि-चयनस्य वर्णनं वर्तते। षोडशाध्याये शतरुद्रीय-होमस्य वर्णनम् अस्ति।

एकोनविंशाध्यायात् आरभ्य एकविंशाध्याय-पर्यन्तं सौत्रामणि-यज्ञस्य वर्णनं प्राप्यते। श्रूयते यत् अत्यधिकेन सोम-पानेन इन्द्रः रुग्णः अभवत्। तस्य चिकित्सार्थम् अयं यज्ञः प्रारब्धः। द्वाविंशाध्यायात् आरभ्य पञ्चविंशाध्याय-पर्यन्तम् अश्वमेध-यागस्य मन्त्राणां संग्रहः भवति। षड्विंशाध्यायात् आरभ्य एकोनत्रिंशत्तमाध्यायं यावत् खिल-मन्त्राणां सङ्कलनं प्राप्यते। त्रिंशत्तमे अध्याये चतुरशीत्यधिक-शत-संख्यकानां पदार्थानाम् आलम्भनस्य पुरुषमेधस्य वर्णनम् अस्ति। एकत्रिंशत्तमे अध्याये चतुर्षु वेदेषु पठितस्य पुरुष-सूक्तस्य वर्णनम् अस्ति। द्वात्रिंशत्तमे त्रयस्त्रिंशत्तमे च अध्याये सर्वमेधस्य मन्त्राः उल्लिखिताः सन्ति। चतुस्त्रिंशत्तमाध्यायस्य आरम्भे शिव-सङ्कल्प-सूक्तस्य षण्णां मन्त्राणां संग्रहः वर्तते। पञ्चत्रिंशत्तमाध्याये पितृ-मेध-यज्ञ-सम्बन्धि-मन्त्राणां वर्णनं दृश्यते। षट्त्रिंशत्तमाध्यायात् आरभ्य अष्टात्रिंशत्तमाध्यायं यावत् प्रवर्ग्ययागस्य मन्त्राणां विशदं वर्णनम् अस्ति। चत्वारिंशत्तमः अध्याय ईशावास्योपनिषद् इति कथ्यते। अस्मिन् अध्याये दार्शनिक-तत्त्वानां गहन-विवेचनं वर्तते।

**३९. कृष्ण-यजुर्वेदस्य तैत्तिरीय-संहितायां कति मन्त्राः अनुवाकाश्च विद्यन्ते**?

तैत्तिरीयसंहिता कृष्णयजुर्वेदस्य महत्त्वपूर्णा शाखा अस्ति। अस्याम् सप्त (७) काण्डानि, चतुश्चत्वारिंशत् (४४) प्रपाठकाः, एकत्रिंशदुत्तरषड्शतम् (६३१) अनुवाकाः, अष्टनवत्युत्तरशतोत्तर-द्विसहस्रं (२१९८) मन्त्राः सन्ति। दक्षिण-भारते अस्याः अधिकः प्रचारः वर्तते।

### ४०. यजुर्वेदस्य प्रतिपाद्य-विषयाः के?

यजुर्वेदस्य प्रमुखः विषयः कर्म-काण्डं वर्तते। अत्र कर्म-काण्डेन सह दार्शनिक-विषयाः अपि वर्णिताः सन्ति। मानव-जीवनेन सह सम्बद्धानां बहु-विधानां तत्त्वानां दर्शनं यजुर्वेदे प्राप्यते। राष्ट्रस्य कृते अपि विवरणम् अत्र वर्तते। कौटिल्यस्य अर्थ-शास्त्रस्य स्रोतः अपि यजुर्वेदः वर्तते। शुल्ब-सूत्राणां बीजम् अत्र अवलोक्यते।

### ४१. यजुःसंहितायाः किम् अस्ति वैशिष्ट्यम् ?

प्रत्येकं वेदे ज्ञान-कर्म-उपासनासु अन्यतरस्य महत्त्वं भवति। यजुर्वेदः कर्मप्रधानः। **'यज्ञो वै श्रेष्ठतमं कर्म'** इति श्रुतिवचनम्। **'दर्शपूर्णमासाभ्यां यजेत स्वर्गकाम'** इति श्रुति-वचनेन यज्ञ-द्वारा धर्मार्थ-काम-प्राप्तिः भवति इति सूच्यते। **'अग्नेनय सुपथा' इति** श्रुतिवचनेन यज्ञ-द्वारा मोक्षः सुलभः इति ज्ञायते। यज्ञ-सम्पादने यजुर्वेदस्य भूमिका अपरिहार्या। यजुर्वेदे वर्णानुसारं यज्ञ-विभाजनं कृतम्। ब्राह्मणानां कृते वाजपेयादीनां, क्षत्रियाणां कृते अश्वमेध-वाजपेयादीनां, सर्वजन-हिताय सर्वमेधादि-यज्ञानां च वर्णनं विद्यते। इत्थं यजुर्वेदः सामाजिक-समरसतां शिक्षयति। यजुर्वेदे रुद्र-विष्णु-प्रजापतीनां महत्त्वं ऋग्वेदापेक्षया अधिकं वर्तते। इतिहासस्य, राजनीतेः, काव्यशास्त्रस्य, भौगोलस्य चापि ज्ञानम् अस्मिन् वेदे विकीर्णम् अस्ति।

### ४२. यजुर्वेदस्य के सन्ति भाष्यकाराः ?

शुक्ल-यजुर्वेदस्य माध्यन्दिन-संहितायाः उवटः, महीधरः, दयानन्दः इत्यादयः भाष्यकाराः प्रसिद्धाः। शुक्ल-यजुर्वेद-काण्व-संहितायाः हलायुधः, अनन्ताचार्यः, आनन्द-बोध-भट्टोपाध्यायः, कालनाथः, सायणः इत्यादयः भाष्यकाराः वर्तन्ते। कृष्ण-यजुर्वेदीय-भाष्यकारेषु कुण्डिनः, भवस्वामी, गुहदेवः, आचार्यक्षुरः, भट्ट-भास्कर-मिश्रः, सायणाचार्यः, वेङ्कटेशः, शत्रुघ्नः इत्यादयः सन्ति प्रधानाः।

## ८. सामवेद-विवरणम्

### ४३. साम-शब्दस्य कः अर्थः?

'गीतिषु सामाख्या' इति वचनानुसारं साम-शब्दस्यार्थः भवति गानम्। अर्थात् यस्मिन् वेदे विशिष्ट-गान-पद्धत्या मन्त्राणां गानं भवति सः सामवेदः इति। छान्दोग्योपनिषदि 'स्वर' एव

'साम' इति उक्तम्। बृहदारण्यकोपनिषदि 'गानम्'एव 'साम' इति प्रतिपादितम्। तत्र श्रूयते - 'सा च अमश्चेति तत्साम्नः सामत्वम्'। 'सा' शब्दस्य अर्थः 'ऋक्' तथा 'अम' शब्दस्य अर्थः गान्धारादयः स्वराः। अर्थात् यत्र ऋचः उपरि गानं भवति स एव साम। पुनश्च साम = सा + अम, 'सा' अर्थात् 'वाक्', 'अम' अर्थात् 'प्राणः'। यस्मिन् वेदे वाक्-तत्त्वस्य प्राण-तत्त्वस्य च समन्वयः सः सामवेदः।

**४४. सामवेदस्य विभाजनं कथं दृश्यते?**

सामवेदस्य द्वौ भागौ स्तः। पूर्वार्चिकः तथा उत्तरार्चिकः। पूर्वार्चिके ६ प्रपाठकाः, एवञ्च ६५० मन्त्राः सन्ति। प्रत्येकम् अध्याये द्वौ द्वौ खण्डौ स्तः। पूर्वार्चिकः त्रिधा विभक्तः अस्ति। यथा - १. छन्दः, २. छन्दसि, ३. छन्दसिका चेति। पुनश्च विषयानुसारं पूर्वार्चिकम् आग्नेयपर्व-ऐन्द्रपर्व-पवमानपर्व-आरण्यकपर्व-भेदेन चतुर्षु भागेषु विभज्यते। उत्तरार्चिके ९ प्रपाठकाः, एवञ्च १२२५ मन्त्राः सन्ति। आहत्य सामवेदे १८७५ मन्त्राः सन्ति।

**४५. सामवेदस्य कति शाखाः वर्तन्ते?**

'सहस्रवर्त्मा सामवेदः' इति महाभाष्यकार-पतञ्जलि-वचनानुसारं सामवेदस्य १००० (एकसहस्रं) शाखाः आसन्। शिष्याणां प्रमादेन अनध्यायदिवसे च अध्ययनाद् इन्द्रस्य वज्र-प्रहारेण सहस्र-शाखाः विनष्टा इति चरण-व्यूहकारः कथयति। पुनश्च 'सामतर्पण'-नामके ग्रन्थे सामवेदस्य त्रयोदशानांशाखानाम् उल्लेखः अस्ति। किन्तु सम्प्रति सामवेदस्य तिस्रः एव शाखाः समुपलभ्यन्ते। यथा- १. कौथुमीय-शाखा, २. राणायनीय-शाखा, ३.जैमिनीय-शाखा चेति।

**४६. सामवेदस्य किम् अस्ति महत्त्वम्?**

सामवेदे उपासनायाः महत्त्वं प्रतिपादितम् अस्ति। ईश्वरप्राप्तये सर्वाधिक-महत्त्वम् उपासनायाः वर्तते। सामवेदस्य प्रमुखः विषयः'उपासना' वर्तते । श्रीमद्-भगवद्-गीतायां भगवता श्रीकृष्णेन सामवेदस्य विषये उक्तं यत् -"वेदानां सामवेदोऽस्मि"। सामवेदं विना यज्ञस्य पूर्णता न भवति। अतः एव प्राचीनैः ऋषिभिः यज्ञानन्तरं सामगानस्य विधानं कृतम्। शतपथ-ब्राह्मणे कथितं यत्- "न सामा यज्ञोऽस्ति"। यः सामं जानाति सः एव वेदस्य रहस्यम् अपि जानाति इति कथितं यथा- "सामानि यो वेत्ति स वेदत्वम्" इति। अतः वैदिकसंहितासु सामवेदस्य महत्त्वम् अत्यधिकं वर्तते।

**४७. सामवेदस्य आचार्यः कः ?**

व्यास-शिष्यः जैमिनिः सामवेदस्य प्रमुखः आचार्यः वर्तते।

**४८. सामवेदस्य के सन्ति प्रतिपाद्य-विषयाः?**

सामवेदे सप्तस्वराः सन्ति। यथा लौकिक-गानेषु षड्ज-ऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषादाः सप्तस्वराः प्रसिद्धाः सन्ति तथैव सामवेदे अपि प्रथमः, द्वितीयः, तृतीयः, चतुर्थः, पञ्चमः (मन्दः), षष्ठः (कुष्टः), सप्तमः (श्रुतिस्वराः) भवन्ति। साम-गानं चतुर्धा भवति - १. गेय-गानम् २. आरण्य-गानम् ३. ऊह-गानम् ४. ऊह्य-गानं विकृतिगानं वा। ग्रामे अथवा समाजे यदा गेयं भवति तद् गेय-गानम्। अरण्ये एव गेयम् आरण्यकम्। सोम-यागावसरे मन्त्राणां सामायिक-परिवर्तनं कृत्वा यद् गानं तद् ऊह-गानम्। रहस्यात्मकं गानम् ऊह्य-गानम् इति कथ्यते। तत्र अपि साम-गानस्य पञ्चविभागाः सन्ति - १. प्रस्तावः, २. उद्गीथः, ३. प्रतीहारः, ४. उपद्रवः ५. निधनं चेति।

**४९. सामवेदस्य के सन्ति भाष्यकाराः?**

माधवः, भरत-स्वामी, गुण-विष्णुः इत्यादयः सन्ति सामवेदस्य भाष्यकाराः।

## ९. अथर्ववेद-विवरणम्

**५०. अथर्व-शब्दस्य कः अर्थः?**

'थर्व-हिंसायाम् (काशिकावृत्तिः)', 'थर्वतिश्चरितकर्म (निघण्टुः)',इति आभ्याम् 'अथर्व'-शब्दस्य निष्पत्तिः भवति। 'अथर्वस्य' अर्थः 'अकुटिलता', 'अहिंसा' वा। पुनश्च 'थर्वतेः गतिकर्मणः इति अथर्वः" इति वचनानुसारं प्राण-वायोः अवरोधनं यः करोति सः एव 'अथर्वः' इति उच्यते।

**५१. अथर्व-वेदस्य अपर-नामानि कानि?**

ब्रह्म-वेदः, अमृत-वेदः, आत्म-वेदः, अङ्गिरोवेदः, अङ्गिरसवेदः, अथर्वाङ्गिरसवेदः, भृग्वङ्गिरोवेदः, क्षत्र-वेदः, भैषज्य-वेदः, छन्दोवेदः, मही-वेदः चेति अथर्ववेदस्य अपराणि नामानि सन्ति।

## ५२. अथर्व-वेदस्य वेदत्वम् अस्ति न वा?

अथर्व-वेदस्य वेदत्वम् अस्ति। अस्य वेदस्य प्राथम्यम् उदघोषयता न्याय-मञ्जर्यां जयन्त-भट्टेन प्रतिपादितं,"तत्र वेदाश्चत्वार: प्रथमोऽथर्ववेद:" इति।गोपथ-ब्राह्मणे श्रूयते यत् "स आथर्वणो वेदोऽभवत्, स अङ्गिरसो वेदोऽभवत्, ऋचसामानि भेषजा" इति। छान्दोग्योपनिषदि सनत्-कुमारं प्रति नारद-वचनं श्रूयते "ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थम्" इति।

## ५३. अथर्ववेदस्य किम् अस्ति महत्त्वम्?

ऋग्वेदादि-त्रय: वेदा: आमुष्मिकं फलं प्रयच्छन्ति, परन्तु अथर्व-वेद: ऐहिकामुष्मिके उभे फले यच्छति। अत: अथर्व-वेदस्य महत्त्वं सर्वोपरि विद्यते। यत्र अन्यवेदा: देवतानां स्तुतिम् एव कुर्वन्ति तत्र अथर्ववेद: जीवनोपयोगिनां भौतिक-विषयाणां वर्णनं करोति। अथर्व-वेदस्य ज्ञाता शान्ति-कर्म-पारग: यस्मिन् राष्ट्रे निवसति तद् राष्ट्रं निरुपद्रवं भूत्वा सततं वर्द्धते।

## ५४. अथर्व-वेदस्य कति शाखा: वर्तन्ते?

महर्षि-पतञ्जलिना पस्पशाह्निके "नवधाऽथर्वणो वेद:" इति लिखित्वा अथर्ववेदस्य नव शाखा: स्वीकृता:। ता: यथा - पिप्पलाद:, स्तौद:, मौद:, शौनक:, जाजल:, जलद:, ब्रह्म-वेद:, देवदर्श:, चारणवैद्य: च। परन्तु वर्तमान-काले अथर्व-वेदस्य द्वे शाखे समुपलभ्येते। ते द्वे यथा - १.पैप्पलाद-शाखा २.शौनकीय-शाखा च।

## ५५. अथर्ववेदीय-पैप्पलाद-संहितायां किं किं विद्यते?

पुराकाले पैप्पलाद-संहिताया: विशेष-ख्याति: आसीत्। अस्य द्वौ ग्रन्थौ आस्ताम्। प्रपञ्च-हृदयस्य कथनानुसारं पैप्पलाद-शाखाया: मन्त्र-संहिता विंशतिकाण्डेषु विभक्ता अस्ति। उक्तम् अपि यत् - 'तथाऽऽथर्वणके पैप्पलादशाखायां मन्त्रो विंशतिकाण्ड:'। तत्र ९२३ (त्रयोविंशत्यधिक-नवशतं) सूक्तानि, प्रायश: ८००० मन्त्रा: च सन्ति। पैप्पलादसंहिताया: एका पाण्डुलिपि: शारदा-लिप्यां काश्मीर-प्रदेशे उपलब्धा अभवत्। काश्मीर-नरेश: तां पाण्डुलिपिं जर्मनविदुषे राथ-महोदयाय दत्तवान्। १९०१ (एकोत्तरैकोनविंशतितमे) ख्रीष्टाब्दे तस्या: आलोकलेख: अमेरिकात: प्रकाशित: अभवत्। सम्प्रति भारतवर्षे नैकासु वेद-पाठशालासु, विशेषत: उत्कल-प्रान्ते अस्या: शाखाया: स्वरेण साकम् अध्ययनम् अध्यापनं च भवति। पातञ्जल-महाभाष्यानुसारं 'शन्नो देवीरभिष्टय' इति

मन्त्रः अस्याः शाखायाः प्रथमः मन्त्रः अस्ति। गोपथ-ब्राह्मणम् अपि एतया एव शाखया सम्बद्धं वर्तते।

**५६. अथर्ववेदीय-शौनक-शाखायां कति मन्त्राः अनुवाकाः च विद्यन्ते?**

अथर्ववेदीय-शौनक-शाखायां २० (विंशतिः) काण्डानि, १११ (एकादशाधिक-शतम्) अनुवाकाः, ७३० (त्रिंशदुत्तर-सप्तशतं) सूक्तानि, ५९८७ (सप्ताशीत्युत्तरनवशताधिकपञ्चसहस्रं) मन्त्राः च सन्ति।

**५७. अथर्ववेदीय-शौनक-संहितायाः अध्यायानुसारं वर्ण्य-विषयाः के सन्ति ?**

शौनक-संहितायाः प्रथम-काण्डे प्रत्येकस्मिन् सूत्रे नियमेन चत्वारः मन्त्राः, द्वितीय-काण्डे पञ्चमन्त्राः, तृतीय-काण्डे षड् मन्त्राः, चतुर्थ-काण्डे सप्तमन्त्राः तथा पञ्चम-काण्डे अष्ट मन्त्राः सन्ति। षष्ठ-काण्डे १४२ (द्विचत्वारिंशदधिक-शतम्) सूक्तानि सन्ति। सप्तमे काण्डे ११८ (अष्टादशाधिक-शतम्) सूक्तानि सन्ति। अष्टम-काण्डात् आरभ्य द्वादश-काण्ड-पर्यन्तम् आयत-सूक्तानि सन्ति। द्वादश-काण्डे पृथिवी-सूक्तं वर्तते। अत्र राजनैतिक-भौगोलिक-सिद्धान्तानां च भव्य-भावना सर्वेषां आलोचकानां दृष्टि-हारिका वर्तते। त्रयोदश-काण्डे आध्यात्मिकः विषयः वर्तते। चतुर्दश-काण्डे प्रधानरूपेण वैवाहिक-वर्णनम् अस्ति। पञ्चदशं काण्डं व्रात्य-काण्ड-नाम्ना ख्यातम् अस्ति। यस्मिन् व्रात्यानां यज्ञ-सम्पादनस्य आध्यात्मिक-वर्णनं वर्तते। षोडश-काण्डे दुःस्वप्न-नाशकानां मन्त्राणां संग्रहः अस्ति। सप्तदश-काण्डे एकमेव सूक्तम् अस्ति। अस्मिन् सूक्ते अभ्युदयार्थं भव्या प्रार्थना अस्ति। अष्टादश-काण्डं श्राद्ध-काण्ड-नाम्ना ख्यातं वर्तते। काण्डे अस्मिन् पितृ-मेध-सम्बन्धिनः मन्त्राः दृश्यन्ते। ऊनविंशतितमे काण्डे भैषज्यविषयकाणां राष्ट्रविषयकाणाम् अध्यात्म-विषयकाणां च मन्त्राणां सङ्कलनम् अस्ति। अन्तिम-काण्डे प्रसिद्धं कुन्ताप-सूक्तं वर्तते।

**५८. अथर्व-वेदस्य के सन्ति प्रतिपाद्य-विषयाः?**

अथर्व-वेदस्य मुख्य-प्रतिपाद्य-विषयाणाम् आध्यात्मिक-आधिभौतिक-आधिदैविकभेदेन त्रिधा विभाजनं कर्तुं शक्यते। आध्यात्मिकप्रकरणे मुख्य-रूपेण ब्रह्म-जीव-विषयकं परमात्म-विषयक-वर्णनं वर्तते। आधिभौतिकप्रकरणे राज्य-वर्णनं, राज्य-शासनं, सङ्ग्रामः, शत्रु-वाहनादीनां वर्णनं

दृश्यते। आधिदैविक-प्रकरणे नानाविधानां देवतानां, नाना विधानां यज्ञानां च विषये पर्याप्त-रूपेण सङ्कलनं वर्तते।

**५९. अथर्ववेदस्य के सन्ति भाष्यकाराः?**

अथर्व-वेदस्य सायणाचार्य-रचितम् एकम् एव भाष्यम् उपलभ्यते।

## १०. ब्राह्मण-साहित्य-विवरणम्

**६०. किं नाम ब्राह्मणम्?**

'ब्राह्मणं ब्रह्म-संघाते वेद-भागे नपुंसकम्' इति वचनानुसारं ब्राह्मण-शब्दस्य प्रयोगः नपुंसकलिङ्गे भवति। 'ब्रह्म'-शब्देन तद्धितार्थक 'अण्'-प्रत्ययं संयोज्य 'ब्राह्मण' इति शब्दस्य निष्पतिः भवति। ब्राह्मण-भागः वेदस्य व्याख्या-रूपः वर्तते। अतः कथ्यते -"ब्राह्मणं नाम कर्मणस्तन्मन्त्राणाञ्च व्याख्यानग्रन्थः" इति।

**६१. ब्राह्मण-ग्रन्थानां वेदत्वं विद्यते न वा?**

ब्राह्मण-भागस्य वेदत्वं विद्यते।

**६२. ब्राह्मण-भागस्य द्रष्टारः के सन्ति?**

ब्राह्मण-भागस्य द्रष्टारः सन्ति आचार्याः। आश्वलायन-गृह्यसूत्रे तेषाम् आचार्याणां गणत्रयस्य उल्लेखः अस्ति, यथा - १. माण्डूकेय-गणः, २. शाङ्खायन-गणः, ३. आश्वलायन-गणःचेति।

**६३. साम्प्रतं कति ब्राह्मण-ग्रन्थाः समुपलब्धाः, के च ते?**

सम्प्रति ये ब्राह्मणग्रन्थाः उपलब्धाः सन्ति ते अधः लिख्यन्ते-

| | |
|---|---|
| ऋग्वेदस्य - | ऐतरेय-ब्राह्मणम्, शाङ्खायन-ब्राह्मणम्। |
| शुक्ल-यजुर्वेदस्य - | शतपथ-ब्राह्मणम्। |
| कृष्णयजुर्वेदस्य - | तैत्तिरीय-ब्राह्मणम्। |
| सामवेदस्य- | १. ताण्ड्य-ब्राह्मणम् (पञ्चविंश-ब्राह्मणम्) २. षड्विंश-ब्राह्मणम् ३.साम-विधान-ब्राह्मणम् ४. आर्षेय-ब्राह्मणम् ५. दैवत-ब्राह्मणम् (देवताध्याय) ६. उपनिषद्-(मन्त्र)-ब्राह्मणम् ७. वंश-ब्राह्मणम् ८.संहितोपनिषद् ब्राह्मणम् ९. |

जैमिनीय-ब्राह्मणम्। एतेषु ब्राह्मणेषु ताण्ड्य-महा-ब्राह्मणम् अतीव प्रसिद्धं वर्तते।

अथर्ववेदस्य- गोपथ-ब्राह्मणम् एकम् एव अस्ति।

## ६४. किमस्ति ब्राह्मण-भागस्य महत्त्वम्?

वेदः भवति यज्ञ-प्रधानः। यज्ञ-कर्मणि कतिपयानां समस्यानाम्, "उदिते जुहोति अनुदिते जुहोति", "उरु प्रथस्व" इत्यादि-वाक्यानां च समाधानं ब्राह्मणभागेन एव सम्भवति।

ब्राह्मण-ग्रन्थानां वाक्यानि एव विधि-वाक्यानि। विधि-वाक्ये एव धर्म-विचारो भवति। आचार्यः जैमिनिः वदति, "चोदनालक्षणोऽर्थो धर्मः" इति। अत्र 'चोदना'-पदेन विधि-वाक्यानि एव गृहीतानि भवन्ति। ब्राह्मण-गत-विधि-वाक्यानाम् एव विचारः मीमांसा-शास्त्रेण क्रियते। मीमांसका एव अस्माकं प्रथम-दार्शनिकाः।

एषां ब्राह्मण-ग्रन्थानाम् अनुशीलनेन बहुविधानां श्रौत-यागाद्यनुष्ठानानां स्वरूपं तेषां वैज्ञानिकत्वं च अवगन्तुं शक्यते।

निर्वचन-ज्ञानाय अपि ब्राह्मण-भागस्य महत्त्वं विद्यते। निरुक्तस्य निरुक्तीनां कृते इमे ब्राह्मण-ग्रन्थाः आधारभूता एव वर्तन्ते ।

ब्राह्मण-ग्रन्थेषु बीजरूपेण विविधानि आख्यानानि प्रतिपादितानि सन्ति। प्रायः तेषाम् एव विस्तृतं स्वरूपं पुराण-साहित्यादिग्रन्थेषु उपलभ्यते।

## ६५. के सन्ति ब्राह्मण-भागस्य प्रतिपाद्य-विषयाः?

ब्राह्मण-साहित्यस्य प्रतिपाद्य-विषयेषु येषां दशानां विषयाणाम् उल्लेखः प्राप्यते ते यथा-

हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः।
परक्रिया पुराकल्पो व्यवधारणकल्पना॥
उपमानं दशैते तु विषयो ब्राह्मणस्य तु॥

एतेषां विवरणं यथा -

(१) हेतुः - कर्म-काण्ड-सम्बद्धः कश्चित् विशिष्ट-विधिः तत्कारणानां च निर्देशः एव 'हेतुः'। उदाहरणं यथा- 'तेन ह्यन्नं क्रियते'।

(२) निर्वचनम् - निर्वचनं व्युत्पत्तिद्वारा यागे प्रयोज्य-पदार्थानां सार्थकत्वं निरूपयति। यथा- "तद्ध्नो दधित्वम्"।

(३) निन्दा - केषाञ्चित् अप्रशस्त-पदार्थानां निन्दां कृत्वा तेषां निन्दनीय-पदार्थानां यागे अनुपादेयतायाः प्रतिपादनं नाम 'निन्दा'। यथा- 'अमेध्या वै माषाः'।

(४) प्रशंसा - 'वायुर्वै क्षेपिष्ठा देवता' इति अस्मिन् वाक्ये वायुः शीघ्रगामी देवता, वायुनिमित्तं यज्ञानुष्ठानं सम्पाद्यते। अत्र तस्य प्रशंसा वर्तते।

(५) संशयः - संशयस्य तात्पर्यं 'सन्देहः' इति। यथा यजमानस्य यागकरणे अकरणे च संशयः। यथा- 'तद् व्यचिकिसज्जुहवानी इमा हौषादूम् ।'

(६) विधिः - येन यागादिकस्य विधानं क्रियते सः विधिः। उदाहरणम् - 'यजमानेन सम्मिता औदुम्बरी भवति' इति विधिवाक्यं प्रयुज्यते।

(७) परकृतिः - अन्यस्यान्यस्य चोक्तिर्या बुधैः प्रोक्ता पराकृतिः। 'माषानेव मह्यं पचन्ति' इति अपरस्य कार्यं परकृतिः भवति।

(८) पुराकल्पः - 'पुराकल्प'-शब्दस्य अर्थः'प्राचीनम् आख्यानम्' इति। यथा - 'पुरा ब्राह्मणा अभैषु।'

(९) व्यवधारणकल्पना - 'व्यवधारण-कल्पना'-शब्दस्य अर्थः 'विशेषप्रकारेण निश्चयकरणम्' इति। यथा - 'यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणान् चतुष्कपालान्निर्वपेत्' इति।

(१०) उपमानः - छान्दोग्योपनिषदि उपमानस्य उदाहरणं दृश्यते। तद् यथा– "य यथा शकुनिः इति सूत्रेण प्रबुद्धो दिशं दिशं पतित्वा अन्यत्रायतनमलब्ध्वा बन्धनमेवोपाश्रयते, एवमेव खलु सोम्य, तन्मनो दिशं दिशं पतित्वाऽन्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयते, प्राणबन्धनं हि सोम्य, मन इति"।

ब्रह्म-शब्दस्य अपरः अर्थः भवति 'यज्ञः' इति। अतः एव ब्राह्मण-ग्रन्थेषु दर्शपौर्णमासेष्टि-सम्मतानुष्ठानाधान-पुनराधानाग्निहोत्रोपस्थाना-ग्रायण-दाक्षायणादीनां वर्णनं दृश्यते। एतद् अतिरिक्तं नारी-महिमा, देश-काल-नैतिकता इत्यादयः विषयाः ब्राह्मण-वाङ्मये वर्णिताः सन्ति।

**६६. ब्राह्मण-विषये विदुषः वाचस्पति-मिश्रस्य कथनं किम् अस्ति?**

नैरुक्त्यं यस्य मन्त्रस्य विनियोगः प्रयोजनम्।
प्रतिष्ठानं विधिश्चैव ब्राह्मणं तदिहोच्यते॥

**६७. ऋग्वेदीय-ब्राह्मण-ग्रन्थेषु किं विद्यते?**

ऐतरेयब्राह्मणम् तथा शाङ्खायनब्राह्मणम् इति द्वे ऋग्वेद-ब्राह्मणे स्तः। ऐतरेय-ब्राह्मणस्य सम्बन्धः शाकल-शाखया सह वर्तते। अस्य रचयिता ऋषिः 'महीदासः ऐतरेयः' अस्ति इति मन्यते। अस्मिन् चत्वारिंशत् अध्यायाः सन्ति। अस्मिन् ब्राह्मणे होतृ-नाम्नः ऋत्विजः कार्य-कलाप-विषये विशेष-रूपेण-वर्णनं दृश्यते। शाङ्खायन-ब्राह्मणं बाष्कल-शाखया सम्बद्धमस्ति। अस्य अपरं नाम कौषीतकि-ब्राह्मणम् अपि अस्ति। अस्मिन् ब्राह्मणे त्रिंशत् अध्यायाः सन्ति। अस्मिन् ब्राह्मणे रुद्रस्य महिम्नः विषये चर्चा वर्तते।

## ११. आरण्यक-साहित्य-विवरणम्

**६८. किं नाम आरण्यकम्?**

अरण्ये भवम् = आरण्यकम्। अर्थात् अरण्येस्थित्वात् चिन्तनं प्रवृत्तं तद् 'आरण्यकम्'। अरण्यवासिनां वानप्रस्थाश्रमिणां जीवने प्राणतत्त्वानाम् अध्यात्म-विद्यानां च महत्त्वम् अधिकृत्य आरण्यकानि प्रवृत्तानि सन्ति। आरण्यकोपनिषदौ ब्राह्मण-भागस्य परिशिष्टभूतौ स्तः। आरण्यक-विषये कथितं यत् -

"आरण्याध्ययनादेतद् आरण्यकमितीर्यते।
अरण्ये तदधीयीतेत्येवं वाक्यं प्रवक्ष्यते"॥ इति।

**६९. आरण्यक-ग्रन्थानां महत्त्वं किम् अस्ति?**

ब्राह्मण-ग्रन्थानन्तरम् आरण्यकानां स्थानं महत्त्वपूर्णम्। आरण्यके गूढाध्यात्मिक-तत्त्वानां विवेचनम् अस्ति। अतः एव इदं 'रहस्यम्' इति नाम्ना अपि प्रसिद्धम्। वेदानां प्राण-विद्या, प्रतीकोपासना च 'आरण्यकम्' इति उच्यते। आरण्यकेषु निवृत्ति-मार्गानुकूलस्य विशिष्टज्ञानस्य अध्यात्म-ज्ञानस्य च वर्णनं दृश्यते। वैदिक-तत्त्व-मीमांसायाः अनुशीलनाय आरण्यकानाम् उपादेयता विद्यते।

**७०. सम्प्रति उपलब्धाः आरण्यक-ग्रन्थाः के सन्ति?**

सम्प्रति उपलब्धाः आरण्यक-ग्रन्थाः अधः लिख्यन्ते –

- ऋग्वेदस्य - ऐतरेय-शाङ्खायनारण्यकौ,
- यजुर्वेदस्य -बृहत्तैत्तिरीयारण्यकौ,
- सामवेदस्य -तवल्कारारण्यक-ग्रन्थः,
- अथर्ववेदस्य - सम्प्रति किमपि आरण्यकं नैव प्राप्यते।

## १२. उपनिषत्-साहित्य-विवरणम्

**७१. 'उपनिषद्' इत्यस्य शब्दस्य कः अर्थः?**

'उपनिषत्'-शब्दे 'उप'-उपसर्गः सामीप्यार्थः। 'नि'-उपसर्गः निश्चयार्थः। 'सद्'-धातुः स्थिति-सूचकः। तत्त्व-ज्ञानार्थं गुरोः समीपे सविनयं स्थितिः एव 'उपनिषद्' इति उच्यते। उप-नि-उपसर्ग-द्वय-पूर्वकात् विशरण-गति-अवसादनार्थकात् 'षद्लृ'-धातोः क्विप्-प्रत्यये कृते 'उपनिषद्' इति शब्दः निष्पन्नः भवति। या संसार-बीज-भूताम् अविद्यां नाशयति, यया ब्रह्म-प्राप्तिः ब्रह्म-ज्ञानं वा भवति, यया च मानवः सर्वेभ्यः दुःखेभ्यः मुक्तः भवति, सा 'उपनिषद्' इति उच्यते।

**७२. उपनिषदां संख्या का ?**

'सर्वोपनिषदां मध्ये सारमष्टोत्तरं शतम्' इति उक्तत्वात् नैकाः उपनिषदः, तत्र च प्रसिद्धाः अष्टोत्तरशतम् इति ज्ञायते। तथापि उपलभ्यमानासु १०८उपनिषत्सु दश उपनिषदः सुप्रसिद्धाः, श्रीशङ्कराचार्यस्य भाष्यैः अलङ्कृताः च। ताः यथा –

ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरिः।
ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश॥

**७३. उपनिषदि प्रतिपादितानि तत्त्वानि कानि ?**

अध्यात्म-विद्यायाः रहस्य-प्रतिपादकाः वेद-भागाः उपनिषदः। न्याय वैशेषिक-साङ्ख्य-योग-मीमांसा-वेदान्तादिषुदर्शनेषु तत्तन्मतस्थापक-प्रमाणानि उपनिषत्-तत्त्व-वाक्यानि एव। उपनिषदाम्

अध्ययनेन मनुष्यः आधिभौतिक-आधिदैविक-आध्यात्मिकेभ्यः त्रिभ्यः दुःखेभ्यः मुक्तिं प्राप्तुं शक्नोति। चतुर्विध-पुरुषार्थेषु धर्मार्थ-काम-मोक्षेषु जीवनस्य चरम-पुरुषार्थः मोक्षः एव। मोक्ष-प्राप्तेः उपायाः उपनिषत्सु वर्णिताः सन्ति।

## १३. वेदाङ्ग-विवरणम्

**७४. कति वेदाङ्गानि? कानि च तानि?**

एतद्-विषये उक्तं यत् -

शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।
ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु॥

इत्थं वेदाङ्गानि षट् सन्ति। तानि यथा -

१. शिक्षा, २. कल्पः, ३. व्याकरणं, ४. निरुक्तं,५. छन्दः, ६. ज्योतिषं च।

**७५. वेदाङ्गानां किम् अस्ति महत्त्वम्?**

वेदानाम् अर्थ-ज्ञानाय वेदेषु प्रतिपादितस्य कर्म-काण्डस्य यथार्थ-ज्ञानाय वेदाङ्गानां महत्त्वं विद्यते। शिक्षया वैदिक-मन्त्राणां स्वरादिज्ञानं, कल्प-शास्त्रेण यज्ञ-विधीनां बोधः, व्याकरणेन शब्द-स्वरूप-ज्ञानं, निरुक्तेन पदानाम् अर्थदृष्ट्या निर्वचन-ज्ञानं, छन्दसा मन्त्राणां छन्दोज्ञानं, ज्योतिष-वेदाङ्गेन यज्ञाय समुचित-मुहूर्त-ज्ञानं च भवति। अतः एतानि वेद-पुरुषस्य अङ्गानि मन्यन्ते। उक्तं च-

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥

**७६. 'शिक्षा' इति पदस्य कः अर्थः? अस्य वेदाङ्गस्य किम् अस्ति प्रयोजनम्?**

तैत्तिरीयोपनिषदि आचार्य-सायणः कथयति –"स्वरवर्णाद्युच्चारण-प्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षा" इति। अर्थात् यया वेद-मन्त्राणां शुद्धस्य उच्चारण-विधेः ज्ञानं स्यात् तत् शास्त्रं 'शिक्षा' इति। शिक्षा वेदाङ्गस्य प्रमुख-प्रयोजनम् अस्ति वेद-मन्त्राणां शुद्धोच्चारण-ज्ञानम्।

**७७. के सन्ति शिक्षा-ग्रन्थानां प्रतिपाद्य-विषयाः ?**

तैत्तिरीयोपनिषदः प्रथम-वल्ल्यां शिक्षायाः समस्त-मूल-सिद्धान्तानां विवेचनं कृतं वर्तते। यथा- "शीक्षां व्याख्यास्यामः। वर्णः, स्वरः मात्रा, बलं, साम, सन्तानः, इत्युक्तः शीक्षाध्यायः" इति।

**७८. 'कल्प' इति शब्दस्य कः अर्थः?**

'कल्प'-पदस्य व्युत्पत्ति-लभ्यः अर्थः भवति 'कल्प्यते समर्थ्यते याग-प्रयोगः अत्र' इति। ऋक्-प्रातिशाख्ये वेद-विहितानां कर्मणां क्रम-पूर्वकं व्यवस्थापनं 'कल्पः' इति उक्तम्। यथा - 'कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रमिति'।

**७९. कतिविधानि कल्प-सूत्राणि सन्ति?**

कल्प-सूत्राणि चतुर्विधानि सन्ति। तानि सन्ति - १. श्रौत-सूत्राणि २. गृह्य-सूत्राणि ३. धर्म-सूत्राणि ४. शुल्ब-सूत्राणि च।

**८०. कल्प-सूत्राणां किम् अस्ति महत्त्वम्?**

वेदस्य मुख्यं प्रयोजनम् अस्ति वैदिक-कर्मकाण्डस्य यथार्थं सम्पादनम्। तत्र यज्ञानां यथार्थ-स्वरूप-प्रतिपादनं कल्प-शास्त्रे क्रियते। सदाचारस्य, संस्काराणां, धर्मस्य सामाजिक-व्यवस्थायाः च सम्पादनम् अपि कल्प-शास्त्रेण क्रियते।

**८१. श्रौत-सूत्राणां के सन्ति प्रतिपाद्य-विषयाः?**

वेदेषु ब्राह्मण-ग्रन्थेषु च प्रतिपादितानाम् अग्निहोत्र-दर्शपूर्णमास-चातुर्मास-सौत्रामणि-सोमयागादीनां साङ्गोपाङ्ग-निरूपणम् एव श्रौत-सूत्रैः क्रियते।

**८२. के सन्ति गृह्य-सूत्रस्य प्रतिपाद्य-विषयाः?**

गृहस्थानां कृते आवश्यकानाम् अनुष्ठानानां, संस्काराणां, देव-पितृ-यज्ञानां च विवेचनं गृह्यसूत्रेषु उपलभ्यते।

**८३. धर्म-सूत्राणां के सन्ति प्रतिपाद्य-विषयाः?**

धर्म-सूत्राणि कल्पस्य महत्त्वपूर्णानि अङ्गानि सन्ति। धर्म-सूत्रेषु चतुर्णां वर्णानां कर्तव्यानि, कर्माणि, व्यवहाराः, राज-धर्मः, आश्रम-धर्मः, संस्कार-धर्मः, दाय-भागः, प्रायश्चित्त-विधानम्, नित्य-नैमित्तिक-कर्म-विधानादि-विषयाः प्रतिपादिताः वर्तन्ते।

**८४. शुल्ब-सूत्राणां किम् अस्ति प्रयोजनम्?**

शुल्ब्-धातोः 'अच्'-प्रत्यये कृते 'शुल्ब'-पदं निष्पन्नं भवति। अस्य अर्थः भवति 'रज्जुः' इति। अतः रज्ज्वा प्रमापितायाः वेद्याः रचना शुल्ब-सूत्रस्य मुख्य-प्रयोजनम् अस्ति।

**८५. व्याकरणम् इति पदस्य कः अर्थः?**

व्याकरण-पदस्य अर्थः 'शब्दशास्त्रम्' इति। व्याक्रियन्ते = व्युत्पाद्यन्ते = प्रकृति-प्रत्यय-कल्पनया ज्ञाप्यन्ते पुण्यजनकाः शब्दाः येन तद् 'व्याकरणम्' इति। तद् इदं व्याकरणं द्विधा विभज्यते- १. वैदिक-व्याकरणम् २.लौकिक-व्याकरणं चेति।

**८६. व्याकरण-शास्त्रस्य मुख्य-प्रयोजनं किम् अस्ति?**

वेदस्य रक्षार्थं व्याकरणाध्ययनम् आवश्यकम्। अतः महर्षि-पतञ्जलिः व्याकरणस्य सर्वाणि मुख्यानि प्रयोजनानि इत्थम् उक्तवान् व्याकरण-महाभाष्ये - "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्" इति।

अत्र १. रक्षा, २. ऊहः, ३. आगमः, ४. लघु, ५. असन्देहः चैतानि व्याकरणाध्ययनस्य यानि पञ्च प्रयोजनानि उक्तानि तानि सर्वाणि अपि वेदस्य सन्दर्भे एव सन्ति।

**८७. प्रातिशाख्यस्य मुख्यं कार्यं किम् अस्ति?**

शाखां शाखां प्रति = प्रतिशाखम्। प्रतिशाखेषु भवं 'प्रातिशाख्यम्' इति । प्रातिशाख्यस्य प्रमुखं कार्यं भवति पदं प्रकृतिं मत्वा संहितासु जायमानानां विपर्ययाणां वर्णनं वर्णोच्चारण-विद्यायाः सूक्ष्म-विवेचनं च ।

**८८. निरुक्त-शब्दस्य व्युत्पत्तिः, लक्षणं च किम् अस्ति?**

'निर्' इति उपसर्ग-पूर्वकात् 'वच्'-धातोः क्त-प्रत्यये कृते 'निरुक्त'-शब्दः निष्पद्यते। अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तद् 'निरुक्तम्' अथवा एकैकस्य पदस्य सम्भाविताः अर्थाः यत्र निःशेषेण उच्यन्ते तदपि निरुक्तम्।

**८९. निरुक्तस्य मुख्य-प्रतिपाद्य-विषयः कः?**

निर्वचन-द्वारा वेदार्थ-ज्ञान-सम्पादनं निरुक्तस्य मुख्य-प्रतिपाद्य-विषयः।

### ९०. किं नाम छन्दःशास्त्रम्?

यस्मिन् शास्त्रे छन्दसां विशेषतः संग्रहणं लक्षणादीनां च निरूपणं क्रियते तद् एव शास्त्रं छन्दःशास्त्रम् इति उच्यते।

### ९१. छन्दसां कति भेदाः सन्ति?

वैदिकं लौकिकं च इति भेदेन छन्दसां भेद-द्वयम् अस्ति। एकविंशतिः वैदिकच्छन्दांसि भवन्ति। यथा -

| क्रमः | छन्दसः नाम | अक्षर-संख्या |
|---|---|---|
| १ | गायत्री | २४ |
| २ | उष्णिक् | २८ |
| ३ | अनुष्टुप् | ३२ |
| ४ | बृहती | ३६ |
| ५ | पङ्क्तिः | ४० |
| ६ | त्रिष्टुप् | ४४ |
| ७ | जगती | ४८ |
| ८ | अतिजगती | ५२ |
| ९ | शक्करी | ५६ |
| १० | अतिशक्करी | ६० |
| ११ | अष्टिः | ६४ |

| क्रमः | छन्दसः नाम | अक्षर-संख्या |
|---|---|---|
| १२ | अत्यष्टिः | ६८ |
| १३ | धृतिः | ७२ |
| १४ | अतिधृतिः | ७६ |
| १५ | कृतिः | ८० |
| १६ | प्रकृतिः | ८४ |
| १७ | आकृतिः | ८८ |
| १८ | विकृतिः | ९२ |
| १९ | संस्कृतिः | ९६ |
| २० | अभिकृतिः | १०० |
| २१ | उत्कृतिः | १०४ |

लक्षण-ग्रन्थ-काराणां ग्रन्थेषु २३४५ लौकिकानि छन्दांसि प्राप्यन्ते। परन्तु महाकाव्येषु अष्टाविंशतेः छन्दसां सर्वाधिकः प्रयोगः प्रप्यते। यथा-

| क्रमः | छन्दोनाम | क्रमः | छन्दोनाम |
|---|---|---|---|
| १ | अनुष्टुप् | १५ | उपगीत्यार्या |
| २ | उपजातिः | १६ | मालिनी |

| | | | |
|---|---|---|---|
| ३ | वंशस्थः | १७ | वसन्ततिलका |
| ४ | उपेन्द्रवज्रा | १८ | प्रमिताक्षरा |
| ५ | इन्द्रवज्रा | १९ | प्रहर्षिणी |
| ६ | पुष्पिताग्रा | २० | मञ्जुभाषिणी |
| ७ | वैतालीयम् | २१ | रुचिरा |
| ८ | द्रुतविलम्बितम् | २२ | शालिनी |
| ९ | रथोद्धता | २३ | शार्दूलविक्रीडितम् |
| १० | मन्दाक्रान्ता | २४ | शिखरिणी |
| ११ | वियोगिनी | २५ | हरिणी |
| १२ | स्वागता | २६ | आर्या |
| १३ | उद्गता | २७ | स्रग्धरा |
| १४ | औपच्छन्दसम् | २८ | उपजातिः (अन्यच्छन्दसां मिश्रणम्) |

**९२. ज्यौतिष-शास्त्रस्य वेदाङ्गत्वेन का आवश्यकता विद्यते?**

वेदः भवति यज्ञ-प्रधानः। तत्र 'दर्श-पूर्ण-मासाभ्यां यजेत', 'वसन्ते वसन्ते ज्योतिषा यजेत', 'कृत्तिकास्वग्नीमादधीत'- इत्यादिषु विधि-वाक्येषु ये वसन्तादयः कालाः निर्दिष्टाः तेषां कालानां ज्ञानं ज्यौतिष-वेदाङ्ग-द्वारा एव भवति। अतः काल-विज्ञापक-शास्त्र-रूपेण ज्यौतिष-शास्त्रं स्तूयते। अतः आचार्येण लगधेन प्रोक्तम्-

"वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्या विहिताश्च यज्ञाः।

तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद स वेद यज्ञान्"॥ इति।

**९३. वेदाङ्गज्यौतिषे कति विभागाः सन्ति? के च ते?**

वेदाङ्ग-ज्यौतिषे सन्ति चत्वारः विभागाः। ते यथा - १. आर्च-ज्यौतिषं, २. याजुष-ज्यौतिषं, ३. साम-ज्यौतिषं, ४. अथर्व-ज्यौतिषं चेति।

**९४. ज्यौतिष-शास्त्रस्य कति स्कन्धाः सन्ति?**

ज्यौतिषस्य १. सिद्धान्तः, २. संहिता, ३. होरा चेति त्रयः स्कन्धाः सन्ति।

**९५. सिद्धान्त-स्कन्धस्य के सन्ति प्रतिपाद्य-विषयाः?**

सिद्धान्त-स्कन्धे एते विषयाः सन्ति, यथा - सौरादीनि कालमानानि, ग्रहाणां चाराः, मध्यम-ग्रहानयनम्, स्पष्ट-ग्रहानयनम्, कृतानां गणितानाम् उपपत्तिप्रदर्शनम्, सूर्य-चन्द्रयोः ग्रहण-विचारः, ग्रह-युतिः, नक्षत्र-युतिः, भू-ग्रह-नक्षत्राणां स्थाननिर्देशः इत्यादि।

**९६. का नाम होरा ?**

यत्र ग्रहाणां स्थितिवशात् व्यक्ति-विषयकं शुभाशुभं फलं चिन्त्यते सा एव 'होरा' इति उच्यते। अत्र फलादेशः भवति। अतः आचार्य-वराहमिहिरेण प्रोक्तम्- 'कर्मार्जितं पूर्वभवे सदादि यत्तस्य पक्तिं समभिव्यनक्ति' इति।

## १४. वैदिक-यज्ञः

**९७. यज्ञ-शब्दस्य कः अर्थः?**

यज्ञ-शब्दः 'यज् देवपूजा-संगतिकरण-दानेषु' इति धातोः 'नङ्'-प्रत्यये कृते निष्पन्नः भवति। 'देवपूजा' इत्यत्र 'पूजा' नाम सत्कारः यथायोग्यः व्यवहारः वा। सर्वैः सह समुचितः व्यवहारः एव 'देवपूजा', 'संगतिकरणम्' इत्युक्ते प्रकृतौ उपलब्धानां पदार्थानां उचितरीत्या प्रयोगः, येन प्राणिनां कल्याणम् उत्कर्षः वा स्यात्। 'दानम्' इत्युक्ते स्वयम् उपार्जितानां धन-सम्पत्ति-विद्यादीनां प्राणिमात्रस्य कल्याणाय उत्सर्जनम्। यज्ञः एव यागः।

**९८. कात्यायनानुसारं 'याग'-शब्दस्य कोऽर्थः ?**

यागस्य लक्षणविषये कात्यायन-श्रौतसूत्रे उक्तं यत् - 'देवतोद्देश्येन द्रव्यत्यागो यागः'। देवान् उद्दिश्य अग्नौ द्रव्यस्य त्यागः एव 'यागः'।

**९९. यागानां स्वरूपं किम्?**

यज्ञाः/यागाः श्रौत-स्मार्तभेदेन द्विविधाः भवन्ति। ये साक्षात् श्रुतिषु विहिताः ते 'श्रौताः', ये चगृह्य-धर्मसूत्रेषु विहिताः ते 'स्मार्ताः' यागाः कथ्यन्ते। श्रुतौ तावत् वैदिकानि कर्माणि पञ्चधा

विभक्तानि। उक्तम् अपि - **"स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यानि पशुः सोम इति"।** गृहस्थ-वानप्रस्थिनोः नित्य-कर्तव्येषु यज्ञस्य विशिष्टं स्थानं वर्तते।

**१००. यागाः कतिविधाः? के च ते?**

'यज्ञ'-पदेन साधारणतः एकविंशतिः संस्थाः यज्ञाः गृह्यन्ते । ताः यथा -सप्तपाकयज्ञसंस्थाः, सप्तहविर्यज्ञसंस्थाः, सप्त सोमयज्ञसंस्थाः च। आहत्य एकविंशतिः श्रौताः स्मार्ताः च यागाः सन्ति। औपासनहोमः, वैश्वदेवम्, पार्वणम्, अष्टका, मासिकश्राद्धम्, श्रवणा, शूलगवः चेति सप्त पाकयज्ञसंस्थाः भवन्ति। अग्निहोत्रम्, दर्शपूर्णमासौ, आग्रयणम्, चातुर्मास्यानि, निरूढपशुबन्धः, सौत्रामणी, पिण्डपितृयज्ञादयः सप्तहविर्यज्ञसंस्थाः भवन्ति। अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, आप्तर्यामः चेति सप्त सोमयज्ञसंस्थाः भवन्ति इति धूर्तस्वामिना स्फुटीकृतम् ।

**१०१. यागानां किम् अस्ति महत्त्वम्?**

वेदः भवति यागप्रधानः। परम्परायाम् इदं मन्यते यत् यागेन अस्य विश्वस्य पालनं भवति। यज्ञे प्रदत्ताभिः आहुतिभिः अग्निशिखाः निर्मीयन्ते। ताभिःघृतादि-द्रव्याणि वायु-रूपेण उपरि गच्छन्ति। यज्ञीय-द्रव्याणां सूक्ष्मकणाः तडित्शक्तियुक्ताः भवन्ति। आकाशे स्थितानां धूलि-कणानां धूम-कणानां च संयोगेन या तडिच्छक्तिः सञ्चिता भवति तेन मेघानां सृष्टिः भवति। मेघैः वर्षितेन जलेन एव सृष्टि-चक्रं प्रवर्तते।

## १५. वेदाध्ययन-परम्परा

**१०२. वैदिक-संस्कृत-भाषायाः विशेषः कः?**

वैदिक-संस्कृते शब्द-रूपाणि लौकिक-संस्कृतात् ईषत् भिन्नानि भवन्ति। वैदिक-संहितासु स्वर-विधानम् अपि वर्तते।

**१०३. कः नाम स्वरः?**

वर्ण-मालायाम् अ, इ, उ इत्यादयः ये स्वराः सन्ति तेषाम् उच्चारणं त्रिभिः प्रकारैः कर्तुं शक्यते। ते त्रयः प्रकाराः अपि त्रयः 'स्वराः' इति उच्यन्ते। ते यथा – उदात्तः स्वरः, अनुदात्तः स्वरः,

स्वरितः स्वरः च। एतेषां स्वराणां सामान्यं विवरणम् इत्थम् -

| **स्वरः** | **विवरणम्** |
|---|---|
| उदात्तः | मुखे अकारादि-वर्णस्य यत् उच्चारण-स्थानं भवति तत्रैव उपरितन-भागात् यद् उच्चारणं क्रियते तत् 'उदात्तम्' उच्चारणम् इति उच्यते। लिप्याम् एतस्य स्वरस्य प्रदर्शनाय किमपि चिह्नं न भवति। उदाहरणम् - 'आ ये' अत्र 'आ' इति 'ए' इति स्वरौ च चिह्नरहितौ लिखितौ। एतौ उदात्तौ मन्तव्यौ। |
| अनुदात्तः | मुखे अकारादि-वर्णस्य यत् उच्चारण-स्थानं भवति तत्रैव अधस्तन-भागात् यद् उच्चारणं क्रियते तत् 'अनुदात्तम्' उच्चारणम् इति उच्यते। लिप्याम् एतस्य स्वरस्य प्रदर्शनाय प्रायः वर्णस्य अधः रेखा क्रियते। उदाहरणम् - 'अ॒र्वाङ्' इत्यत्र अधोरेखया अङ्कितः अकारः अनुदात्तः। |
| स्वरितः | मुखे अकारादि-वर्णस्य यत् उच्चारण-स्थानं भवति तत्रैव उपरितन-भागात् आरभ्य अधस्तन-भागे यद् उच्चारणं पूर्णं भवति तत् 'स्वरितम्' उच्चारणम् इति उच्यते। लिप्याम् एतस्य स्वरस्य प्रदर्शनाय वर्णस्य उपरि रेखा क्रियते। उदाहरणम् - 'रथा॑नां न' इति मन्त्रे थकारात् परं वर्तमानः आकारः स्वरितः। |

### १०४. वेदेषु स्वराणां महत्त्वं किम्?

वैदिक-संहितासु वर्तमानानां स्वराणां नैकानि प्रयोजनानि सन्ति। स्वरभेदेन शब्दानाम् अर्थे अपि भेदः भवति। अतः शब्दार्थस्य सम्यक् निर्धारणाय स्वराः प्रयुज्यन्ते। स्वरैः वेद-पाठस्य रक्षणम् अपि भवति।

### १०५. वेदाध्ययने हस्त-स्वरस्य आवश्यकता विद्यते न वा ?

वेदाध्ययन-समये मुखेन मन्त्र-वर्णोच्चारणेन सह हस्त-सञ्चालनम् अपि क्रियते। स्वरः, हस्तः च द्वौ अपि युगपद् एव वेदपाठे प्रयोक्तव्यौ। हस्त-भ्रष्टः (तन्नाम उच्चार्यमाण-स्वरानुगुणं हस्त-चालने असमर्थः) एवं च उदात्तानुदात्त-स्वरितानां स्वराणाम् उच्चारणे असमर्थः वेदाध्यायी धर्मार्थ-काम-मोक्षाख्य-चतुर्विध-पुरुषार्थ-रूपं वेदाध्ययनफलं न प्राप्नोति।

### १०६. वेद-पाठात् पूर्वं किं करणीयम् ?

वेद-पाठात् पूर्वं प्रणवस्य, नाम ॐकारस्य उच्चारणं करणीयम्। 'ॐकार: वेदेषु अथकार: भाष्येषु' इति प्रातिशाख्य-वचनानुसारं वेद-मन्त्राणाम् उच्चारणात् पूर्वम् ॐकारस्य विधानं वर्तते। तदनन्तरं 'भू[१]र्भुव:[२] स्व:[३]' इत्येता: तिस्र: व्याहृतय: कर्तव्या:। अनन्तरं गायत्रीमन्त्रस्य उच्चारणं करणीयम्। तदनन्तरम् एव वेदपाठस्य प्रारम्भ: करणीय:। केचन पारम्परिकविद्वांस: कथयन्ति प्रणवोच्चारणात् पूर्वं 'हरि:' इत्येतस्य पदस्य उच्चारणम् अवश्यं करणीयम् इति। इत्थं 'हरि: ॐ भूर्भुव: स्व: तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो न: प्रचोदयात्' इति पठनात् अनन्तरम् एव अन्ये वेदमन्त्रा: पठनीया:।

### १०७. वेद-पाठस्य परम्पराया: क: विशेष:?

गुरु-परम्परया बटव: वेदानां सस्वरं पाठं कण्ठस्थीकुर्वन्ति। वेद-पाठस्य रक्षणाय वैदिक-संहिताया: अष्टभि: प्रकारै: पाठ: क्रियते। एता: एव 'अष्ट विकृतय:' इति उच्यन्ते। अधस्तने श्लोके तासाम् अष्टानां विकृतीनां नामानि सङ्गृहीतानि सन्ति -

जटा[१] माला[२] शिखा[३] रेखा[४] ध्वजो[५] दण्डो[६] रथो[७] घन:[८]।
अष्टौ विकृतय: प्रोक्ता: क्रमपूर्वा महर्षिभि:॥

## १६. वैदिक-संस्कृते: महत्त्वम्

### १०८. वैदिकसंस्कृते: कानि सन्ति वैशिष्ट्यानि ?

वैदिक-संस्कृति: भारतीय-संस्कृते: मूलं वर्तते। यज्ञ-सम्पादनम्, विश्व-बन्धुत्व-भावना, अध्यात्म-भावना, धर्म-परायणता, देवता-वाद:, आत्म-दर्शनम्, कर्म-फले विश्वास:, पुनर्जन्म-सिद्धान्त:, यम-नियम-पालनम्, पुरुषार्थ-चतुष्टय-प्राप्त्यर्थं प्रयत्न:, वर्णाश्रम-व्यवस्था, समत्व-भावना, दया-भाव:, श्रद्धा, भक्ति: चेति इमानि सन्ति वैदिकसंस्कृते: वैशिष्ट्यानि।

* * *

# द्वितीयं प्रकरणम्

# ज्योतिष-विवरणम्

## १. ज्योतिष-परिचयः

### १.१. किं नाम ज्योतिषम्

१. **किं नाम ज्योतिषम्?**

आकाशस्थानां ग्रह-नक्षत्रादि-पिण्डानां गति-स्थिति-प्रभावादि-निरुपणं यस्मिन् शास्त्रे भवति तद् ज्योतिषमिति।

२. **वेद-ज्योतिषयोः कः सम्बन्धः अस्ति?**

ज्योतिषम् एकं वेदाङ्गम् अस्ति।

### १.२. वेदाङ्गेषु ज्योतिषस्य स्थानम्

३. **षट्सु वेदाङ्गेषु ज्योतिषस्य स्थानं किम् अस्ति?**

ज्योतिषं वेद-पुरुषस्य नेत्रम् अस्ति।

४. **ज्योतिषं वेद-पुरुषस्य नेत्रं किमर्थम् उच्यते?**

ज्योतिष-शास्त्रद्वारा जनाः विविध-कर्मणां कृते शुभाशुभ-स्थल-लक्षण-कालादिकं पश्यन्ति, अतः ज्योतिषं वेद-पुरुषस्य नेत्रम् उच्यते।

### १.३. ज्योतिष-शास्त्रस्य प्रवर्तकाः

५. **ज्योतिष-शास्त्रस्य कति प्रवर्तकाः सन्ति?**

ज्योतिष-शास्त्रस्य अष्टादश प्रवर्तकाः सन्ति।

**६. अष्टादशानां प्रवर्तकानां नामानि कानि?**

अष्टादशानां प्रवर्तकानां नामानि इत्थं सन्ति –

| | | |
|---|---|---|
| १. सूर्यः | २. पितामहः | ३. व्यासः |
| ४. वशिष्ठः | ५.अत्रिः | ६. पराशरः |
| ७. कश्यपः | ८. नारदः | ९. गर्गः |
| १०. मरीचिः | ११. मनुः | १२. अङ्गिरा |
| १३. लोमशः | १४. पौलिशः | १५. च्यवनः |
| १६. यवनः | १७. भृगुः | १८. शौनकः |

## १.४. ज्योतिष-शास्त्रस्य स्कन्धाः

**७. ज्योतिष-शास्त्रस्य कति स्कन्धाः सन्ति?**

ज्योतिष-शास्त्रस्य त्रयः स्कन्धाः सन्ति - १. सिद्धान्तः २. संहिता ३. होरा चेति।

केषाञ्चित् आचार्याणां मते ज्योतिष-शास्त्रस्य पञ्च स्कन्धाः भवन्ति। ते ज्योतिष-शास्त्रस्य उपर्युक्त-स्कन्धैः सह इतोऽपि द्वौ स्कन्धौ स्वीकुर्वन्ति। तौ नाम ४. केरलम्, ५. रमलं च। उक्तं च-

सिद्धान्तं संहिता होरा रमलं केरलं तथा।
पञ्चस्कन्धं विजानीयात् वेदाङ्गज्योतिषमिदम्।

केचन ४. केरलं, ५. शकुनं च ज्योतिष-शास्त्रस्य पञ्चसु स्कन्धेषु परिगणयन्ति। उक्तं च -

पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिताः।
केरली शकुनं चेति ज्योतिषशास्त्रमुदीरितम्॥

**८. सिद्धान्त-स्कन्धे केषां विषयाणां समावेशः भवति?**

सिद्धान्तभागे अधो लिखितानां विषयाणां समावेशः भवति-

- त्रुटिकालात् समारभ्य प्रलयान्त-कालं यावत् काल-गणना,
- मानव-दैव-जैव-पैत्र-आर्क्ष-सौर-सावन-चान्द्र-ब्राह्माणां नवविध-काल-मानानां साङ्गोपाङ्ग-

ज्ञानम्,

- ग्रहाणां गति-स्थित्यादीनां निरूपणम्,
- ग्रहण-विचारः,
- अङ्क-गणितं, बीज-गणितं, रेखा-गणितं, त्रिकोण-मितिः इत्यादि,
- खगोल-यन्त्राणां वेध-युक्त्या परिज्ञानम्, गुरुत्वाकर्षणम्, भूभ्रमणसिद्धान्तः,
- क्षयाधिमासज्ञानं, पञ्चाङ्ग-ज्ञानम् इत्यादयः।

**९. ज्योतिष-शास्त्रस्य संहिता-स्कन्धे केषां विषयाणां समावेशः भवति?**

ज्योतिष-शास्त्रस्य संहितास्कन्धे एतेषां विषयानां समावेशः भवति -

१. ग्रह-गति-वशात् ग्रह-नक्षत्रादि-पिण्डानां शुभाशुभ-लक्षणानि, तेषां मानव-जीवने प्रभावस्य विवेचनं च,

२. पशु-पक्षि-कीटादीनां चेष्टाधारेण शुभाशुभ-ज्ञानम्,

३. शकुन-विद्या, भूकम्पः, उल्कापातः, वृक्ष-स्थित्याधारेण भूगर्भ-जल-ज्ञानम्,

४. वृक्षायुर्वेदः, वृष्टि-ज्ञानं च,

५. वास्तु-विद्यायां - भूमिशोधनं, शल्योद्धारः, भूमौ अस्थिज्ञानं, भवन-निर्माण-विधिः, मूर्ति-निर्माणादि ज्ञानं च,

६. सामुद्रिक-हस्त-रेखा-ज्ञानम्, अङ्ग-विद्या च,

७. शुभाशुभ-मुहूर्त-ज्ञानम्,

८. केरल-शास्त्रे प्रश्नात् शुभाशुभ-ज्ञानम्, नष्ट-वस्त्वादि-ज्ञानं च,

९. रमल-शास्त्रे पाशक(पासा)-साहाय्येन मनुष्यस्य सर्वेषां प्रश्नानां शुभाशुभ-ज्ञानम् इत्यादयः।

**१०. होरा-स्कन्धे केषां विषयाणां समावेशः भवति?**

होरा-स्कन्धे एतेषां विषयाणां समावेशः भवति-

१. कुण्डली-निर्माणम्,

२. जन्म-कुण्डल्यां ग्रह-नक्षत्रादीनां परस्पर-सम्बन्धः,ग्रहाणां राश्यादिषु स्थितिः, स्थान-विशेषे काल-विशेषे च तत्संबन्धिनां शुभाशुभ-फलानां विवेचनं च,

३. जन्म-कुण्डल्याधारेण बालानाम् अरिष्टज्ञानं, आयुर्निर्धारणं, अन्तर्दशा-महादशादि-ज्ञानेन अरिष्टज्ञानम्, विभिन्नानां योगानां ज्ञानं च,

४. वर्ष-कुण्डल्या: आधारेण देशस्य विदेशस्य वा वार्षिक-फलादेश:,

५. स्वर-शास्त्राधारेण शुभाशुभ-लक्षण-ज्ञानम्, आयुर्ज्ञानं चेत्यादि।

## २. ज्योतिषाध्ययनस्य प्रयोजनानि

**११. ज्योतिष-शास्त्राध्ययनस्य कानि प्रयोजनानि?**

'ग्रहाधीनं जगत्सर्वम्' इति प्रसिद्धा उक्ति: वर्तते। ज्योतिष-शास्त्राध्ययनस्य त्रिविधानि प्रयोजनानि वक्तुं शक्यन्ते -

१. वैदिक-प्रयोजनानि

२. लौकिक-प्रयोजनानि

३. धनार्जनदृष्ट्या प्रयोजनानि

**१२. ज्योतिष-शास्त्राध्ययनस्य वैदिक-प्रयोजनानि कानि?**

वेदेषु विहितानां यागानाम् अनुष्ठानस्य उचित-काल-स्थल-निर्धारणं ज्योतिष-शास्त्रेण एव सम्भवति। इत्थं वेद-विहित-कर्मणाम् अनुष्ठानाय ज्योतिष-शास्त्रम् उपकरोति।

**१३. ज्योतिष-शास्त्राध्ययनस्य लौकिक-प्रयोजनानि कानि?**

ज्योतिष-शास्त्राध्ययनस्य नैकानि लौकिक-प्रयोजनानि वक्तुं शक्यन्ते। तेषु कानिचन प्रयोजनानि इमानि सन्ति –

१. लोके ज्योतिष-शास्त्राधारेण मनुष्याणां जन्म-कुण्डली-निर्माणं भवति। तद्द्वारा मनुष्यस्य शुभाशुभ-स्थिति-निर्धारणं, आयुराजीविका-रोग-शिक्षणादीनां जीवनस्य विविधमुखानां विषये फलादेश: मार्ग-दर्शनं च भवितुम् अर्हति।

२. कुण्डल्याधारेण इव हस्त-रेखाधारेण अपि एतादृश-विषयेषु फलादेश: जीवन-यात्रा-विषये मार्गदर्शनं च भवितुम् अर्हति।

३. रमल-शास्त्रस्य साहाय्येन कुण्डलीं विना अपि पाशकै: एव मानव-जीवने उपस्थितानां प्रश्नानां निराकरणं भवितुम् अर्हति।

४. वास्तु-शास्त्राधारेण वयं अस्मत्कृते सद्भाग्य-प्रदानाम्, ऊर्जा-प्रदानां, स्वास्थ्य-प्रदानां च गृह-कार्यालय-देवालयादि-भवनानां निर्माणं कर्तुं शक्नुमः।

५. ज्योतिष-शास्त्राधारेण मनुष्याणाम् इव कस्यचित् स्थान-विशेषस्य अपि कुण्डली निर्मातुं शक्यते। तद्द्वारा तस्मिन् देशे वृष्टि-महामारी-भूकम्प-उल्का-पातादीनाम् आधिभौतिक-आधिदैविक-आध्यात्मिक-स्थितीनां परिज्ञानं भवितुम् अर्हति।

६. सूर्य-ग्रहणादीनाम् आकाशीय-स्थितीनां ज्ञानम् अपि ज्योतिष-शास्त्रेण भवति।

७. आकाशे ग्रह-नक्षत्राणां स्थित्याधारेण विविधानां संस्काराणां कृते, व्रत-पर्व-उत्सवादीनां कृते, कृषि-कार्यारम्भाय, यात्रायै च शुभाशुभ-मुहूर्तानां निर्धारणं भवितुम् अर्हति।

### १४. ज्योतिष-शास्त्राध्ययनस्य धनार्जन-दृष्ट्या-प्रयोजनानि कानि?

'स्वस्य भाग्यानुरूपाः आचाराः के?' इति ज्ञातुं सर्वोऽपि लोक उत्सुकः। ज्योतिष-शास्त्रस्य गभीराध्ययनस्य बलेन यथावत् फलादेशं कर्तुं क्षमः जनः यथेष्टं धनम् अर्जयितुं शक्नोति। अतः एव ज्योतिर्विद्या 'अर्थकरी विद्या' उच्यते। ज्योतिष-ज्ञाता 'दैवज्ञः' इति उच्यते। दैवज्ञाः एतैः प्रकारैः धनोपार्जनं कर्तुं प्रभवन्ति –

१. कुण्डली-निर्माण-द्वारा

२. कुण्डल्याधारेण फलादेश-द्वारा

३. ज्योतिष-परामर्श-केन्द्र-सञ्चालनेन

४. विवाह-सन्दर्भे ग्रह-नक्षत्रादि-मेलापनेन

५. वास्तु-परामर्श-द्वारा

६. हस्त-रेखा-परीक्षण-द्वारा इत्यादि।

भास्कराचार्यः कथयति, "यो ज्योतिषं वेत्ति नरः स सम्यग् धर्मार्थ-कामान् लभते यशश्च" इति।

## ३. पञ्चाङ्ग-परिचयः

### १५. किं नाम पञ्चाङ्गम्?

काल-ज्ञानं ज्योतिष-शास्त्रेण एव भवति। ज्योतिष-शास्त्रस्य काल-विवेचनात्मक-स्वरूपं पञ्चाङ्गम् अस्ति।

**१६. पञ्चाङ्गस्य पञ्च अङ्गानि कानि?**

पञ्चाङ्गस्य पञ्च अङ्गानि यथा - १.तिथिः, २.वारः, ३.नक्षत्रम्, ४.योगः, ५.करणं चेति। उक्तम् अपि -

तिथिर्वारनक्षत्रे योगः करणमेव च।
इति पञ्चाङ्गमाख्यातं व्रतपर्वनिदर्शकम्॥

**१७. का नाम तिथिः?**

भ्रमण-वशात् यदा सूर्य-चन्द्रयोः अन्तरं द्वादशांश-तुल्यं भवति तदा एका तिथिः भवति। वस्तुतः तिथिः एकं चान्द्रं दिनं भवति। मासे शुक्ल-पक्षः, कृष्ण-पक्षः चेति द्वौ पक्षौ भवतः। प्रत्येकं पक्षे १५ तिथयः भवन्ति। तिथीनां नामानि यथा -

प्रतिपदा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी, अष्टमी, नवमी, दशमी, एकादशी, द्वादशी, त्रयोदशी, चतुर्दशी, पूर्णिमा, अमावस्या च।

तिथीनां नन्दादि-संज्ञाः इत्थं भवन्ति –

| **संज्ञा** | **तिथयः** | | |
|---|---|---|---|
| नन्दा | १ | ६ | ११ |
| भद्रा | २ | ७ | १२ |
| जया | ३ | ८ | १३ |
| रिक्ता | ४ | ९ | १४ |
| पूर्णा | ५ | १० | १५ |

**१८. कः नाम वारः?**

एकस्मात् सूर्योदयात् अपर-सूर्योदय-पर्यन्तकः कालः एकं 'सावन-दिनम्' इति उच्यते। लोके सावन-दिनम् एव 'वारः' अथवा 'वासरः' इति शब्देन परिचीयते। सप्त वाराः भवन्ति। तेषां नामानि यथा - १. रवि-वासरः / भानु-वासरः, २. सोम-वासरः / चन्द्र-वासरः,३. मङ्गल-वासरः / भौम-वासरः, ४. बुध-वासरः, ५. गुरु-वासरः / बृहस्पति-वासरः, ६. शुक्र-वासरः / भृगु-वासरः ७. शनि-वासरः / मन्दवासरः।

दिनारम्भे प्रथम-होराया अधिपतिः ग्रहः एव 'दिनाधिपतिः' भवति। तस्य एव नाम्ना तत्-तद्-वासरस्य नाम निर्धारितः वर्तते। उदाहरणार्थं रवि-वासरस्य प्रथम-होराया अधिपतिः सूर्यः। अतः तस्य दिनस्य नाम रविवासरः इति जातम्। आकाशे ग्रहाणां कक्षा-क्रमः एव होरा-निर्धारणस्य आधारः अस्ति।

### १९. किं नाम नक्षत्रम्?

आकाशे वर्तमानानां तारकाणां समूहः 'नक्षत्रम्' इति उच्यते। राशि-मण्डलस्य तुल्याः द्वादश-विभागाः क्रियन्ते। ते एव 'द्वादश राशयः' इति उच्यन्ते। अस्य राशि-मण्डलस्य एव तुल्याः सप्तविंशतिः विभागाः सप्तविंशतिः नक्षत्राणि इति उच्यन्ते। एतेषु सप्तविंशत्यां विभागेषु प्रतिविभागं यावन्तः तारकाः आयान्ति तेषां समूहः एव 'नक्षत्रम्' इति उच्यते। एतेषां तारकाणां रेखाभिः योजनेन या आकृतिः उत्पद्यते तदनुसारेण तस्य तस्य नक्षत्रस्य नाम आचार्यैः निर्धारितम्। नक्षत्राणां नामानि इत्थं सन्ति –

| | | | |
|---|---|---|---|
| अश्विनी | भरणी | कृत्तिका | रोहिणी |
| मृगशिरा | आर्द्रा | पुनर्वसुः | पुष्यम् |
| आश्लेषा | मघा | पूर्वा-फाल्गुनी | उत्तरा-फाल्गुनी |
| हस्तः | चित्रा | स्वाती | विशाखा |
| उत्तराषाढा | श्रवणः | धनिष्ठा | शतभिषक् |
| अनुराधा | ज्येष्ठा | मूलम् | पूर्वाषाढा |
| पूर्वा-भाद्रपद् | उत्तरा-भाद्रपद् | रेवती | |

वस्तुतः अभिजित्-नक्षत्रं स्वतन्त्रं नक्षत्रं नास्ति। उत्तराषाढ-श्रवणयोः मध्ये अभिजित्-नक्षत्रस्य परिकल्पना क्रियते।

### २०. कः नाम योगः?

सूर्य-चन्द्रयोः गति-योगः एव 'योगः' इति उच्यते। योगाः पिण्डाकाराः न भवन्ति, अर्थात् एतेषाम् आकृतयः न भवन्ति। अनयोः गति-योगेन २७ योगाः उत्पद्यन्ते। योगानां नामानि यथा –

| | | | |
|---|---|---|---|
| १. विष्कुम्भः | २. प्रीतिः | ३. आयुष्मान् | ४. सौभाग्यः |
| ५. शोभनः | ६. अतिगण्डः | ७. सुकर्मा | ८. धृतिः |
| ९. शूलः | १०. गण्डः | ११. वृद्धिः | १२. ध्रुवः |
| १३. व्याघातः | १४. हर्षणः | १५. वज्रः | १६. सिद्धिः |
| १७. व्यतिपातः | १८. वरीयान् | १९. परिघः | २०. शिवः |
| २१. सिद्धः | २२. साध्यः | २३. शुभः | २४. शुक्लः |
| २५. ब्रह्म | २६. इन्द्रः | २७. वैधृतिः | |

### २१. किं नाम करणम्?

'तिथ्यर्धं करणम्' इति उच्यते। तन्नाम तिथेः अर्धः भागः 'करणम्' इति उच्यते। इत्थम् एकस्यां तिथौ द्वे करणे भवतः। अतः एकस्मिन् मासे ६० करणानि भवन्ति। करणानि द्विविधानि भवन्ति- १. चर-करणम्, २. स्थिर-करणं च। करणानां नामानि यथा -

**चर-करणानि** -

१. बवः, २. बालवः, ३. कौलवः, ४. तैतिलः, ५. गरः, ६.वणिजः, ७. विष्टिः / भद्रा च।

**स्थिर-करणानि** -

१. शकुनिः, २. चतुष्पद्, ३. नागः, ४. किंस्तुघ्नः च

## ४. मुहूर्त-विचारः

### २२. कः नाम मुहूर्तः?

कस्य अपि कार्यस्य कृते आचार्यैः निर्दिष्टः कालः एव 'मुहूर्तः' इति उच्यते। कार्यस्य सुचारुतया सम्पादनाय शुभ-मुहूर्तः द्रष्टव्यः भवति। प्रायशः सर्वेषां संस्काराणां, तन्निमित्तक-कर्मणां च कृते शुभ-मुहूर्ताः निर्धारिताः वर्तन्ते। अस्मिन् सन्दर्भे कतिपय-सङ्कल्पनाः पश्यामः -

**भद्राविचारः** -

'भद्रा' एकं चर-करणम् अस्ति। भद्रा-कालः यात्रादिषु नैकेषु कार्येषु अशुभ-कारकः भवति। चन्द्रस्य राश्यनुसारं भद्रायाः निवास-स्थानस्य बोधः भवितुम् अर्हति। राश्याधारेण भद्रा मर्त्य-लोके, पाताल-लोके, स्वर्ग-लोके वा निवसति।

यदा चन्द्रः कर्क-सिंह-कुम्भ-मीनराशिषु स्थितः स्यात् तदा भद्रायाः निवासः स्वर्ग-लोके भवति। यदा चन्द्रः मेष-वृष-मिथुन-वृश्चिक-राशिषु स्थितः स्यात् तदा भद्रायाः निवासः मृत्यु-लोके भवति। यदा चन्द्रः कन्या-तुला-धनुर्-मकर-राशिषु स्थितः स्यात् तदा भद्रायाः निवासः पाताल-लोके भवति।

यद्यपि भद्राकालः अशुभः एव भवति तथापि आवश्यक-कार्ये एतस्य कालस्य फलस्य विवेचनं इत्थम् उपलभ्यते ज्योतिष-शास्त्रे -

स्वर्गे भद्रा शुभं कुर्यात् पाताले च धनागमः।
मृत्युलोके यदा भद्रा सर्वकार्यं विनश्यति॥ इति।

**अग्निवास-विचारः** -

यज्ञ-होमादि-काले अग्नि-वास-ज्ञानस्य आवश्यकता भवति। हवन-काले अग्नि-वासः यदा भूमौ भवति तदा शुभ-कारकः भवति। पृथ्वी-पातालयोः अग्निवासः कष्ट-दायकः भवति। होम-काले 'अग्निवासःकुत्रअस्ति?' इतिपरिज्ञानस्यअयंविधिःवर्तते-

१. शुक्ल-पक्षात् आरभ्य वर्तमान-तिथेः संख्या गणनीया, तत्र च १ इति अङ्कः योजनीयः,
२. वर्तमान-वारस्य संख्या गणनीया,
३. उपर्युक्तयोः द्वयोः संख्ययोः योगः करणीयः,
४. एवंप्राप्तायाःसंख्याःचतुर्भिःभागःकरणीयः,
५. एवं कृते या संख्याशेषत्वेन लभ्यते सा द्रष्टव्या।

यदि शेषः ३ अथवा ० स्यात् तदा अग्निवासः भूमौ अस्ति इति मन्तव्यम्। एतस्य फलं सुखदायकं भवति। यदा २ इति संख्या शेषत्वेन लभ्यते तदा अग्निवासः आकाशे अस्ति इति मन्तव्यम्। अस्मिन् काले यदि होमः क्रियते तर्हि कष्टं प्राप्यते। यदि १ इति संख्या शेषत्वेन लभ्यते तर्हि अग्निवासः पाताले अस्ति इति मन्तव्यम्। अस्मिन् काले होमः क्रियते चेत् धन-हानिः भवति। यथोक्तम्-

सैका तिथिर्वारयुता कृताप्ता शेषे गुणेऽभ्रे भुवि वह्निवासः।
सौख्याय होमे शशियुग्मशेषे प्राणार्थनाशौ दिवि भूतले च॥

उदाहरणम् -

कृष्ण-पक्षस्य पञ्चम्यां तिथौ रविवासरे अग्निवासः कुत्र अस्ति इति ज्ञातव्यं चेत् –

१. कृष्ण-पक्षस्य पञ्चमी तिथिः (१५+५) = २० + १ = २१

२. रविवासरः प्रथमः वासरः = १

३. उपरि लब्धयोः संख्ययोः योगः = २१+१ = २२

४. २२ इत्यस्याः संख्यायाः ४ इत्यनेन भागः = २२/४ = लब्धिः = ५,

५. शेषः = २।

अस्य अर्थः यत् अग्निवासः उक्त-काले आकाशे अस्ति। होमाय एषः कालः न अनुकूलः।

## २३. वस्तूनां क्रय-विक्रयाय समुचिताः मुहूर्ताः के?

व्यापार-क्षेत्रे क्रय-विक्रय-मुहूर्तानाम् अतीव महत्त्वं वर्तते। शुभवाराः, शुभतिथयः, अश्विनी, स्वाती, श्रवणा, चित्रा चैतानि नक्षत्राणि वस्तुनः क्रयकार्ये शुभानि भवन्ति। येषु नक्षत्रेषु क्रय-कार्यं स्यात् तेषु विक्रय-कार्यं न करणीयम्। येषु नक्षत्रेषु विक्रय-कार्यं स्यात् तेषु क्रय-कार्यं निषिद्धं भवति। तद् उक्तम् -

क्रयर्क्षे विक्रयो नेष्टो विक्रयर्क्षेक्रयोऽपि न।
पौष्णाम्बुपाश्विनीवातश्रवश्चित्राः क्रये शुभा॥

## २४. सेवा-कार्य-प्रारम्भाय समुचिताः मुहूर्ताः के?

यदि जनः शुभ-मुहूर्ते सेवा-कार्ये प्रवृत्तः भवेत् तर्हि धन-धान्यस्य वृद्धिः भवति। सेवकः राज-प्रियः भवति। सेवा-प्रवृत्ति-समये अश्विनी, हस्तः, पुष्यम्, चित्रा, अनुराधा, रेवती, क्षिप्रः, मित्रः चैतानि नक्षत्राणि, रवि-शुक्र-बुध-गुरु-वासराः शुभाः भवन्ति। ग्रह-विचार-क्रमे शुभ-ग्रहाः लग्ने स्थिताः स्युः। यदि दशम-एकादश स्थानयोः मंगल-सूर्यौ स्याताम्, स्वामि-सेवकयोः राशि-मैत्री, योनि-मैत्री च स्यात् तर्हि सेवा-कार्यस्य प्रारम्भः लाभ-दायकः भवति। उक्तं च -

क्षिप्रे मैत्रे वित्सितार्केज्यवारे सौम्ये लग्नेऽर्के कुजे वा खलाभे।
योनेर्मैत्र्यां राशिपोश्चापि मैत्र्यां सेवा कार्या स्वामिनः सेवकेन॥

## २५. यात्रारम्भाय समुचिताः मुहूर्ताः के?

यदि निर्धारित-काले जनः यात्रां करोति तर्हि अवश्यम् एव कार्य-सिद्धिः भवति। यात्रायां शुभ-तिथि-नक्षत्रादीनां विधानम् इत्थं वर्तते –

| | |
|---|---|
| शुभ-तिथयः - | १, २, ३, ५, ७, १०, ११, १३ |
| शुभ-नक्षत्राणि - | अश्विनी, पुनर्वसु, अनुराधा, मृगशिरा, पुष्यम् रेवती, हस्तः श्रवणः, धनिष्ठा |

## २६. कः नाम दिक्शूलः?

ज्योतिष-शास्त्रे आचार्यैः तत्-तद्-दिशि गमनाया विशिष्टाः वासराः निर्धारिताः सन्ति। दिक्शूलः नाम नियतेषु वासरेषु नियत-दिशि गमनस्य निषेधः। दिक्शूले यदि यात्रा क्रियते तर्हि कार्यस्य सिद्धिः न भवति, यात्रायां विघ्नाः च आयान्ति। दिक्शूल-विचार-क्रमे पूर्व-दिशि शनि-सोम-वासरयोः दिक्शूलः भवति, अतः अनयोः वासरयोः पूर्व-दिशि यात्रा न कर्तव्या। अधस्तन-कोष्ठकस्य साहाय्येन दिक्शूलं ज्ञातुं शक्नुमः –

<table>
<tr><td>ईशान-कोणः</td><td colspan="3">पूर्वा दिक्</td><td>आग्नेय -कोणः</td></tr>
<tr><td rowspan="3">उत्तरा दिक्</td><td>बुध-शनि-वासरौ</td><td>शनि-सोम-वासरौ</td><td>गुरु-सोम-वासरौ</td><td rowspan="3">दक्षिणा दिक्</td></tr>
<tr><td>बुध-मङ्गल-वासरौ</td><td>दिक्शूलः</td><td>गुरु-वासरः</td></tr>
<tr><td>मङ्गल-वासरः</td><td>रवि-शुक्र-वासरौ</td><td>रवि-शुक्र-वासरौ</td></tr>
<tr><td>वायव्य-कोणः</td><td colspan="3">पश्चिमा दिक्</td><td>नैर्ऋत्य -कोणः</td></tr>
</table>

## २७. गर्भाधानाय समुचिताः मुहूर्ताः के?

अस्माकं षोडश-संस्कारेषु गर्भाधान-संस्कारः प्रथमः संस्कारः वर्तते। यदा निर्दिष्ट-काले सन्तति-कामनया स्वस्था स्त्री गर्भ-धारणं कुर्यात् तदा आधानतः जन्मपर्यन्तम् सन्ततेः अनिष्टस्य नाशः भवति, तथा च गुण-युक्तस्य पुत्रस्य/पुत्र्याः वा प्राप्तिः भवति।

- गर्भ-धारणे वर्ज्य-तिथयः - ६ , ८, १५, ३०, ४, ९, १४ च।
- वर्ज्य-समयः - प्रातःकालः, सायङ्कालः, रजोदर्शनात् चत्वारि दिनानि
- वर्ज्य-वासराः - रविः, मङ्गलः, शनिः, पित्रोः श्राद्ध-दिने
- शुभ-नक्षत्राणि - मृगशिरा, हस्तः, त्र्युत्तरा, अनुराधा, रोहिणी, स्वाती, श्रवणः, धनिष्ठा, शतभिषक्
- अन्ये वर्ज्याः - सङ्क्रान्ति-कालः, त्रिविधं गण्डान्तम्, व्यतिपात-वैधृति-योगौ, त्रयः उत्पाताः, जन्म-राशिः,जन्म-नक्षत्रम्, जन्म-लग्नम्।

उक्तं च - भद्राषष्ठीपर्वरिक्ताश्च सन्ध्याभौमार्कीणाद्यरात्रीश्चतस्रः।
गर्भाधानं त्र्युत्तरेन्द्वर्कमैत्रब्राह्मस्वातीविष्णुवस्वम्बुपे सत्॥

## २८. विवाह-संस्काराय समुचिताः मुहूर्ताः के?

- विवाहे शुभ-मासाः - फाल्गुनः, माघः, मार्गशीर्षः, आषाढः, ज्येष्ठः, वैशाखः
- शुभ-नक्षत्राणि - रेवती, उत्तरा-फाल्गुनि, उत्तराषाढा, उत्तरा-भाद्रपद, रोहिणी, मृगशिरा, मघा, मूलम्, अनुराधा, हस्तः, स्वाती
- शुभ-लग्नानि - कन्या, तुला, मिथुनं च
- शुभ-तिथयः - १, २, ३, ५, ६, ७, ८, १०, ११, १२, १३, पूर्णिमा
- शुभ-वाराः - सोमवारः, बुधवारः, गुरुवारः, शुक्रवारश्च

प्रसङ्गे अस्मिन् उक्तं यत् -

रेवत्युत्तररोहिणीमृगमघामूलानुराधाकर-
स्वातीषु प्रमदातुला मिथुनके लग्ने विवाहः शुभः।
मासाः फाल्गुनमाघमार्गशुचयो ज्येष्ठस्तथा माधवः

शस्ताः सौम्यदिनं तथैव तिथयो रिक्ताकुहूवर्जिताः॥

## २९. विवाह-सन्दर्भे षट्त्रिंशत् गुणाः के?

विवाह-संस्कारे दाम्पत्य-सुख-प्राप्त्यर्थं अष्ट-कूटानां, तन्नाम ३६ गुणानां परिकल्पना आचार्यैः कृता। विवाह-मेलापके वर-कन्ययोः अष्ट-कूटानां मेलापनं भवति। एतेषाम् अष्ट-कूटानां योगः ३६ भवति। अष्ट-कूटानां अङ्क-मानानि क्रमशः एकादिगुणाधिकानि भवन्ति। अत्र सारिणी-द्वारा तद् एव ज्ञाप्यते-

अष्ट-कूटाः यथा –

| क्रमाः | अष्ट-कूट-नामानि | अङ्क-मानानि |
|---|---|---|
| १ | वर्णः | १ |
| २ | वश्यः | २ |
| ३ | तारा | ३ |
| ४ | योनिः | ४ |
| ५ | ग्रह-मैत्रकम् | ५ |
| ६ | गण-मैत्रकम् | ६ |
| ७ | भकूटः | ७ |
| ८ | नाडी | ८ |
| | आहत्य गुणाः - | ३६ |

उक्तं च - वर्णो वश्यं तथा तारा योनिश्च ग्रहमैत्रकम्।
गणमैत्रं भकूटं च नाडी चैते गुणाधिका:॥

अष्ट-कूट-मेलापके वर-कन्ययोः अष्ट-कूट-मेलापक-मानं १६ गुणेभ्यः न्यूनं स्यात् चेत् तयोः विवाहः श्रेयस्करः न भवति। इतः अधिकं मानं शुभ-कारकं भवति।


## ३०. विवाह-सन्दर्भे माङ्गलिक-योगः कः?

यदा जन्माङ्क-चक्रे राशि-चक्रे वा मङ्गलः १, ४, ७, ८, १२ भावेषु कस्मिंश्चित् भावे स्यात् तदा माङ्गलिक-योगः भवति। अयं योगः यदि वरस्य कुण्डल्यां भवति तर्हि कन्यायाः कृते

अनिष्टकरः सिद्ध्यति, यदि कन्यायाः कुण्डल्यां भवति तर्हि वरस्य कृते अनिष्टकरः भवति। उक्तं च -

लग्ने व्यये च पाताले जामित्रे चाऽष्टमे कुजे।
कन्या भर्तुर्विनाशाय भर्ता पत्नीविनाशकृत्॥

अधस्तन-जन्माङ्क-चक्रेण इदमेव स्पष्टीक्रियते –




यदा द्वयोः जन्म-कुण्डल्योः माङ्गलिक-योगः स्यात् तदा सः शुभ-कारकः भवति। अतः एव माङ्गलिक-योग-युक्तायाः कन्यायाः विवाहः माङ्गलिक-योग-युक्तेन वरेण सह कर्तव्यः।

**३१. वास्तु-कर्मणः कृते उचिताः मुहूर्ताः के?**

रोहिण्यां श्रवणत्रयेऽदितियुगे हस्तत्रये मूलके
रेवत्युत्तरफाल्गुनीन्दुतुरगे मित्रोत्तराषाढयोः।
शस्तं वास्तु कुजार्कवर्ज्जितदिने गोकुम्भसिंहे झषे
कन्यायां मिथुने नभः शुचिसहोराधोर्ज्जके फाल्गुने॥

इत्यादिना पद्येन उक्तं यत् -

१. रोहिणी, श्रवणः, धनिष्ठा, शत-भिषक्, पुनर्वसुः, पुष्यम्, हस्तः, चित्रा, स्वाती, मूलम्, रेवती, उत्तरा-फाल्गुनी, मृगशिरा, अश्विनी, अनुराधा, उत्तराषाढा चैतानि नक्षत्राणि,

२. सूर्य-मङ्गल-वासरौ परित्यज्य अन्ये वाराः,

३. वृषः मिथुनः, सिंहः, कन्या,मीनः चैतानि लग्नानि,

४. श्रवणः, आषाढः, मार्गशीर्षः, वैशाखः, कार्तिकः, फाल्गुनः चेति मासाः च वास्तु-कर्मणः कृते शुभाः सन्ति।

**३२. गृह-प्रवेशाय उचिताः मुहूर्ताः के?**

नूतन-गृहे प्रवेशाय शुभाशुभ-मुहूर्तानां विषये ज्योतिषाचार्याः इत्थं वदन्ति -

श्लेषा चैव विशाखया सह मघा पूर्वात्रयं याम्यभं
रिक्तां सूर्यकुजौ विहाय च कुहू वेश्मप्रवेशः शुभः।
गोसिंहालिघटास्तथैव धवलः पक्षः प्रशस्तोऽधिको
कन्यामन्मथचापमीनरहिता मासास्तु वास्तूदिताः॥

इत्यादिना -

१. आश्लेषा, विशाखा, मघा, पूर्वा-फाल्गुनी, पूर्वाषाढा, पूर्वा-भाद्रपद्, भरणी चैतानि नक्षत्राणि,

२. अमावस्या तथैव च रिक्ताः तिथीः विहाय शेषाः तिथयः,

३. सूर्य-मङ्गलौ परित्यज्य अन्ये वासराः,

४. वृषः, सिंहः, वृश्चिकः, कुम्भः चैतानि लग्नानि,

५. आश्विन-मासस्य शुक्लपक्षः, आषाढ-मासः, पौषः, चैत्रः चैतान् मासान् विहाय अन्ये मासाः च  गृह-प्रवेशाय शुभाः भवन्ति।

## ५. राशिपरिचयः

**३३. कः नाम राशिः?**

यस्मिन् चक्रे सूर्यः भ्रमति तत् 'राशि-चक्रम्' इति उच्यते। राशि-मण्डलस्य द्वादश विभागाः एव द्वादश 'राशयः' उच्यन्ते। राशीनां नामानि यथा -

१. मेषः, २. वृषः, ३. मिथुनः, ४. कर्कः, ५. सिंहः, ६. कन्या, ७. तुला, ८. वृश्चिकः, ९. धनुः, १०. मकरः, ११. कुम्भः, १२. मीनः।




*राशि-मण्डलम्*

**३४. नक्षत्रानुसारं राशीनां निर्माणं कथं भवति?**

एकस्मिन् नक्षत्रे चत्वार: चरणा: भवन्ति। इत्थं सप्तविंशते: नक्षत्राणां २७X४ = १०८ चरणा: भवन्ति। एक: राशि: नव-चरणात्मक: भवति। इत्थं सप्तविंशते: नक्षत्राणां प्रत्येकं चतुर्षु चरणेषु तन्नाम आहत्य १०८ चरणेषु १०८ ÷ ९ = १२ राशय: निर्मिता: भवन्ति। चरणानां सम्बन्ध: अक्षरै: योजित: अस्ति आचार्यै:। प्राय: जातस्य  नाम तस्य जन्मन: समये प्रवर्तमानस्य राशे: आधारेण इत्थं क्रियते -

| **क्रम:** | **नक्षत्रम्** | **चरणानि** | **चरणानां संख्या** | **राशि:** |
|---|---|---|---|---|
| १ | अश्विनी | चू,चे, चो, ला | ४ | मेष: |
| २ | भरणी | ली,लू,ले, लो | ४ | |
| ३ | कृतिका | अ | १ =९ | |
| ३ | कृतिका | इ,उ,ए | ३ | वृष: |
| ४ | रोहिणी | ओ,वा,वी,वू | ४ | |
| ५ | मृगशिरा | वे,वो | २ = ९ | |

| | | | | |
|---|---|---|---|---|
| ५ | मृगशिरा | का,की | २ | मिथुनः |
| ६ | आर्द्रा | कु, घ,ङ छ | ४ | |
| ७ | पुनर्वसुः | के,को,हा, | ३ =९ | |
| ७ | पुनर्वसुः | ही | १ | कर्कः |
| ८ | पुष्यम् | हू,हे, हो,डा | ४ | |
| ९ | आश्लेषा | डी,डू,डे,डो | ४ =९ | |
| १० | मघा | मा, मी, मू, मे | ४ | सिंहः |
| ११ | पूर्वा-फाल्गुनी | मो, टा,टी,टू | ४ | |
| १२ | उत्तरा-फाल्गुनी | टे | १ =९ | |
| १२ | उत्तरा-फाल्गुनी | टो,पा,पी | ३ | कन्या |
| १३ | हस्तः | पू, ष, ड़,ठ | ४ | |
| १४ | चित्रा | पे,पो | २ =९ | |
| १४ | चित्रा | रा, री | २ | तुला |
| १५ | स्वाती | रु,रे,रो,ता | ४ | |
| १६ | विशाखा | ती.तू,ते, | ३ =९ | |
| १६ | विशाखा | तो | १ | वृश्चिकः |
| १७ | अनुराधा | ना,नी,नू.ने | ४ | |
| १८ | ज्येष्ठा | नो,या,यी,यू | ४ =९ | |
| १९ | मूलम् | ये,यो,भा,भी | ४ | धनुः |
| २० | पूर्वाषाढा | भू,धा,फा.ढा | ४ | |
| २१ | उत्तराषाढा | भे, | १ =९ | |

| | | | | |
|---|---|---|---|---|
| २१ | उत्तराषाढा | भो,जा,जी | ३ | मकरः |
| २२ | श्रवणः | खी,खू,खे,खो | ४ | |
| २३ | धनिष्ठा | गा,गी | २ =९ | |
| २३ | धनिष्ठा | गू,गे | २ | कुम्भः |
| २४ | शतभिषा | गो,सा,सी,सू | ४ | |
| २५ | पूर्वा-भाद्रपद् | से, सो,दा, | ३ =९ | |
| २५ | पूर्वा-भाद्रपद् | दी | १ | मीनः |
| २६ | उत्तरा-भाद्रपद् | दू,थ,झ,ञ | ४ | |
| २७ | रेवती | दे,दो,चा,ची | ४ =९ | |

अस्य ह्रस्व-दीर्घयोः भेदः न गणनीयः। एतदाधारेण एव यदि जातकस्य नाम 'जगदीशः' इति अस्ति, तर्हि तस्य राशिः 'मकरः' इति ज्ञातुं शक्नुमः।


**३५. इदानीं वयं कालपुरुषस्य मेषादि-राशि-पूर्कम् अङ्ग-विभागं पश्यामः -**

मेषादि-राशीन् काल-पुरुषस्य अङ्ग-रूपेण ज्योतिषाचार्याः कल्पितवन्तः। कः राशिः काल-पुरुषस्य किम् अङ्गम् इति अधस्तन-कोष्ठके पश्यामः –

| **राशिः** | **काल-पुरुषस्य अङ्गम्** |
|---|---|
| मेषः | शिरः |
| वृषः | मुखम् |
| मिथुनः | हस्तौ |
| कर्कः | हृदयम् |
| सिंहः | उदरम् |
| कन्या | कटिः |
| तुला | वस्तिः |

| | |
|---|---|
| वृश्चिकः | गुह्यम् |
| धनुः | ऊरुः |
| मकरः | जानु |
| कुम्भः | जङ्घे |
| मीनः | चरणौ |

## मेषादिराशिपूर्वकं कालपुरुषस्य अङ्गविभागः




मानव-शरीरस्य येन अङ्गेन सम्बद्धः राशिः अशुभ-ग्रहाक्रान्तः भवति तस्मिन् अङ्गे रोग-व्रणादिकस्य सम्भावनाः भवन्ति।

३६. **कस्य राशेः कः वर्णः, कः च स्वामी ज्योतिषाचार्यैः कल्पितः इति अधुना पश्यामः –**

अत्र 'वर्ण'-शब्दस्य द्वौ अर्थौ - १. रक्तादयः वर्णाः, २. ब्राह्मणादयः वर्णाः च। राशि-सम्बद्धानां वर्णानां ज्ञानेन व्यक्तेः/वस्तुनः स्वरूपस्य, (ब्राह्मणादि) वर्णस्य वा निर्धारणं कर्तुं शक्यते। राशि-स्वामिनां ज्ञानेन व्यक्तेः / वस्तुनः स्वभाव-निर्धारणं कर्तुं शक्यते। अधस्तन-कोष्ठके राशि-सम्बद्धाः वर्णाः, स्वामिनः च उल्लिखिताः वर्तन्ते -

| **राशिः** | **रक्तादि-वर्णः** | **ब्राह्मणादि-वर्णः** | **राशि-स्वामी** |
|---|---|---|---|
| मेषः | अरुणः | क्षत्रीयः | मङ्गलः |
| वृषः | श्वेतः | वैश्यः | शुक्रः |
| मिथुनः | हरितः | शूद्रः | बुधः |
| कर्कः | पाटलः | ब्राह्मणः | चन्द्रः |
| सिंहः | पाण्डुः | क्षत्रीयः | सूर्यः |
| कन्या | विचित्रः (विविधवर्णः) | वैश्यः | बुधः |
| तुला | नीलः | शूद्रः | शुक्रः |
| वृश्चिकः | पिङ्गलः | ब्राह्मणः | मङ्गलः |
| धनुः | काञ्चन-वर्णः | क्षत्रीयः | गुरुः |
| मकरः | शुक्ल-कपिल- मिश्रः | वैश्यः | शनिः |
| कुम्भः | नकुल-वर्णः | शूद्रः | शनिः |
| मीनः | मत्स्य-वर्णः | ब्राह्मणः | गुरुः |

**३७. इदानीं लग्नादि-भावानां संज्ञाः काः इति पश्यामः -**

भावः इत्युक्ते जन्म-कुण्डल्यां निर्धारितं 'स्थानम्'। जन्म-कुण्डल्यां प्रथमः भावः 'लग्नम्' इति उच्यते। जन्म-कुण्डल्यां द्वितीयं स्थानं 'द्वितीयः भावः' इति उच्यते, तृतीयं स्थानं तृतीयःभावः इति उच्यते। एवं क्रमेण जन्म-कुण्डल्यां द्वादश भावाः भवन्ति। मनुष्यस्य जन्मनः समयस्य आधारेण जन्म-कुण्डल्याः निर्माणं भवति।


जन्म-समये पूर्व-क्षितिजे यः राशिः भवति तस्य लेखनं लग्न-भावे क्रियते। ततः अग्रे वर्तमानः राशिः द्वितीय-भावे लिख्यते, तृतीयः राशिः तृतीये भावे लिख्यते। एवं क्रमेण द्वादशसु भावेषु द्वादशानां राशीनां लेखनं भवति। विभिन्न-भावानाम् आधारेण मनुष्यस्य व्यवहारस्य विवेचनम् आचार्याः कृतवन्तः।

तेषु मुख्य-रुपेण प्रथम-भावात् शरीरस्य विचारः भवति, द्वितीय-भावात् धनस्य, तृतीय-भावात् सहोदरस्य (भ्रातृभगिन्योः), चतुर्थ-भावात् मित्रस्य, पञ्चम-भावात् पुत्र-सुखस्य, षष्ठ-भावात् शत्रोः, सप्तम-भावात् भार्यायाः, अष्टम-भावात् मृत्योः विचारः, नवम-भावात् भाग्यस्य, दशम-भावात्

कर्मणः, एकादश-भावात् आयस्य (धनार्जन-स्रोतसः), द्वादश-भावात् व्ययस्य च विचारः भवति। उक्तं च -

तनुधनसहजसुहृत्सुतरिपुजायामृत्युधर्मकर्मायाः।
व्यय इति लग्नाद्भावाश्चतुरस्राख्येष्टमचतुर्थे॥

अधस्तन-जन्माङ्क-चक्रेण इदम् एव स्पष्टीक्रियते -





उपरि उक्तेभ्यः विषयेभ्यः अन्येषाम् अपि विषयाणां चिन्तनं विभिन्नानां भावानाम् आधारेण क्रियते। तेषां कोष्ठकम् अत्र प्रस्तूयते -

| **भावः** | **विषयाः** |
|---|---|
| प्रथम-भावः | स्वभावः |
| द्वितीय-भावः | कुटुम्बम्, वाणी, दक्षिण-नेत्रम् |
| तृतीय-भावः | पराक्रमः, शौर्यम्, दक्षिण-कर्णः |
| चतुर्थ-भावः | मातृ-सुखम्, यानम्, भूमिः, गृहम्, सम्बन्धिनः |
| पञ्चम-भावः | विद्या, बुद्धिः |
| षष्ठ-भावः | रोगः, मातृपक्षीयाः सम्बन्धिनः |

| | |
|---|---|
| सप्तम-भावः | कामः |
| अष्टम-भावः | पैतृक-सम्पत्तिः, आयुः |
| नवम-भावः | भाग्यम्, तपः, गुरुः |
| दशम-भावः | पितृ-सुखम्, सामाजिक-प्रतिष्ठा |
| एकादश-भावः | वाम-कर्णः,गुप्त-धनस्य प्राप्तिः |
| द्वादश-भावः | वाम-नेत्रम्, सामाजिक-प्रतिष्ठा |

**३८. अधुना भाव-समूहानां संज्ञाः जानीमः –**

लग्न-चतुर्थ-सप्तम-अष्टम-भावानां 'केन्द्र'-संज्ञा भवति। पञ्चम-नवमयोः भावयोः 'त्रिकोण'-संज्ञा भवति। षष्ठ-अष्टम-द्वादश-भावानां 'त्रिक'-संज्ञा भवति। द्वितीय-पञ्चम-अष्टम-एकादश-भावानां 'पणफर'-संज्ञा भवति। तृतीय-षष्ठ-द्वादश-भावानाम् 'आपोक्लिम्' इति संज्ञा भवति। तृतीय-षष्ठ-एकादश-भावानां 'त्रिषडायः' इति संज्ञा भवति। एतदेव अधः जन्माङ्क-चक्रेण प्रदर्श्यते –




**३९. अधुना 'षड्वर्गः' इत्युक्ते किम् इति पश्यामः –**

भाव-फलानां सम्यक्तया विवेचनार्थं राशीनां षोडश-वर्गानां परिकल्पना आचार्याः कृतवन्तः। तेषु प्रायशः षड्-वर्गेभ्यः, सप्त-वर्गेभ्यः वा विचारः भवति। फलादेशः लग्नादि-भावैः सह राशि-वर्गाणां सहाय्येन एव भवितुम् अर्हति। षड्-वर्गाणां नामानि-

१. लग्नम्, २. होरा, ३. द्रेष्काणः, ४. नवमांशः, ५. द्वादशांशः, ६. त्रिशांशः चेति।

अत्र राशेः नवमः भागः नवमांशः, तृतीयः भागः च द्रेष्काणः। इत्थम् षड्-वर्गेषु अन्येषाम् अपि शब्दानाम् अर्थः ज्ञेयः। एकस्यां राशौ ३० अंशाः भवन्ति। अतः एव एकः नवमांशः= ३०/९ = ३° ।२०" भवति।

## ६. ग्रहपरिचयः

### ४०. कः नाम ग्रहः?

ब्रह्माण्डे अस्मिन् बहूनि ज्योतिष्पिण्डानि स्वकक्षासु भ्रमन्ति। परं येषां पिण्डानां प्रभावः अस्माकं जीवने प्रत्यक्षतया भवति तेषाम् एव ग्रह-रुपेण चर्चा आचार्यैः ज्योतिष-शास्त्रे कृता वर्तते। संदर्भे अस्मिन् नव-ग्रहाणां वर्णनं ज्योतिष-शास्त्रे अस्ति। ग्रहाणां नामानि यथा -

१. सूर्यः, २. चन्द्रः, ३. मङ्गलः, ४. बुधः, ५. गुरुः, ६. शुक्रः, ७. शनिः, ८. राहुः, ९. केतुः।

यद्यपि राहु-केतू सूर्य-चन्द्रयोः मण्डलयोः सम्पातयोः भवतः, एतौ स्वतन्त्र-पिण्डे न स्तः, तथापि अनयोः प्रभावः मानव-जीवने भवति अतः एव ग्रहेषु राहु-केत्वोः गणना अपि भवति।

### ४१. ग्रहेषु के ग्रहाः शुभाः, के च अशुभाः?

शुभाशुभाः ग्रहाः स्व-प्रकृत्यनुसारं मानव-जीवने शुभम् अशुभं वा फलं ददति।

शुभ-ग्रहाः - बुधः, गुरुः, शुक्रः, पूर्ण-चन्द्रःचेति।

अशुभ-ग्रहाः - मङ्गलः, सूर्यः, शनिः, राहुः, केतुः चेति।

### ४२. अधुना ग्रहाणां बलाबल-विचारं कुर्मः -

ग्रहाः स्वबलाबलानुसारेण एव स्वकीय-शुभाशुभफलं ददति। षड्भिः प्रकारैः ग्रहाणां बलाबलस्य विचारः क्रियते । अर्थात् ग्रहाणां षड् बलानि भवन्ति तद् इत्थम्-

१. स्थान-बलम्, २. दिग्बलम्, ३. काल-बलम्, ४. चेष्टा-बलम्, ५. नैसर्गिक-बलम् ६. अयन-बलं च ।

यद्यपि ग्रहाणां फलादेशे समेषां बलानां विचारः करणीयः, तथापि अत्र संक्षेपेण केवलं स्थान-बलस्य विवेचनं क्रियते-

ग्रहः यदा स्वगृही, उच्च-राशौ, मूल-त्रिकोणे, मित्र-गृहे, स्वदिने, काले एवं च केद्र-स्थानेषु, त्रिकोणयोः अथवा स्वकीय-वर्गेषु स्यात् तदा सः स्थान-बलयुक्तः भवति। एवं स्थितः ग्रहः अधिक-प्रभावशाली भवति। तद्-विपर्यये ग्रहस्य प्रभावः न्यूनः भवति। उक्तं च -

मित्रक्षेत्रे स्वच्चे स्वहोरायां स्वभवनत्रिकोणे च।
स्वद्रेष्काणे स्वांशे स्वदिने च बलान्विताः सर्वे॥

**४३. ग्रहाणाम् उच्च-नीच-मूलत्रिकोण-संज्ञाः अधुना पश्यामः -**

ग्रहाः स्वस्थिति-वशात् विभिन्नेषु स्थानेषु भिन्नं-भिन्नं फलं ददति। अत्र यदा ग्रहाः उच्चस्थाः भवन्ति तदा पूर्ण-फलं ददति। यदा नीचस्थाः भवन्ति तदा पूर्ण-फलं न ददति। ग्रहाः येषु राशिषु उच्चस्थाः भवन्ति ततः सप्तम-भावस्थाः नीच्चस्थाः भवन्ति। ग्रहस्य स्थानबलस्य ज्ञानाय उच्चादि-स्थान-ज्ञानम् आवश्यकं भवति। तत् च अधस्तन-सरणी-द्वारा स्पष्टीभविष्यति

| **ग्रहः** | **उच्च-राशिः** | **नीच-राशिः** | **मूलत्रिकोण-राशिः** |
|---|---|---|---|
| सूर्यः | मेषः | तुला | सिंहः |
| चन्द्रः | वृषः | वृश्चिकः | वृषः |
| मंगलः | मकरः | कर्कः | मेषः |
| बुधः | कन्या | मीनः | कन्या |
| गुरुः | कर्कः | मकरः | धनुः |
| शुक्रः | मीनः | कन्या | तुला |
| शनिः | तुलाः | मेषः | कुम्भः |
| राहुः | मिथुनः | धनुः | कुम्भः |
| केतुः | धनुः | मिथुनः | सिंहः |

**४४. अधुनाविविध-ग्रह-सम्बद्ध-रस-रत्न-वर्णानां विषये जानीमः -**

अस्माकं जीवने ग्रहाणां प्रभाव-निर्धारणे कटु-अम्लादि-रसज्ञानं, स्वरुप-स्वभावादि-ज्ञानं, वर्णादि-ज्ञानम् च आवश्यकं भवति। ग्रहाणाम् अशुभ-फलस्य परिशमनार्थं रत्न-ज्ञानम् अपि आवश्यकं भवति। अत्र सारणीद्वारा संक्षेपेण तद्-विवरणं प्रस्तूयते -

| ग्रहः | रसः | रत्नम् | रक्तादि-वर्णः | ब्राह्मणादि-वर्णः |
| --- | --- | --- | --- | --- |
| सूर्यः | कटुः | माणिक्यम् | रक्तश्याममिश्रितः | क्षत्रियः |
| चन्द्रः | लवणम् | मुक्ता | श्वेतः | वैश्यः |
| मंगलः | तिक्तम् | प्रवालम् (मूंगा) | रक्तश्वेत-मिश्रितः | क्षत्रियः |
| बुधः | मिश्ररसः | गारुत्मकम् (पन्ना) | हरितः | शुद्रः |
| गुरुः | मधुरम् | पुष्पकम् (पुखराजम्) | गौरः | विप्रः |
| शुक्रः | अम्लम् | वज्रम् (हीरा) | स्वच्छः | विप्रः |
| शनिः | कषायः | नीलम् | कृष्णः | सङ्करः |
| राहुः | ---- | गोमेदकम् | नीलः | अन्त्यजः |
| केतुः | ---- | वैदूर्यम् | विचित्रः | अन्त्यजः |

**४५. अधुनाग्रहाणां दृष्टि-विचारं कुर्मः -**

आकाशे ग्रहाणां परस्पर-दृष्टि-वशात् मानव-जीवने प्रभावः दृश्यते। ग्रहाणां दृष्टि-ज्ञान-वशात् एव शुभाशुभ-फलादेशः कर्तव्यः। प्रत्येकं ग्रहः स्वस्थानात् दशमं, तृतीयं च भावं, ग्रहं च एक-पाद-दृष्ट्या (२५%) पश्यति। पञ्चमे, नवमे च स्थाने द्वि-पाद-दृष्टया (५०%) पश्यति। चतुर्थे, अष्टमे च स्थाने त्रि-पाद-दृष्टया (७५%) पश्यति। सप्तमे स्थाने पूर्ण-दृष्टया (१००%) पश्यति। अत्र केषुचित् ग्रहेषु विशेष-दृष्टिः अपि भवति। एतेषु मङ्गल-शनि-गुरुवः सन्ति। शनिः तृतीये दशमे च स्थाने पूर्ण-दृष्ट्या पश्यति। गुरुः पञ्चमे नवमे च स्थाने पूर्ण-दृष्ट्या पश्यति। मङ्गलः चतुर्थे अष्टमे च स्थाने पूर्ण-दृष्ट्या पश्यति ।

ग्रहाणां दृष्टिः -

| **ग्रहाः** | **एक-पाद-दृष्टिः** | **अर्ध-दृष्टिः** | **त्रि-पाद-दृष्टिः** | **पूर्ण-दृष्टिः** |
| --- | --- | --- | --- | --- |
| सूर्यः, चन्द्रः, बुधः, शुक्रः | ३,१० | ५,९ | ४,८ | ७ |
| मङ्गलः | ३,१० | ५,९ | ----- | ४,८,७ |
| गुरुः | ३,१० | ----- | ४,८ | ५,९,७ |
| शनिः | ----- | ५,९ | ४,८ | ३,१०,७ |

**४६. ग्रहाणां शत्रु-मित्र-विचारम् अधुना कुर्मः -**

सर्वे ग्रहाः यदा मित्र-गृहेषु स्युः तदा प्रबलाः भूत्वा स्व-प्रकृति-जन्य-फलं ददति। यदा च शत्रु-गृहेषु स्युः तदा दुर्बलाः भवन्ति। अत्र संक्षेपेण सारणी-द्वारा इदम् एव बोध्यते –


| **ग्रहाः** | **सूर्यः** | **चन्द्रः** | **मंगलः** | **बुधः** | **गुरुः** | **शुक्रः** | **शनिः** |
|---|---|---|---|---|---|---|---|
| मित्राणि | चं.,मं.,गु. | सू., बु. | सू.,च.,गु. | सू.,शु. | सू.,च.,मं. | बु.,श. | बु.,शु. |
| समाः | बु. | मं.गु.शु.श. | शु.श. | मं.गु.श. | श. | मं.गु. | गु. |
| शत्रवः | शु.श. | ___ | बु. | चं. | बु.शु. | सू.चं. | सू.चं.मं. |

## ७. आजीविका-विचारः


**४७. आजीविका-विषये ज्योतिष-शास्त्रे कः विचारः कृतः वर्तते?**

प्रत्येकं मनुष्यस्य प्रकृतिः, रुचिः, भाग्यं च भिन्नं भवति। यदि मनुष्यः स्वस्य प्रकृत्यनुकूलां, रुच्यनुकूलां, भाग्यानुकूलां च आजीविकां चिनोति तर्हि सम्पत्त्या सह सन्तोषः अपि लभ्यते। अत एव ज्योतिष-शास्त्रे केषां कृते कः व्यवसायः अनुकूलः, लाभ-दायकः च; कः च व्यवसायः प्रतिकूलः इत्यस्मिन् विषये अनेके नियमाः सन्ति। जन्माङ्क-चक्रे सूर्य-चन्द्र-लग्नेषु यः अधिकः बल-युक्तः स्यात् तस्मात् दशम-स्थाने यः राशिः स्यात् तस्य राशीशः नवमांश-चक्रे यस्य ग्रहस्य राशौ स्थितः स्यात् तस्यानुसारेण व्यवसाय-क्षेत्रस्य निर्धारणं कर्तव्यम्। व्यवसाय-निर्धारणं निम्न-लिखितानुसारेण सूर्यादि-ग्रहानुसारं कर्तुं शक्नुमः-

जन्माङ्कचक्रम्




नवमांशचक्रम्



उपरि प्रदर्शिते जन्माङ्के सूर्य-चन्द्र-लग्नेषु लग्नम् अधिकं बल-युक्तम् अस्ति। यतोहि लग्न-भावे वृषराशिः स्वकीयाधिपतिना शुक्रेण युक्तः अस्ति। अत्र लग्न-भावात् दशम-स्थाने मकर-राशिः अस्ति। मकर-राशेः स्वामी शनिः नवमांश-चक्रे मीन-राशौ स्थितः अस्ति। मीन-राशेः स्वामी गुरूः अस्ति। अतः अत्र गुरु-सम्बद्धः व्यवसायः यदा क्रियते तदा लाभदायकः भवति। अत्र ग्रह-जन्य-व्यवसायानां ज्ञानं निम्न-लिखित-रूपेण कर्तुं शक्नुमः -

सूर्यः - तत्र नवमांशेशः यदा सूर्यः स्यात्तदा औषधि-निर्माण-कार्यं, राजनीति-कार्यं, धातु-क्रिया, अधिवक्तृ-कार्यं, ऊष्ण-वस्त्र-व्यवसायः, परामर्शक-कार्यम् इत्यादि यदा क्रियते तदा अत्यधिकः लाभः भवति।

चन्द्रः - तत्र यदा नवांशेशः चन्द्रः स्यात्तदा जल-सम्बन्धि-कार्यं, दुग्ध-सम्बन्धि-कार्यं ( डेरी-कार्यम्) वस्त्रोद्योगः, कृषि-कार्यं, जल-अभियान्त्रिक-कार्यं, नौ-सेनायां कार्यं, इत्यादिकं लाभ-दायकं भवति।

मङ्गलः - अग्नि-सम्बन्धि-कार्यं, विद्युत-कार्यं, सेनायां कार्यं, गुप्त-चर-विभागे कार्यं, भोजनादि-पाक-कार्यम् इत्यादिकं लाभप्रदं भवति।

बुधः - अध्यापन-कार्यं, बैकिंग-कार्यं, अभियान्त्रिक-कार्यं, कुधान्यस्य व्यवसायः इत्यादिकम्

गुरुः - अध्यापकीय-कार्यं, वैदिक-कर्म-काण्डं, पौराणिक-कर्मं, प्रकाशन-कार्यम् इत्यादिकम्

शुक्रः - डेरी-कार्यं, चल-चित्रादिके अभिनय-कार्यं, समस्त-मनोरञ्जनात्मक-कार्यं, कवि-कार्यम् इत्यादिकम्

शनिः - काष्ठ-कार्यं, भृत्यत्वेन कार्यं, कृषि-कार्यं, प्राशासनिक-कार्यम् इत्यादिकम्

इत्थं ज्योतिष-शास्त्रस्य साहाय्येन जनस्य आजीविकायाः निर्धारणं कर्तुं शक्यते।

## ८. रोग-विचारः

**४८. रोग-विषये ज्योतिष-शास्त्रे कः विचारः कृतः वर्तते?**

मानवजीवने रोग-ज्ञानम् अतीव आवश्यकं भवति। ग्रहाणां प्रभाव-वशात् एव शरीरे कफ-पित्त-वातानां विकृतिः जायते। ततः एव रोगस्य उत्पत्तिः भवति। अतः एव केन ग्रहेण कः रोगः भवति इत्यस्य ज्ञानं ज्योतिष-शास्त्रेण प्राप्तुं शक्यते।

जन्म-कुण्डल्यां मुख्य-रुपेण षष्ठ-भावेन, अष्टम-भावेन, द्वादश-भावेन, षष्ठ-भावस्य अधिपति-ग्रह-द्वारा, षष्ठ-भावेन सम्बद्ध-ग्रहद्वारा च रोगस्य ज्ञानं भवति। अत्र संक्षेपेण सूर्यादिभिः ग्रहैः उत्पन्नानां रोगाणां वर्णनं क्रियते। तद्यथा-

सूर्यः - यदा सूर्यः रोग-कारकः स्यात् तदा अस्थि-रोगः, हृदय-रोगः, नेत्र-रोगः , ऊष्ण-ज्वरः, शिरोरोगः, अपस्मार-रोगः ( मिर्गीरोगः), पित्त-जन्य-रोगः वा भवितुम् अर्हति।

चन्द्रः - यदा चन्द्रः रोग-कारकः स्यात् तदा शीत-ज्वरः, पाण्डु-रोगः (कामला), क्षय-रोगः (टी. बी.), नेत्र-रोगः, अनिद्रादि-रोगः च भवितुम् अर्हति।

मङ्गलः - यदा मङ्गलः रोग-कारकः स्यात्तदा पित्त-ज्वरः, व्रणाः, रक्त-विकारः, अर्श-रोगः (पाइल्स), अग्नि-मान्द्यम् इत्यादि-रोगः भवितुम् अर्हति।

बुधः - यदा बुधः रोग-कारकः स्यात् तदा चर्मरोगः, कुष्ठ-रोगः, दुःस्वप्नः, मानसिक-रोगः वा भवति।

गुरुः - यदा गुरुः रोग-कारकः स्यात् तदा कर्ण-रोगः, गुल्म-रोगः, अजीर्ण-रोगः, मूर्धा-आदिरोगः भवितुम् अर्हति।

शुक्रः - वीर्य-सम्बन्धि-रोगः, स्त्रियाः रजस्सम्बन्धि-रोगः, मेद-वृद्धिः, रक्ताल्पता, मूत्रकृच्छ(पथरी)-आदिरोगः भवति।

शनिः - वात-जन्य-रोगः, स्नायु-रोगः, अर्श-रोगः (पाइल्स) कुष्ठ-आदिरोगः भवति।

**विशेषः** - सर्वे ग्रहाः स्व-बलाबलानुसारेण एव फलं ददति। रोगाणां तीक्ष्णाल्पता बलाबलानुसारेण भवति। विविधैः प्रकारैः यदा एकस्य एव रोगस्य ग्रह-वशेन लक्षणानि दृश्यन्ते तदा एव दैवज्ञः तस्य रोगस्य संभावनां प्रकटयेत्।

## ९. प्रमुखाः योगाः


जन्म-कुण्डल्यां भाव-जन्य-फलात् अतिरिक्तं ग्रहाणां परस्पर-संयोग-वशात् ग्रह-योग-जन्य-फलम् अपि भवति। तन्नाम एतेषां योगानाम् अपि प्रभावः मानव-जीवने भवति। अतः एव एतेषु केषाञ्चित् योगानां विवरणम् अधः दीयते –

**४९. राज-योगः -**

येन ग्रह-योगेन राज-सदृश-फलस्य प्राप्तिः भवति सः 'राज-योगः' इति उच्यते। राज-योगस्य लक्षणानि यथा -

- जन्म-कुण्डल्यां यदा सर्वे ग्रहाः वृषः, मिथुनः, सिंहः, कन्या, धनुः, कुम्भः एतेषु राशीषु स्युः तदा मनुष्यः गजादिभिः युक्तः ख्याति-युक्तः च महान् राजा भवेत्। तदुक्तम् -
- कन्यामीननृयुग्मगोहरिधनुः कुम्भस्थितैः खेचरैः।
- सेनामत्तमतङ्गवाजिविपुलो राजा यशस्वी भवेत्॥
- यदा नवमेशः दशम-स्थाने दशमेशः नवम-स्थाने च शुभ-ग्रहैः युक्तौ स्याताम् तदा जातकः धनाढयः भवति।
- यस्य जन्म-समये षड्ग्रहाः उच्चस्थाः स्युः सः राजाधिराजो भवेत्। तदुक्तम् -
- "षटसु ग्रहेशूच्चगृहस्थितेषु राजाधिराजोऽखिलभूपतिः स्यात्"
- यस्य जन्म-समये लग्नेशः नवमेशः कर्मेशः च शुभ-वर्गेषु बल-युक्तः स्यात् तदा सः धनाढयः भवति।

## जन्माङ्कचक्रम्




उपर्युक्ते जन्माङ्के नवमेश: गुरु: दशमस्थाने, एवञ्च दशमेश: शनि: नवमस्थाने शुभग्रहेण युक्त: अस्ति। अत: अत्र राजयोग: अस्तीति ज्ञातव्यम्।

**५०. दरिद्र-योग:** -

दरिद्र-योगस्य लक्षणानि यथा -

- यदा धनेश:, एकादशेश:, द्वितीयभावाश्च पापा-ग्रहै: युक्ता: स्यु: तदा जातक: निर्धन: भवति:। उक्तं च- 'सपापा धनधनेशायेशा निर्धन:' इति जातक-तत्त्वे।
- यदा गुरो: द्वितीय-चतुर्थ-पञ्चम-स्थानेषु पाप-ग्रहा: स्यु: तदा मनुष्य: दरिद्र: भवेत्। उक्तं च -
- 'धनकारकात् धने वेदे शरे पापे दरिद्री' इति जातक-तत्त्वे।
- यदा शुभ-ग्रहा: त्रिकस्थे ( ६,८,१२), पाप-ग्रहा: च केन्द्रेषु स्यु: तदा दु:ख-कारक: योग: भवति।

जन्माङ्कचक्रम्




उपरि जन्माङ्क-चक्रे शुभ-ग्रहा: त्रिकस्था: पाप-ग्रहा: केन्द्रेषु स्थिता: सन्ति। अत: अत्र दरिद्र-योग: दृश्यते।

**५१. वणिग्-योग:** -

- कारकांश-लग्ने तुला-राशि: स्यात् तदा वाणिज्य-कर्मरत: भवेत्। उक्तं च -

- 'तुलांशे वाणिज्यवान्' इति जातक-तत्त्वे।
- कारकांश-लग्ने यदा बुधः स्यात् अथवा कारकांश-लग्ने कर्क-राशिः स्यात् तदा जातकः उत्कृष्टः वणिक् भवेत्। उक्तं च -
- 'सौम्येंऽशे वा कर्कांशे वाणिज्यवान्' इति जातक-तत्त्वे।
- यदा बुधः जन्म-लग्ने मंगलेन युक्तः स्यात् तदा वाणिज्य-कर्म-रतः भवेत्।
- 'ज्ञानयोगे वाणिज्यवान्' इति जातक-तत्त्वे।

५२. **अरिष्ट-योगः** -

- जन्म-काले यदा पाप-ग्रहेण युक्तः चन्द्रः लग्ने, अष्टम-स्थाने, सप्तम-स्थाने, द्वादश-स्थाने वा स्यात् एवं च शुभ-ग्रहाः केन्द्रात् बहिः स्युः तदा बालकस्य मृत्युः भवेत्। उक्तं च -
  'क्रूरेण संयुक्तः शशी स्मरान्त्य-मृत्युलग्नगः।
  कण्टकाद्बहिः शुभैरवीक्षितश्च मृत्युदः॥' इति जातक-पारिजाते
- जन्म-समये यदा क्षीण-चन्द्रः द्वादश-स्थाने स्यात्, पाप-ग्रहाः लग्ने, अष्टम-स्थाने च स्युः, शुभ-ग्रहाः केन्द्र-स्थाने न स्युः तदा बालस्य शीघ्रमेव मृत्युः भवेत्। उक्तं च -
  क्षीणे हिमगौ व्ययगे पापैरुदयाष्टमगैः।
  केन्द्रेषु शुभाश्च न चेत् क्षिप्रं निधनं वदेत्॥ इति जातक-पारिजाते।

५३. **प्रव्रज्या-योगः** -

यदा एकस्मिन् एव स्थाने पञ्चवा चत्वारः वा ग्रहाः बल-युक्ताः स्युः तदा प्रव्रज्या-योगः भवेत्।

## १०. आयुर्दायविचारः

५४. **जातकस्य आयुषः विषये ज्योतिष-शास्त्रे कः विचारः कृतः वर्तते?**

अस्मिन् विषये ज्योतिषाचार्याः विविधानि मतानि प्रकटयन्ति। तेषु कैश्चित् आचार्यैः उक्तानि लक्षणानि अत्र उल्लिख्यन्ते। जातकस्य जन्माङ्क-चक्रेण अपि आयुर्विचारः कर्तुं शक्यते। जन्म-कालात् २४ वर्ष-पर्यन्तम् अरिष्टस्य विचारः कर्तव्यः। तदन्तरम् आयुर्विचारः भवति।

आचार्याः आयुर्दायस्य त्रीन् विभागान् कुर्वन्ति -

- अल्पायु: (२४ -३२ वर्ष -पर्यन्तम् )
- मध्यमायु: (३२-७० वर्ष-पर्यन्तम्)
- दीर्घायु: (७०-१२० वर्ष-पर्यन्तम्)

**५५. अल्पायुर्योग: -**

'सपापे रन्ध्रेशेऽन्त्ये षष्ठे वा अल्पायु:' इति जातक-तत्त्वे। तन्नाम अष्टमेश: पापग्रहै: सह ६,८,१२ भावेषु स्यात् तदा जातक: अल्पायु: भवति। उक्तं च - 'लग्नाष्टमेशौ व्ययारिगौ वाऽल्पायु:' इति जातक-तत्त्वे। यदा ६,८,१२ भावेषु लग्नाष्टमेशौ स्याताम् तदा जातक: अल्पायु: भवेत्।

**५६. मध्यमायु: -**

'पापा: पणफरतुर्यत्रिस्था मध्यायु:' - इति जातक-तत्त्वे। यदा पापग्रहा: ४,३, २,५,८,११ भावेषु स्यु: तदा जातक: मध्यमायु: भवेत्।

**५७. दीर्घायुर्योग: -**

'रन्ध्रेशे स्वर्क्षे वा मन्देऽष्टमे दीर्घायु:' - यदा अष्टमेश: स्वगृही स्यात्, शनि: अष्टम-भावे च स्यात् तदा जातक: दीर्घायु: भवेत्। 'पापास्त्र्यायारिगा: शुभा: केन्द्रकोणे दीर्घायु:' इति जातक-तत्त्वे। यदा ३,६,११ भावेषु पाप-ग्रहा:, केन्द्र-त्रिकोणेषु च शुभ-ग्रहा: स्यु: तदा जातक: दीर्घायु: भवेत्।

## ११. भूकम्प-विचार:

**५८. भूकम्प-विषये ज्योतिष-शास्त्रे क: विचार: क्रियते?**

प्राकृतिकापत्सु भूकम्प: अन्यतम: वर्तते। ज्योतिष-शास्त्रस्य साहाय्येन वयं भूकम्पस्य संभावना: ऊहितुं शक्नुम:। ज्योतिष-शास्त्रे भूकम्पस्य स्वरुपस्य, कारणस्य च विस्तृतं विवेचनम् उपलभ्यते अस्ति। भूमे: कम्प: 'भूकम्प:' इति। यदा केनचित् कारणेन भूमे: चलनं भवति स एव भूकम्प:। दिश: यदा धूम-व्याप्ता: स्यु: सूर्यस्य प्रकाश: मन्द: स्यात्, नभस्वान् वायु: भूमे: उत्थितं रजो धूलिं क्षिपन् प्रेरयन् विचरति तदा तत: सप्त-दिनानन्तरं भूकम्प: भवति। भार्गेन उक्तं-

भवत्यनिलजा: सर्वे लक्षणान्यवधारय
धूमव्याप्ता दिश: सर्वा नभस्वान् प्रक्षिपन् रज:।

द्रुमांश्च भञ्जंश्चरति रविस्तपति शीतलः
सप्तमेऽहनि कम्पः स्यद् भूमेरनिलसम्भवः॥

भूमेः कम्पस्य आचार्याः नक्षत्रानुसारं चतुण्र्णां कारकानां विवेचनं कृतवन्तः। तानि यथा -

१. वायु-कम्पः, २. अग्नि-कम्पः, ३. इन्द्र-कम्पः, ४. वरुण-कम्पश्च

## १२. वर्षा-ज्ञानम्

**५९. ज्योतिष-शास्त्रे वर्षा-विषये कः विचारः कृतः वर्तते?**

ज्योतिष-शास्त्रस्य संहिता-ग्रन्थेषु वर्षा-विषये विशद-चर्चा प्राप्यते। भूमौ चराचराणां परिपोषणाय वर्षा अतीव आवश्यकी इति सर्वे जानन्ति। 'अन्नं जगतः प्राणाः' इति उक्त्या मानव-जीवने अन्नस्य महत्वं सुष्ठु सिद्धयति। एवं च अन्नोत्पादनं वर्षाभावे न भवितुम् अर्हति। अतः वर्षा कदा भवेत्, कदा वर्षायाः सम्भावना नास्ति चेति जनाः व्यवहारे ज्ञातुं इच्छन्ति। वर्षा-विषये ज्योतिषाचार्यैः उक्तेषु लक्षणेषु कानिचन लक्षणानि इत्थं सन्ति -

- वर्षा-काले यदा चन्द्रः शुक्रात् सप्तमस्थः स्यात्, तत्र शुभ-ग्रहाणां दृष्टिः स्यात्, शनिः त्रिकोण-भावे (५,९) स्यात् तदा वृष्टिः भवति।
- शुक्ल-पक्षे चन्द्रः जलचर-राशिषु शुभ-ग्रहेण दृष्टः स्यात् तदा सद्यः वर्षा भवति।
- यदा रात्रौ मेघ-शब्दः भवेत् दिवसे रक्त-वर्णा विद्युतः दण्ड-सदृशी दृश्येत, वायुः च पूर्वस्यां दिशि प्रवहेत् तदा सद्यः वर्षा भवति।
- यदा कस्यचित् वृक्षस्य समीपे भषन् शुनकः लक्ष्यते तदा अचिरात् वर्षा-पातस्य सम्भावना भवति।
- प्रश्न-कर्ता प्रश्न-समये यदा जल-युक्त-पदार्थं (आर्द्र-पदार्थम्) स्पृशति, जल-कार्ये प्रवृतो भवति, जलमिति शब्दः वा श्रूयते तदा सद्यः वर्षा भवति। उक्तं च -
  आर्द्रं द्रव्यं स्पृशति यदि वा वारि तत्संज्ञकं वा
  तोयासन्नो भवति यदि वा तोयकार्योन्मुखो वा ।
  प्रष्टा वाच्यः सलिलमचिरादस्ति निः संशयेन
  पृच्छाकाले सलिलमिति वा श्रूयते यत्र शब्दः॥ इति बृहत्-संहितायाम्।

- यदा गावः उर्ध्वभागे (सूर्याभिमुखम्) अवलोकयन्ति तदा सद्यः वर्षा भवति।

## १३. शकुन-विचारः

**६०. किं नाम शकुनम्?**

अस्माकं जीवने यात्रा-काले, शुभ-कार्ये च बहुधा पक्षि-पश्वादीनां शरीरं, वाचं, स्थितिं च दृष्ट्वा शुभाशुभस्य निर्धारणं क्रियते। एतानि चिह्नानि शकुनानि इति उच्यन्ते। संहितायां शकुनानां विशदं वर्णनं दृश्यते।

- यात्रा-समये यदा सर्पः अभिमुखम् आगच्छन् दृश्यते तदा यात्रायां शत्रु-संयोगः भवति।
- यात्रा-समये यदा कपोतः याने, आसने, शैय्यायां वा उपविशति अथवा गृहे प्रविशति तदा अशुभ-दायको भवति।
- यदा मार्जारः शब्दं करोति, गौः क्षौति तदा यात्रायां मृत्यु-तुल्यं कष्टं भवति।
- यात्रा-समये यदा गौः दृश्यते तदा कार्य-सिद्धिः भवति।
- यदा विभिन्न-पक्षिणां मधुरः रवः श्रूयते तदा लाभः भवति।

केषाञ्चित् पशूनां पक्षिणां च व्यवहार-विषये सूक्ष्मावलोकन-पूर्वकं चिन्तनं ज्योतिष-शास्त्रे उपलभ्यते। तत्र शुनकस्य विषये उक्ताः कतिपय-विषयाः अत्र उदाह्रियन्ते -

- यात्रार्थं प्रस्थितस्य जनस्य पुरतः यदि शुनकः मुखे उपानहम् अथवा मांसखण्डम् आदाय पुरतः उपस्थितः भवति तर्हि यात्रायाः कार्यसिद्धिः भवति।
- शुनकः यदि यात्रिकस्य वामं जानु जिघ्रति तर्हि तस्य धन-लाभः भवति।
- गवा सह क्रीडन् शुनकः शुभ-शकुनस्य सूचकः मन्तव्यः।
- शुनकः यदि मुखे अस्थि आदाय गृहं प्रविशति तर्हि तेन गृह-प्रधानस्य मृत्योः संकेतः मन्तव्यः।
- शुनकः यदि शरीरं गृहात् बहिः, मुखं च अन्तः संस्थाप्य द्वारे तिष्ठन् गृहिणीं पश्यति तर्हि गृहे रोगः प्रविशति।

- गृहं परित वर्तमानां शुनकाः यदि अल्पं भोजनं कुर्वन्ति, यदि तेषाम् एकस्मिन् एव नेत्रे अश्रूणि लक्ष्यन्ते तर्हि गृहे दारिद्र्यम् आविशति।
- गोः सन्दर्भे इदम् उक्तं वर्तते -
- कतिपय-गावः यदा एकत्र शब्दं कुर्वन्ति तदा गृहे धन-धान्यानां वृद्धिः भवति।
- रात्रौ अकारणं शब्दायमानः वृषभः अनर्थस्य सूचकः मन्यते।
- पादाभ्यां भूमिम् आलिखन्ती, अश्रु-पूर्ण-नयना च गौः रोगान् उत्पादयति।
- काकस्य सन्दर्भे इदम् उक्तं वर्तते -
- वैशाख-मासे हरिते वृक्षे स्थितं काकस्य नीडं सुभिक्षस्य सूचकं भवति।
- रात्रौ डयमानाः काकाः जनतायाः विनाशस्य सूचकाः भवन्ति।
- काकः अस्मत्सकाशात् यद् वस्तु नयति तस्य वस्तुनः हानिः भवति, यद् वस्तु च आनयति तस्य वस्तुनः लाभः भवति। उक्तं च - '**यद्द्रव्यमुपनयेत्तस्य लब्धिरपहरति चेत्प्रणाशः स्यात्**' इति बृहत्संहितायाम्।

इदम् अपि ध्यातव्यं यत् रात्रि-चरैः प्राणिभिः दिने चेष्टितं, दिन-चरैः च प्राणिभिः रात्रौ चेष्टितं शकुनत्वेन न स्वीकर्तव्यं। वन-चराणां ग्रामे चेष्टितं, ग्राम-चराणां वने चेष्टितं च शकुनत्वेन न ग्रहीतव्यम्।

## १४. सामुद्रिक-रहस्यम्

### ६१. ज्योतिष-शास्त्रे हस्त-रेखाधारेण फलादेशः कथं क्रियते?

ज्योतिष-शास्त्रे अङ्ग-विद्यायां हस्त-रेखाणां दर्शनेन स्पर्शनेन च शुभाशुभस्य आदेशः आचार्यैः कृतः वर्तते। ब्रह्मणा मानवानां हस्त-रेखाणां निर्माणं क्रियते। जीवन-पर्यन्तं आसां रेखाणां स्थितिः मानव-हस्ते भवति। अर्थात् इमाः रेखाः अक्षयाः सन्ति। उक्तं च -

अक्षया जन्मपत्रीयं ब्रह्मणा निर्मिता स्वयम्।
ग्रहा रेखाप्रदा यस्यां यावज्जीवं व्यवस्थिता॥

इमाः रेखाः जीवन-पर्यन्तं मार्ग-दर्शनं कुर्वन्ति। यथा दीपः अन्धकारे अपि वस्तूनि प्रकाशयति

तथैव हस्त-रेखाः मनुष्यस्य भूत-भविष्यत्-वर्तमान-कालानां फलस्य उद्घाटनं कुर्वन्ति। अतः हस्त-रेखा-ज्ञानम् अतीव महत्त्व-पूर्णम् अस्ति। उक्तं च -

नास्ति हस्तात्परं ज्ञानं त्रैलोक्ये सचराचरम्।
यद् बाह्यं पुस्तकं हस्ते धृतबोधाय जन्मिनाम्॥

किञ्च-

एवं चराचरं ज्ञेयं रेखाभिः संप्रकाश्यते।
भूतं भविष्यं वर्तमानं दीपिकाभिर्गृहं यथा॥

हस्त-रेखा-विचार-क्रमे पुरुषस्य दक्षिण-हस्तस्य आधारेण, कन्यायाः वाम-हस्तस्य आधारेण च विचारं कुर्यात्। चतुर्दश-वर्षेभ्यः न्यून-वयसः बालकस्य अपि वाम-हस्तः एव अवलोकनीयः। रात्रि-काले, सूर्योदय-काले, सायङ्काले, प्रहसन-काले, मार्गे च हस्त-परीक्षणं निषिद्धम् अस्ति। सदैव स्वच्छस्य शुद्धस्य च हस्तस्य परीक्षणं कुर्यात्। दैवज्ञः पुरुषस्य कुलं, ज्ञातिं, देशं, आकारादिकं, श्रद्धाम् एवं च हस्ते ग्रह-स्थित्यादिकं दृष्ट्वा एव आदेशं कुर्यात्।

**६२. कः नाम हस्तः?**

हस्त-रेखा-विचार-क्रमे मणिबन्धात् अङ्गुल्यान्त-पर्यन्तम् यः भागः अस्ति सः हस्तः इति उच्यते।

**६३. कः नाम मणिबन्धः?**

हस्तस्य मूलं 'मणिबन्धः' इति उच्यते। अर्थात् यस्मात् स्थानात् कर-तलस्यारम्भः भवति तत् स्थानमेव 'मणिबन्धः' इति कथ्यते। मणिबन्धे प्रायशः तिस्रः, चतस्रः वा रेखाः भवन्ति। मणिबन्धः यदा स्वच्छः, ध्वनि-रहितः च स्यात् तदा शुभ-कारकः भवति।

**६४. अङ्गुलीनां नामानि कानि?**

हस्ते अङ्गुलीनां नामानि यथा - कनिष्ठा, अनामिका, मध्यमा, तर्जनी, अङ्गुष्ठश्च।

**६५. अङ्गुल्यः मनुष्यस्य विषये किं लक्षयन्ति?**

अङ्गुल्यः यदा दीर्घाः, सूक्ष्माः, निर्मांस-पर्व-युक्ताः, सरलाः, सुकोमलाः च स्युः तदा श्रेयस्कर्यः भवन्ति। यदा ताः वक्राः, शुष्काः, स्थूलाः, विरलाः च स्युः तदा मनुष्यः दुःखी भविष्यतीति ज्ञातव्यम्। उक्तम् अपि -

यच्छन्ति विरलाः शुष्काः स्थूला वक्रा दरिद्रताम्।
शस्त्रघातो बहिर्नाम्ना श्रेष्ठत्वं चिपिटाश्चताः॥

**६६. हस्ते स्थितानां रेखाणां शुभाशुभ-लक्षणानि अधुना जानीमः** -


हस्ते यदा सूक्ष्माः, स्निग्धाः, गम्भीराः, प्रलम्बाः, मधुपिंगल-वर्णाः, अव्यावृत्ताः, गतच्छेदाः च रेखाः स्युः तदा सदैव ऐश्वर्यं प्रददति। एतद् भिन्नाः रेखाः अशुभानि फलानि प्रयच्छन्ति। अर्थात् छिन्नाः, सपल्लवाः, रूक्षाः, विवर्णाः, स्थूलाः च रेखाः क्लेशं ददति। उक्तं च -

क्लेशं सपल्लवा रेखा छिन्ना जीवितसंशयम्।
कदन्नं परुषा द्रव्यविनाशं विषमार्पयेत्॥

किञ्च यदा हस्ते अल्परेखाः बहुरेखाः वा स्युः तदा अपि मनुष्यः अल्पायुः धन-हीनश्च भवति। उक्तम् अस्ति-

अरेखं बहुरेखं वा येषां पाणितलं नृणाम्।
ते स्युरल्पायुषो निस्वाः दुःखिता नात्र संशयः॥

अधस्तने हस्त-चित्रे प्रमुखाणां रेखाणां वर्णनं उपस्थाप्यते -



## ६७. हस्ते पर्वतानां विवरणम् -

कनिष्ठिकायाः अधोभागे कर-तले यः उन्नत-भागः भवति सः बुध-पर्वतः इति उच्यते। तथैव अनामिकायाः अधोभागे सूर्य-पर्वतः अस्ति, मध्यमायाः अधोभागे शनि-पर्वतः अस्ति, तर्जन्याः अधोभागे गुरु-पर्वतः अस्त, अङ्गुष्ठस्य अधो भागे शुक्र-पर्वतः अस्ति। बुध-पर्वतस्य अधो भागे मङगल-पर्वतः अस्ति, मङ्गल-पर्वतस्य अधो भागे चन्द्र-पर्वतः अस्ति।

## ६८. प्रमुख-रेखाणां विवरणम् -

**जीवन-रेखा अथवा पितृ-रेखा** - इयं रेखा तर्जनी-अङ्गुष्ठयोः मध्य-भागतः प्रारभ्य मणिबन्धाभिमुखं गच्छति। इयं रेखा यदा छिन्ना वेध-युक्ता च न स्यात्, दीर्घा, गभीरा च स्यात् तदा मनुष्यः दीर्घायुः भवति, पितृ-सुखं च प्राप्नोति।

**भाग्यरेखा** - इयं रेखा प्रायशः मणिबन्धात् ग्रहाणां पर्वताभिमुखं गच्छति। भाग्य-रेखा यदा शनि-पर्वत-पर्यन्तं गच्छति तदा मनुष्यः सौभाग्यशाली भवति। उक्तं च -

"विलसति मणिबन्धान्मन्दगा यत्र भाग्या।
भवति स हि मनुष्योऽत्यन्तसौभाग्यशाली"॥ इति।

यस्य हस्ते भाग्य-रेखा छिन्ना, भिन्ना, वक्रा च स्यात् सः सदैव दुःखी भवति। उक्तं च –

"भवति यदि भग्ना केवलं यस्य हस्ते, अनुभवति तदाऽसौ लौकिकं कष्टजालम्" इति। इयमेव रेखा यदि हस्तस्य मध्य-भागतः बुध-पर्वतं यावत् गच्छति तर्हि मनुष्यः शास्त्रज्ञः उपदेश-कर्ता च भवति।

**आयुष्य-रेखा अथवा हृदय-रेखा** - इयं रेखा कनिष्ठायाः अधोभागतः गुरु-पर्वताभिमुखं याति। अस्याः रेखायाः दैर्घ्यस्य आधारेण मनुष्यस्य आयुषः निर्धारणं क्रियते। यदि आयुष्य-रेखा प्रारम्भतः कनिष्ठायाः अधोभागे, तन्नाम बुध-पर्वतान्तं यावत् गच्छेत् तर्हि मनुष्यस्य आयुः पञ्चविंशति (२५) वर्षाणि भवितुम् अर्हति। यदि आयुष्य-रेखा अनामिकायाः अधोभागपर्यन्तं (सूर्य-पर्वतान्तं) यावत् गच्छति तर्हि मनुष्यस्य आयुः पञ्चाशत् (५०) वर्षाणि भवितुम् अर्हति। शनि-पर्वतान्तं यावत् यदि रेखा गच्छेत् तर्हि मनुष्यस्य आयुः पञ्चसप्ततिः वर्षाणि भवितुम् अर्हति। गुरु-पर्वतान्तं यदि आयुष्य-रेखा गच्छति तर्हि परमायुः ( १००-१२०) वर्षाणि भवितुम् अर्हति। आयुष्य-रेखा यदि स्निग्धा वेध-रहिता च स्यात् तर्हि जीवने आरोग्यं लभ्यते। एतादृश-रेखाभिः

युक्तः जनः कपट-रहितः भवति। एतद्-विपर्यये सति जीवनं रोग-युक्तं भवति। आयुष्य-रेखा यत्र छिन्ना भवति तावत्-प्रमाणक-वर्षेषु जीवने कष्टम् आयाति।

**सन्ततिरेखा** - अङ्गुष्ठस्य मूले स्थिताः रेखा सन्तति-रेखाः सन्ति। तासु याः दीर्घाः स्थूलाः च रेखाः भवन्ति ताः पुत्र-प्राप्तेः द्योतिकाः भवन्ति, याः च ह्रस्वाः, सूक्ष्माः च रेखाः सन्ति ताः कन्या-प्राप्तेः द्योतिकाः सन्ति।

**मस्तिष्क-रेखा अथवा मातृ-रेखा** - जीवन-रेखायाः आयुष्य-रेखायाः च अन्तरे वर्तमाना करभाभिमुखं गच्छन्ती रेखा मस्तिष्क-रेखा अथवा मातृ-रेखा इति उच्यते। एषा रेखा यदि पुष्टा स्यात् तर्हि मनुष्यः शास्त्रज्ञः भवति।

**स्त्रीरेखा** - करभे (कनिष्ठा-पार्श्वे वर्तमाने करतलस्य भागे) आयुष्य-रेखायाः उपरि कनिष्ठायाः च अधः वर्तमाना रेखा 'स्त्री-रेखा' इति उच्यते। यदि एषा रेखा पुष्टा भवति तर्हि दाम्पत्य-जीवनं सुखमयं भवति।

**६९. मनुष्यस्य विभिन्नानि अङ्गानि तेषां विषये किं किं द्योतयन्ति?**

पुरुषाणां विभिन्नानि अङ्गानि तेषां विषये इत्थं द्योतयन्ति -

- यस्य ललाटम् उच्चं भवति सः राजा वा योगी वा भवति। यस्य ललाटं सङ्कीर्णं भवति सः कृपणः, कुटिलः, दुःखी च भवति।
- यस्य नेत्रे कृष्णे भवतः सः धनवान् भवति। यस्य नेत्रे पाटले भवतः सः जीवने लाभालाभौ अनुभवति।
- यस्य नासिका दीर्घा भवति सः राज-सुखानि अनुभवति। यस्य नासिकायाः पार्श्वे मशकः (मस्सा) भवति सः कुटिलः भवति।
- यस्य अधरोष्ठः स्थूलः भवति सः अभिमानी दरिद्रः च भवति।

स्त्रीणां विभिन्नानि अङ्गानि तासां विषये इत्थं द्योतयन्ति । उक्तं च -

पूर्णचन्द्रमुखी या च बालसूर्यसमप्रभा।
विशालनेत्रा बिम्बोष्ठी सा कन्या लभते सुखम्॥

- यस्याः स्त्रियाः ललाटं रोमभिः नाडिभिः रहितं उच्चं च भवति सा स्त्री शुभ-लक्षणा भवति।

- यस्याः नेत्रे नील-कमल-सदृशे नासिका-समीपवर्तिनी च भवतः सा कन्या शुभ-लक्षणा भवति।
- यस्याः नासिका मध्यमाकारा भवति सा सौभाग्य-युक्ता सन्तानयुक्ता च भवति।
- यस्याः अधरोष्ठं स्थूलं शुष्कं च भवति सा कलह-शीला दुर्भाग्य-युक्ता च भवति।
- यस्याः स्त्रियाः पादस्य तर्जनी अङ्गुष्ठात् दीर्घा भवति सा अचिरात् एव पतिगृहं त्यजति।

## १५. वास्तु-विचारः

**७०. किं नाम वास्तु-शास्त्रम्?**

ज्योतिष-शास्त्रस्य संहिता-स्कन्धे वास्तु-विषये उत्तमं ज्ञानं लभ्यते। जनाः सुखमयं जीवनं यापयितुं, धर्मार्थ-कामान् च साधयितुं शास्त्रोक्तरीत्या निर्मिते गृहे निवासं कर्तुम् इच्छन्ति। उक्तमपि भविष्यत्-पुराणे-

'गृहस्थस्य क्रियाः सर्वाः न सिध्यन्ति गृहं विना' इति।

एतदर्थं निवास-कर्तुः नाम्नः अनुसारेण उपयुक्तस्य देशस्य, नगरस्य, ग्रामस्य, स्थानस्य च निर्धारणं क्रियते। अतः अभीष्टे शुभ-स्थाने पिण्डादि-साधनं कृत्वा आयव्ययादि निर्णयं कृत्वा पंचाङ्ग-शुद्धे काले गृहारम्भः करणीयः भवति। एतदतिरिक्तम् एतेन प्रकारेण देवालयानां, वापी-कूप-तडागादीनां च निर्माणेन बहुलं फलं प्राप्यते।

गृहारम्भे नाम-राशि-वशेन काकिणी-विचारः, राहु-मुख-विचारः, वृष-वास्तु-चक्र-विचारः, ग्रह-स्थिति-फल-विचारः च कर्तव्यः भवति। तत्रादौ -

**१. काकिणी-विचारः -**

निवास-कर्तुः कृते अभिष्टः ग्रामः, नगरं वा लाभकरं भविष्यति न वा, इत्यस्य ज्ञानार्थं काकिणी-विचारः आवश्यकः भवति। काकिणी-ज्ञाने उच्यते यत् स्वकीयं वर्गं द्विगुणीकृत्य परस्य वर्ग-संख्यां संयोज्य ततः अष्ट-संख्यया भाजितेन यत् अवशिष्टं भवति तत्तुल्याः काकिण्यः 'शेषाः काकिण्यः' उच्यन्ते। अत्र स्वकीय-अपरयोः यस्य काकिणी-मानं अधिकं भवति स ऋणी भवति। उक्तं च -

स्ववर्गं द्विगुणं कृत्वा परवर्गेण योजयेत्।

अष्टभिस्तु हरेद्भागं योऽधिकः स ऋणी भवेत्॥

अत्र स्ववर्गः = स्वनाम्नः प्रथमाक्षरस्य वर्गः ( अ,क,च,ट,त,प,य,श इति वर्गेषु यः स्वनाम-वर्गः सः)

परवर्गः = ग्राम-स्थानादेः नाम्नः प्रथमाक्षरस्य वर्गः

अर्थात्-

स्ववर्गः x २ + परवर्गः = योग-फलम्

योग-फलम् ÷ ८ = भाग-फलम्

अत्र यत् अवशिष्टं तत् 'शेष-फलम्' इति। अत्र शेष-फलम् = स्व-काकिणी

उदाहरणं कल्प्यते-

निवासकर्तुः नाम= दुर्गाप्रसादः ( त वर्गः = ५ क्रमाङ्कीयः)

स्थानस्य नाम = वेरावलम् (य वर्गः = ७ क्रमाङ्कीयः)

अत्र स्वकाकिणी = ५x२+७= १७÷८ = भागफलम् - २

शेषम्- १ = स्वकाकिणी

स्थानस्य काकिणी ( वेरावलनगरस्य काकिणी) =७x२+५÷८ = भागफलम्= २ शेषम्= ३

अतः स्थानस्य काकिणी= ३

अत्र वेरावलनगरस्य काकिणी अधिका अस्ति। अतः अत्र वेरावलम् 'ऋणी' सिद्ध्यति। अर्थात् दुर्गाप्रसादस्य कृते वेरावल-नगरे निवासः लाभकरः भविष्यति।

**२. प्रशस्तभूमिलक्षणम्-**

गृह-निर्माणे सदैव शुभ-लक्षण-युक्तायाः भूमेः चयनं करणीयम्। प्रशस्त-भूमि-चयने अनेके नियमाः ज्योतिष-शास्त्रे वर्णिताः सन्ति। तेषु केचित् यथा -

- गृह-भूमेर्मध्ये एक-घन-हस्त-मितं खातं कृत्वा पुनश्च मृत्तिकया परिपूरणीयः। यदा मृत्तिका न्यूना भवति तदा अनिष्टफल-प्रदा भवति। यदा-अधिका समा च भवति तदा शुभदायिका भवति। उक्तं च -

  गृहमध्ये हस्तमितं खात्वा परिपूरितं पुनः श्वभ्रम्।
  यद्यूनमनिष्टं तत् समे समं धन्यधिकं यत्॥

- गृह-भूमेर्मध्ये एक-घन-हस्त-मितं गर्तं खात्वा जलेन परिपूरणीयः। ततः पद-शतं गत्वा प्रत्यागत्य परिशीलनीयम्। यदि तद् जलम् ऊनं न भवति तर्हि शुभं भवति। यदि जलं न्यूनं भवति तर्हि सा भूमिः दुःखकारणी भवति।
- शस्तौषधि-द्रुमलता-युक्ता, मधुरा, सुगन्धा, स्निग्धा च भूमिः नराणां कृते शुभदा भवति।

<u>गृहस्य रचना</u>

<table>
<tr><td>ईशान-कोणः</td><td colspan="5">पूर्वा दिक्</td><td>आग्नेय-कोणः</td></tr>
<tr><td rowspan="3">उत्तरा दिक्</td><td colspan="2">देवालयः</td><td>सर्व-वस्तु-सङ्ग्रहः</td><td>भोजन-सामग्री-सङ्ग्रहः</td><td>पाक-गृहम्</td><td rowspan="3">दक्षिणा दिक्</td></tr>
<tr><td rowspan="2">द्वारम्</td><td>अतिथि-कक्षः</td><td colspan="2" rowspan="2">अङ्गनम्</td><td>शयन-कक्षः</td></tr>
<tr><td>स्वागत-कक्षः</td><td>स्नानागारः</td></tr>
<tr><td></td><td colspan="2">अन्न-सङ्ग्रहः</td><td>भोजन-कक्षः</td><td>अध्ययन-कक्षः</td><td>सोपान-पङ्क्तिः/शौचालयः</td><td></td></tr>
<tr><td>वायव्य-कोणः</td><td colspan="5">पश्चिमा दिक्</td><td>नैर्ऋत्य-कोणः</td></tr>
</table>

**७१. गृहे प्रकोष्ठादीनां रचना-विषये किम् अवधातव्यम्?**

गृहे प्रकोष्ठादीनां स्थापनं यदा शास्त्रैः निर्दिष्टस्थाने भवेत् तदा तद् गृहं शान्ति-दायकं भवति। गृहे विभिन्नानां प्रकोष्ठानां स्थानं कुत्र स्यात् इति अधस्तनाकृत्या ज्ञाप्यते -

## १६. रमल-शास्त्र-विचारः

**७२. रमल-शास्त्रम् अपि ज्योतिष-शास्त्रस्य काचित् शाखा भवति। अधुना वयम् अस्याः शाखायाः विषये अधिकां चर्चां कुर्मः -**

रमल-स्कन्धे प्रस्तरस्य उपरि पाशकाः प्रक्षिप्यन्ते। एवं कृते पाशकानाम् अवस्थाधारेण वयं विभिन्नानां विषयाणां ज्ञानं प्राप्तुं शक्नुमः। ते यथा -

शुभा-शुभस्य ज्ञानम्, मुष्टि-प्रश्नानाम् उत्तराणि, मूक-प्रश्नानाम् उत्तराणि, चौर्यादीनां विषये कथनम्, बन्धन-मुक्ति-विचारः, युद्धे जय-पराजय-ज्ञानम्, जातक-सम्बन्धि-विषयाणां ज्ञानम् इत्यादि।

**७३. एतेन शास्त्रेण 'रमल-शास्त्रम्' इति नाम कथं प्राप्तम्?**

संस्कृते 'क्रीडनकम्' इत्यस्मिन् अर्थे 'रमणकम्' इति शब्दः विद्यते। अद्यापि गुर्जर-भाषायाम् 'क्रीडनकानि' इत्यस्मिन् अर्थे 'रमकडा' एषः एव शब्दः प्रयुज्यते। प्राकृत-भाषासु एषः शब्दः 'रमणअ' इत्येवम् उच्चार्यते स्म। कालान्तरेण एतस्य उच्चारणं 'रमनड' इत्येवम् अभवत्। अस्य एव उच्चारणम् अर्बी-भाषायाम् 'रमल' इति जातम्। इत्थं एतस्य शास्त्रस्य नाम 'रमल'-शास्त्रम् इति जातम्। पाशकाः द्यूतादि-क्रीडायाम् उपयुक्तानि क्रीडनकानि अथवा 'रमणकानि' एव। अस्मिन् शास्त्रे एषाम् एव उपयोगः भवति, अतः एतत् 'रमलक-शास्त्रम्' इति नाम्ना प्रसिद्धम्। एवं श्रूयते यत् पुरा मातुः पार्वत्याः विनोदार्थं भगवान् शिवः एतत् शास्त्रं रचितवान्। 'रमल'-शब्दस्य अन्या अपि व्युत्पत्तिः दर्श्यते। सा यथा - 'रमते इति रमः (पचाद्यच्), लाति इति लः। रमस्य लः = रमलः' इति।

**७४. रमल-शास्त्रे प्रयुज्यमानानां पाशकानां स्वरूपं कीदृशं भवति?**

रमल-शास्त्रे अष्ट पाशकाः प्रयुक्ताः भवन्ति। एते पाशकाः अष्टधातुना निर्मिताः भवन्ति। प्रत्येकं पाशके षड् मुखानि भवन्ति। तेषु द्वे मुखे कीलिते भवतः। अवशिष्टेषु चतुर्षु मुखेषु ऊर्ध्व-भागे चत्वारः बिन्दवः भवन्ति, अधोभागे च द्वौ बिन्दू भवतः। द्वयोः पार्श्वस्थयोः वर्तमानयोः मुखयोः प्रत्येकं त्रयः बिन्दवः भवन्ति। तयोः आकारः तु भिन्नः भवति। एकेन बिन्दुना युक्तं मुखम् एतेषु न भवति इति विशेषः।




**७५. रमल-शास्त्रे पाशकाः कदा क्षिप्यन्ते?**


मेष-संक्रान्तौ शुभ-दिवसे एव उपस्थितानां प्रश्नानां समाधानार्थं पाशकाः क्षिप्यन्ते।

**७६. अस्य शास्त्रस्य सन्दर्भे कानि नाम 'शकलानि' इति इदानीं जानीमः -**

पाशकेषु आगच्छन्तीनां संख्यानां समूहाः एव शकलानि इति उच्यन्ते। शकलानां नामानि यथा–








| शकलस्य आकारः | | | | |
|---|---|---|---|---|
| शकलस्य नाम | लह्यानम् | कब्जुल-दाखिलकम् | कब्जुलखारिजम् | जमातम् |







| शकलस्य आकारः | | | | |
|---|---|---|---|---|
| शकलस्य नाम | फरहा | उकला | अङ्कीशम् | हुम्रा |

| | |
|---|---|
| उपरितनः पाशकः | |
| अधस्तनः पाशकः | |



| शकलस्य आकारः |  |  |  | |
|---|---|---|---|---|
| शकलस्य नाम | अतबे-दाखिलम् | नकी | इजतमा | तारीखकम् |



| शकलस्य आकारः |  |  |  | |
|---|---|---|---|---|
| शकलस्य नाम | बयाजम् | नुस्रतुल्खारिजम् | नुस्रतुल् दाखिलम् | अतबे-खारिजम् |

**७७. शकलानाम् आधारेण फलादेशः कथं क्रियते?**

यस्य उपरि पाशकानि क्षिप्यन्ते सः 'प्रस्तरः' इति उच्यते। प्रस्तरे षोडश भावाः भवन्ति। प्रश्न-कर्ता एकदा एतानि पाशकानि प्रस्तरे क्षिपति। तदनन्तरं दैवज्ञः चिह्नानाम् अभिज्ञानं करोति। पाशकेषु आगतानां चिह्नानां दिक्, भावः इत्यादीनाम् आधारेण फलादेशः क्रियते।

उदाहरणम् - यदि कश्चन 'अपहरणात्, राज-बन्धनात् वा कदा मुक्तिः भविष्यति?' इति पृष्ट्वा प्रस्तरे पाशकानि क्षिपति, एवं च यदि–

- द्वादशे भावे 'खारिज'-शकलेषु किञ्चन शकलम् आयाति तर्हि बन्धनात् अचिरात् मुक्तिः भविष्यति इति मन्तव्यम्।
- द्वादशे भावे 'दाखिल'-शकलेषु किञ्चन शकलम् आयाति तर्हि बन्धनात् मुक्तिः न भविष्यति इति तदर्थः ग्रहीतव्यः।

## १७. केरल-प्रश्नविचारः

**७८. कः नाम केरल-प्रश्न-विचारः?**

केरल-शास्त्रे अङ्ग-चेष्टाभिः, पुष्प-वृक्ष-नद्यादि-नामभिः च जीवित-मरणादिविषये, नष्टस्य द्रव्यस्य विषये, लाभ-अलाभ-विषये, जय-पराजय-विषये वा उपस्थितानां प्रश्नानां समाधानस्य विधिः ज्योतिषाचार्यैः उपदिष्टः। अत्र अष्टविधानां प्रश्नानां कल्पना आचार्यैः कृता। तैः शुभाशुभस्य ज्ञानं भवितुम् अर्हति। तत्र प्रश्न-समये प्रष्टुः दिशाधारेण अपि शुभाशुभ-फलस्य आदेशः भवति। यदा प्रश्न-समये प्रश्न-कर्ता दैवज्ञस्य पूर्वदिशि, पश्चिमदिशि, उत्तरदिशि वा उपविश्य प्रश्नं करोति तदा शुभफलं लभ्यते। यदा प्रश्न-कर्ता दक्षिण-दिशि, नैऋत्य-कोणे वा उपविश्य प्रश्नं करोति तदा अनिष्ट-फलं प्राप्नोति। अग्नि-कोणे, वायव्य-कोणे वा उपविश्य यदि प्रश्नः क्रियते तदा प्रश्नस्य फलं शून्यं भवति। उक्तं च -

"प्राची प्रतीची माहेशी कौवेरी दिक् शुभावहा।
आवाची राक्षसी दुष्टा शून्याग्नेयी च मारुती"॥ इति।

**७९. केरल-प्रश्न-पद्धतौ अङ्ग-चेष्टाधारेण प्रश्नानाम् अष्ट-प्रकाराः भवन्ति। अधुना तान् पश्यामः-**

केरल-प्रश्न-सङ्ग्रहे उक्तं यथा -

"संयुक्तोऽसंयुक्तोऽभिहतोऽनभिहतोऽभिघातिकः।
आलिङ्गितोऽभिधूमितो दग्धः प्रश्नः"॥ इति।

एतद् आधारेण प्रश्नस्य अष्ट प्रकाराः यथा –

१. संयुक्तः प्रश्नः - यदि प्रष्टा प्रश्न-समये स्व-शरीरं स्पृष्ट्वा पृच्छति तदा 'संयुक्त-प्रश्नः' इति उच्यते। सः च शुभकरः भवति।

२. असंयुक्तः प्रश्नः - यदि प्रष्टा मार्गे चलन्, शय्यायां शयानः, यानम् आरूढः, दक्षिणा-रहितः, भाव-रहितः च प्रश्नं पृच्छति तदा सः 'असंयुक्तः प्रश्नः' इति उच्यते। बहुभिः दिनैः अनन्तरम् ईदृशे प्रश्ने पृष्टे लाभः भवति।

अभिहतः प्रश्नः - यदि प्रष्टा वाम-हस्तेन वामाङ्गं स्पृशति तदा 'अभिहतः प्रश्नः' इति उच्यते। एषः प्रश्नः अलाभकरः भवति।

अनभिहतः प्रश्नः - यदि प्रष्टा प्रश्न-समये स्वहस्तेन परस्य शरीरं स्पृशेत् तदा सः 'अनभिहतः प्रश्नः' इति उच्यते। एनेन कार्य-लाभः भवति।

अभिघातिकः प्रश्नः - यदि प्रष्टा प्रश्न-समये मस्तकं, हृदयं, पादं, हस्तं, कटिं व मर्दयेत् तदा सः 'अभिघातिकः प्रश्नः' इति उच्यते। एतेन प्रश्नेन प्रष्टुः संतापः भवति।

आलिङ्गित-प्रश्नः – यदा प्रष्टा दक्षिण-करेण निजं दक्षिणाङ्गं स्पृशति तदा सः 'आलिङ्गितः' प्रश्नः इति उच्यते। एषः प्रश्नः प्रष्टुः कृते लाभकारकः, सुखकारकः च भवति।

अभिधूमितः प्रश्नः - यदि प्रष्टा दक्षिण-करेण वाम-करेण वा सर्वाणि अङ्गानि स्पृशति तदा सः 'अभिधूमितः प्रश्नः' इति उच्यते। एतादृशेन प्रश्नेन प्रष्टुः कश्चित् लाभः, मित्राद्यागमनं च भवति।

दग्धः प्रश्नः - यदि प्रष्टा रोदनं कुर्वन्, दुःखितः भूत्वा अथवा भयार्तः भूत्वा अशुभे स्थले भक्ति-भाव-रहितः सन् पृच्छति तदा सः 'दग्धः प्रश्नः' इति उच्यते। एतत्प्रकारकः प्रश्नः प्रष्टुः बहुलम् अलाभं करोति।

## १८. ज्योतिष-शास्त्रस्य प्रमुख-ग्रन्थानां रचनाकाराः

**८०. ज्योतिष-शास्त्रे प्रमुखाः ग्रन्थाः, ग्रन्थकाराः च के सन्ति इति अधुना कोष्ठकस्य साहाय्येन जानीमः -**

| **क्रमः** | **ग्रन्थाः** | **ग्रन्थकाराः** |
|---|---|---|
| १ | बृहत्-संहिता | आचार्य-वराहमिहिरः |
| २ | बृहत्-पाराशर-होरा-शास्त्रम् | महर्षि-पराशरः |
| ३ | लघुजातकम्, बृहद्-जातकम् | आचार्य-वराहमिहिरः |
| ४ | जातक-पारिजातः | आचार्य-वैद्यनाथः |

| | | |
|---|---|---|
| ५ | सर्वार्थ-चिन्तामणिः | वैङ्कटेश-शर्मा |
| ६ | मुहूर्त-चिन्तामणिः | राम-दैवज्ञः |
| ७ | प्रश्न-भूषण-सारः | दैवज्ञः जीवनाथः |
| ८ | रमल-नव-रत्नम् | पण्डितः परमसुख-उपाध्यायः |
| ९ | पञ्च-स्वराः | प्रजापति-दासः |
| १० | भारतीय-कुण्डली-विज्ञानम् | आचार्य-हिंमतलाल-मीठालाल-ओझा |
| ११ | जैमिनि-सूत्रम् | महर्षि-जैमिनि |
| १२ | हस्त-संजीवनम् | श्रीमेघविजय-गणिः |
| १३ | सूर्य-सिद्धान्तः | आर्षग्रन्थः |
| १४ | सिद्धान्त-शिरोमणिः, लीलावती, बीजगणितम् | भास्कराचार्यः |
| १५ | ग्रह-लाघवम् | गणेश-दैवज्ञः |

* * *

# तृतीयं प्रकरणम्

# व्याकरण -विवरणम्

## १. व्याकरण-परिचयः

१. **किं नाम व्याकरणम्?**

व्याकरणं १. किञ्चित् वेदाङ्गं, २. किञ्चित् दर्शनं, ३. किञ्चित् शास्त्रम्।

## १.१ व्याकरणं वेदाङ्गम्

२. **व्याकरणं 'वेदाङ्गम्' इति उक्तम्; किं नाम वेदाङ्गम्?**

वेदं ज्ञातुं यद् उपयुक्तं भवति तत् वेदाङ्गम् इति कथ्यते।

३. **कानि वेदाङ्गानि सन्ति?**

शिक्षा, कल्पः, व्याकरणं, छन्दः, ज्यौतिषं, निरुक्तं चेति षड् वेदाङ्गानि सन्ति।

४. **षट्षु वेदाङ्गेषु प्रमुखं वेदाङ्गं किं वर्तते?**

षट्सु अपि वेदाङ्गेषु प्रमुखं वेदाङ्गं व्याकरणं वर्तते।

५. **व्याकरणं प्रमुखं वेदाङ्गं किमर्थं गण्यते?**

वेदः शब्दमयः वर्तते। व्याकरणं शब्दज्ञानाय एव उपयुक्तम्। अतः व्याकरणं प्रमुखं वेदाङ्गं गण्यते।

## १.२ व्याकरणं दर्शनम्

६. **व्याकरणं 'दर्शनम्' इति उक्तम्; दर्शनं किं भवति?**

दृश्यते = अवगम्यते वस्तुनिष्ठं/व्यक्तिनिष्ठं तत्त्वं येन तत् दर्शनम्।

**७. व्याकरण-दर्शने नित्य-पदार्थः कः?**

शब्द-ब्रह्म एव व्याकरण-दर्शने नित्य-पदार्थः।

**८. व्याकरण-दर्शनानुसारं सृष्टिप्रक्रिया कथं भवति?**

सर्वा अपि सृष्टिः शब्द-ब्रह्मणः अर्थ-शब्द-रूपः विवर्तः एव अस्ति।

**९. कःविवर्तः?**

समानस्य तत्त्वस्य विविधा अभिव्यक्तिः विवर्तः। यथा समानं जलं बुद्बुदत्वेन, तरङ्गत्वेन, आवर्तत्वेन च विवर्तते, तथैव शब्द-ब्रह्म एव अर्थभावेन विवर्तते।

## १.३ व्याकरणं शास्त्रम्

**१०. व्याकरणं 'शास्त्रम्' इति उक्तम्; किं नाम शास्त्रम्?**

शास्ति = उपदिशति = उपदेशं करोति इति शास्त्रम्।

**११. व्याकरण-शास्त्रं कस्य उपदेशं करोति?**

व्याकरण-शास्त्रं शब्दानाम् उपदेशं करोति। अतः एव व्याकरण-शास्त्रं शब्द-शास्त्रम् इति अपि उच्यते।

## २. शब्द-विवरणम्

**१२. शब्दः इत्युक्ते किम्?**

सामान्याः जनाः 'ध्वनिम्' एव शब्दं मन्यन्ते।

**१३. शास्त्रकाराः कं शब्दं मन्यन्ते?**

यस्य उच्चारणेन बुद्धौ अर्थस्य प्रत्ययः भवति तं शास्त्रकाराः शब्दं मन्यन्ते।

**१४. कस्य उच्चारणेन बुद्धौ अर्थस्य प्रत्ययः भवति?**

पदस्य, वाक्यस्य, वाक्य-समूह-भूतस्य व्याख्यानस्य च उच्चारणेन बुद्धौ अर्थस्य प्रत्ययः भवति। अतः यथा पदं 'शब्दः' तथैव वाक्यम् अपि 'शब्दः', व्याख्यानम् (=महावाक्यम्) अपि 'शब्दः'।

**१५. किं शास्त्रकाराणां मते ध्वनिः शब्दः नास्ति?**

यथा विद्युद्-दीप-द्वारा विद्युत् प्रकाशरूपेण अभिव्यक्ता भवति, तथैव ध्वनि-द्वारा शब्दः अभिव्यक्तः भवति; स्वयं ध्वनिः शब्दः नास्ति इति शास्त्रकाराणां मतम्।

**१६. शब्दाः कतिविधाः?**

शब्दाः द्विविधाः। साधु-शब्दाः, असाधु-शब्दाः च।

व्याकरणशास्त्रे साधु-शब्दाः एव 'शब्दाः' इति उच्यन्ते, असाधु-शब्दाः च 'अपशब्दाः' इति उच्यन्ते।

**१७. के साधु-शब्दाः?**

शिष्टाः येषां शब्दानां प्रयोगं कृतवन्तः ते साधु-शब्दाः।

**१८. के शिष्टाः?**

ये स्वार्थ-विरहिताः कस्मिंश्चित् शास्त्रे पारङ्गताः च भवन्ति ते शिष्टाः। शिष्टान् अनुसृत्य ये शिष्टवत् शब्द-प्रयोगं कुर्वन्ति ते अपि लोके शिष्टाः इति परिगण्यन्ते।

**१९. के असाधु-शब्दाः?**

शिष्टैः अप्रयुक्ताः ये शब्दाः लोके प्रयुज्यन्ते ते असाधुशब्दाः।

**२०. शब्दाः कस्याः अङ्गानि?**

शब्दाः भाषायाः अङ्गानि।

**२१. शब्द-शास्त्रम् अथवा व्याकरणं कस्याः भाषायाः भवति?**

नैकासां भाषाणां व्याकरणानि प्रसिद्धानि। अत्र तु संस्कृत-व्याकरण-शास्त्रस्य एव चर्चा वर्तते।

**२२. संस्कृते शब्दाः कतिविधाः?**

संस्कृते शब्दाः द्विविधाः। लौकिकाः, वैदिकाः च।

**२३. किं वैदिक-शब्दाः लौकिक-शब्देभ्यः सर्वथा भिन्नाः?**

वैदिक-शब्दाः लौकिक-शब्देभ्यः न सर्वथा भिन्नाः, किन्तु वैदिक-शब्दानां केचन विशेषाः तु सन्ति एव। तद् यथा 'देव'-शब्दस्य 'देवाः' इति प्रथमा-बहुवचनान्तं रूपं लोके प्रसिद्धम्। वेदेषु

अपि एतद् रूपं प्रयुज्यते, किन्तु वेदेषु क्वचित् 'देवासः' इत्यपि रूपं प्रयुक्तं भवति।

## ३. व्याकरणाध्ययनस्य प्रयोजनानि

**२४. व्याकरणाध्ययनेन के लाभाः?**

व्याकरणाध्ययनेन द्विविधाः लाभाः, १.पारमार्थिकाः २.व्यावहारिकाः च।

**२५. व्याकरणाध्ययनेन पारमार्थिकाः लाभाः के?**

व्याकरणाध्ययनेन पारमार्थिकाः लाभाः एते सन्ति -

- परम्परा व्याकरणं वेदाङ्गं मन्यते। वेदानाम् अर्थज्ञाने व्याकरणज्ञानम् अत्यावश्यकम्। अतः
  १. व्याकरणाध्ययनेन वेदानाम् अर्थज्ञाने सुलभता भवति,
  २. एतेन एव वेदानां रक्षणम् अपि भवितुम् अर्हति।
- दार्शनिक-दृष्ट्या वैयाकरणः भर्तृहरिः वदति, "तद् द्वारम् अपवर्गस्य" इति। इत्थम् -
  ३. व्याकरणाध्ययनेन शब्द-ब्रह्मणः अथवा मोक्षस्य प्राप्तिः भवितुम् अर्हति।

**२६. व्याकरणाध्ययनेन व्यावहारिकाः लाभाः के?**

व्याकरणाध्ययनेन व्यावहारिकाः लाभाः एते सन्ति –

- व्याकरणं भाषायाः अपरिमितान् शब्दान् ज्ञातुं लघुतमः उपायः अस्ति। शब्द-ज्ञानं विना शास्त्रज्ञानं, साहित्यज्ञानं वा असम्भवम्। अतः- १. व्याकरणस्य अध्ययनेन किमपि शास्त्रं, साहित्यं वा सम्यक् ज्ञातुं शक्यते।
- भाषायाः अवगमने यथा व्याकरणाध्ययनम् उपकरोति, भाषया स्वविचाराणाम् 'अभिव्यक्तौ' अपि तथैव उपकरोति। असाधु-शब्दाः देशविशेषे, कालविशेषे वा प्रयुक्ताः भवन्ति अतः सर्वे, सर्वदा तान् ज्ञातुं न शक्नुवन्ति। साधु-शब्दानां प्रयोग-क्षेत्रं व्यापकतरम्, बोध-गम्यता च अधिका। अतः सदैव साधु-शब्दानां प्रयोगः करणीयः इति शास्त्रकाराणाम् उपदेशः।
  २. व्याकरणस्य अध्ययनेन कः शब्दः साधुः? कः च असाधुः? इति विवेकः अस्मासु उत्पन्नःभवति।
  ३. अस्माकं लिखिता वा मौखिकी वा अभिव्यक्तिः शुद्धा भवति।

४. क्लिष्टान् प्रयोगान् अपि वयं लीलया शुद्धतया कर्तुं शक्नुमः।
५. नूतन-काव्य-कथोपन्यासादीन् रचयितुं धैर्यम् अस्मासु उत्पन्नं भवति।

## ४. व्याकरणस्य रचनाकाराः

**२७. संस्कृत-व्याकरणं केन रचितम्?**

नैके वैयाकरणाः संस्कृतभाषायाः व्याकरणानि रचितवन्तः।

**२८. व्याकरणस्य प्रथमः प्रवक्ता कः?**

परम्परया ब्रह्मा व्याकरणस्य प्रथमः प्रवक्ता मन्यते।

**२९. व्याकरणस्य द्वितीयः प्रवक्ता कः?**

परम्परया बृहस्पतिः व्याकरणस्य द्वितीयः प्रवक्ता मन्यते।

**३०. व्याकरणस्य प्रथमः संस्कर्ता कः?**

परम्परया इन्द्रः व्याकरणस्य प्रथमः संस्कर्ता मन्यते। इतः पूर्वं संस्कृते वर्तमानस्य प्रत्येकं साधु-शब्दस्य उपदेशः क्रियते स्म। इन्द्रः शब्देषु प्रकृति-प्रत्यय-विभाग-कल्पना-द्वारा साधु-शब्दोपदेशस्य पद्धतिम् आरब्धवान्। (प्रकृति-प्रत्यय-विभागः इत्युक्ते किम्, इति ज्ञातुं ८९तमं प्रश्नं पश्यन्तु)

**३१. संस्कृतस्य अत्यन्तं प्रसिद्धं व्याकरणं किम्?**

महर्षि-पाणिनि-विरचितं व्याकरणं संस्कृतस्य अत्यन्तं प्रसिद्धं व्याकरणं वर्तते।

**३२. महर्षि-पाणिनिः कतिभ्यः वर्षेभ्यः पूर्वं संस्कृत-व्याकरणस्य रचनाम् अकरोत्?**

प्रायः इतः २५०० वर्ष-पूर्वं महर्षिः पाणिनिः संस्कृत-व्याकरणस्य रचनाम् अकरोत्।

**३३. पाणिनेः अनन्तरं संस्कृतस्य व्याकरणं केन रचितम्?**

पाणिनेः अनन्तरम् अपि नैके विद्वांसः संस्कृतस्य व्याकरणं रचितवन्तः।

**३४. ते के?**

तेषु प्रमुखाः सन्ति -

१. सर्ववर्म-प्रणीतं कातन्त्रव्याकरणम्

२. चन्द्रगोमि-प्रणीतं चान्द्रव्याकरणम्

३. देवनन्दि-प्रणीतं जैनेन्द्रव्याकरणम्

४. पाल्यकीर्ति-प्रणीतं जैन-शाकटायन-तन्त्रम्

५. भोजदेव-प्रणीतं सरस्वतीकण्ठाभरणम्

६. हेमचन्द्राचार्य-प्रणीतं सिद्धहैमशब्दानुशासनम्

७. अनुभूतिस्वरूपाचार्य-प्रणीतं सारस्वतव्याकरणम्

८. वोपदेव-प्रणीतं मुग्धबोधव्याकरणं च।

## ५. पाणिनि-विरचित-ग्रन्थानां विवरणम्

**३५. महर्षि-पाणिनिः व्याकरणस्य कति ग्रन्थान् रचितवान्?**

महर्षि-पाणिनिः व्याकरणस्य पञ्च ग्रन्थान् रचितवान् इति श्रूयते।

**३६. के ते पञ्च ग्रन्थाः?**

ते पञ्च ग्रन्थाः यथा -

१. अष्टाध्यायी-सूत्रपाठः

२. धातुपाठः

३. गणपाठः

४. उणादि-सूत्रपाठः[1]

५. लिङ्गानुशासनं[2] च।

**३७. एतेषु ग्रन्थेषु प्रमुखः ग्रन्थः कः?**

एतेषु 'अष्टाध्यायी-सूत्रपाठः' प्रमुखः। अन्ये ग्रन्थाः एतस्य एव ग्रन्थस्य परिशिष्ट-रूपाः अथवा पूरकाः सन्ति।

---

[1] एषः शान्तनवेन विरचितः इत्यपि केचित् वदन्ति।

[2] अस्य कर्ता अपि स्वयं पाणिनिः न इति बहूनां मतम्।

**३८. अष्टाध्यायी-सूत्रपाठे किं वर्तते?**

अष्टाध्यायी-सूत्रपाठे अष्ट अध्यायाः सन्ति।

**३९. अष्टसु अध्यायेषु प्रत्येकम् अध्याये किं वर्तते?**

अष्टसु अध्यायेषु प्रत्येकम् अध्याये चत्वारः पादाः सन्ति। एवम् आहत्य अष्टाध्यायी-सूत्रपाठे (८x४ =) ३२ पादाः सन्ति।

**४०. ३२ पादेषु प्रतिपादं किं वर्तते?**

३२ पादेषु प्रतिपादं व्याकरणस्य सूत्राणि सन्ति।

**४१. अष्टाध्यायी-सूत्रपाठे आहत्य कति सूत्राणि सन्ति?**

अष्टाध्यायी-सूत्रपाठे आहत्य प्रायः ३९८३सूत्राणिसन्ति। (किं सूत्रम् इति ज्ञातुं ५२तमं प्रश्नं पश्यन्तु)

**४२. धातुपाठे किं वर्तते?**

संस्कृत-भाषायां प्रयुक्तेषु शब्देषु यावन्तः धातवः सन्ति, प्रायः तेषां सर्वेषामपि संग्रहः धातुपाठे कृतः वर्तते। (कः धातुः इति ज्ञातुं ९३तमं प्रश्नं पश्यन्तु)

**४३. गणपाठे किं वर्तते?**

अष्टाध्यायी-सूत्रपाठे विशिष्टानां शब्दस्वरूप-समूहानाम् उल्लेखं कृत्वा कानिचित् कार्याणि उक्तानि सन्ति। एतेषु प्रत्येकं समूहे यानि शब्दस्वरूपाणि अन्तर्भवन्ति तेषाम् उल्लेखः गणपाठे उपलभ्यते। **उदाहरणम्** - सूत्रपाठे 'सर्वादीनि सर्वनामानि (१.१.२७)' इति सूत्रं वर्तते। एतत् सूत्रं 'सर्वादि'-शब्दस्वरूपाणां 'सर्वनाम' इति संज्ञां करोति। एतस्य पठनेन सर्वादीनि शब्दस्वरूपाणि कानि? इति जिज्ञासा भवति। सर्वादि-गणे येषाम् अन्तर्भावः भवति तेषां सर्वेषाम् अपि शब्दस्वरूपाणां परिगणनं गणपाठे उपलभ्यते।

**४४. उणादि-सूत्रपाठे किं वर्तते?**

अष्टाध्यायी-सूत्रपाठे वर्तमानैः नियमैः येषां शब्दानां सिद्धिः न भवति तान् साधयितुम् अपेक्षितानि सूत्राणि उणादि-सूत्रपाठे सन्ति।

**४५. लिङ्गानुशासने किं वर्तते?**

व्याकरण-शास्त्रेण साधितानां शब्दानां (पुं-स्त्री-नपुंसकेषु अन्यतमस्य) लिङ्गस्य निर्धारणाय अपेक्षितानि सूत्राणि लिङ्गानुशासने सन्ति।

## ६. पाणिनीय-व्याकरण-विवरणम्

**४६. किम् उपरि उल्लिखिताः ग्रन्थाः एव 'पाणिनीयं व्याकरणम्' इति उच्यन्ते?**

न। महर्षि-कात्यायन-विरचितानि वार्त्तिकानि, महर्षि-पतञ्जलि-विरचितं व्याकरण-महाभाष्यं च पाणिनि-विरचितैः ग्रन्थैः समुदितं 'पाणिनीय-व्याकरणम्' इति उच्यते। पाणिनिः, कात्यायनः, पतञ्जलिः च एते त्रयः मुनयः पाणिनीय-व्याकरण-परम्परायाः आधारभूताः सन्ति। तस्माद् एव पाणिनीय-व्याकरणं 'त्रिमुनि-व्याकरणम्' इत्यपि उच्यते।

**४७. किं नाम वार्त्तिकम्?**

वार्त्तिकानि अल्पैः अक्षरैः युक्तानि वाक्यानि एव। प्रत्येकं वार्त्तिकं पाणिनेः किञ्चित् सूत्रम् आश्रित्य एव लिखितं भवति। क्वचित् एतानि पाणिनि-सूत्रैः उक्तानां नियमानाम् आशयं स्पष्टं कुर्वन्ति, क्वचित् च तेषां व्याप्तिं नियन्त्रयन्ति।

**उदाहरणम्** - 'रषाभ्यां नो णः समानपदे (८.४.१)' इति किञ्चित् पाणिनि-सूत्रं वर्तते। र-वर्णात्, ष-वर्णात् वा परस्य नकारस्य स्थाने णकारः एतेन सूत्रेण भवति। 'तीर्+ न' इत्यत्र र-वर्णात् परः नकारः अस्ति। प्रकृत-सूत्रेण नकारस्य स्थाने णकारः भवति। इत्थं 'तीर्ण' इति रूपं सिध्यति। 'तिसृ+नाम्' इत्यत्र ऋ-वर्णात् परं नकारः अस्ति। अत्रापि नकारस्य स्थाने णकारः इष्यते। किन्तु तत् पाणिनीयसूत्रेण न सिध्यति। अत्रैव 'ऋवर्णाच्चेति वक्तव्यम्' इति वार्त्तिकं वर्तते। एतस्य वार्त्तिकस्य साहाय्येन अत्रापि णत्वं कृत्वा 'तिसृणाम्' इति साधु-रूपं सिध्यति।

'कृपो रो लः' इति पाणिनीय-सूत्रस्य अध्ययनेन ज्ञायते यत् ऋकारे अपि र-वर्णस्य अंशः तु अस्ति एव। अतः 'रषाभ्यां नो णः समानपदे' तथैव च 'अट्कुप्वाङ्नुम्व्यवायेऽपि (८.४.२)' इति द्वयोः पाणिनीय-सूत्रयोः साहाय्येन एव 'तिसृणाम्' इत्यत्र नकारस्य स्थाने णत्वं साधयितुं शक्यते। एतया दृष्ट्या 'ऋवर्णाच्चेति वक्तव्यम्' इति वार्त्तिकं पाणिनीय-सूत्रस्य आशयं स्पष्टीकरोति इत्येव वक्तुं शक्यते।

**४८. महर्षि-कात्यायन-विरचितानि वार्त्तिकानि कस्मिन् ग्रन्थे उपलभ्यन्ते?**

महर्षि-कात्यायन-विरचितानां वार्त्तिकानां स्वतन्त्रः ग्रन्थः न उपलभ्यते। वार्त्तिकानि एतानि पाणिनेः एव सूत्राणि आश्रित्य लिखितानि सन्ति। महर्षि-पतञ्जलेः व्याकरणमहाभाष्ये तेषां तेषां पाणिनीय-सूत्राणां व्याख्यानकाले एव तत्तदाश्रितानि वार्त्तिकानि अपि चर्चितानि सन्ति।

**४९. महर्षि-पतञ्जलि-विरचिते व्याकरण-महाभाष्ये किं वर्तते?**

व्याकरण-महाभाष्ये प्रमुखाणां पाणिनि-विरचितानां सूत्राणां तदाश्रितानां वार्त्तिकानां च अतिविस्तृतं व्याख्यानं वर्तते। व्याख्यानाय अत्र संवादपद्धतिः आश्रिता वर्तते। अस्य ग्रन्थस्य भाषा अतीव सरला, क्लिष्ट-समास-विरहिता च अस्ति। स्थाने स्थाने महर्षिः पतञ्जलिः स्वस्य मतानि अपि प्रकटयति।

**५०. पाणिनीय-व्याकरणे किं पाणिनेः इव कात्यायन-पतञ्जल्योः मतानाम् अपि प्रामाण्यं स्वीक्रियते?**

आम्। पाणिनेः मतानि इव कात्यायन-पतञ्जल्योः मतानाम् अपि प्रामाण्यम् अङ्गीक्रियते। पाणिनीय-व्याकरणे तु 'उत्तरोत्तरं मुनीनां प्रामाण्यम्' इति उक्तिः प्रसिद्धा वर्तते। तदनुसारं पाणिनेः मतानाम् अपेक्षया कात्यायनस्य मतानां प्रामाण्यम् अधिकम्, द्वयोः अपेक्षया च पतञ्जलेः मतानां प्रामाण्यम् अधिकं मन्यते।

**५१. पाणिनीय-व्याकरण-परम्परायां लिखिताः प्रमुखाः ग्रन्थाः के?**

पाणिनीय-व्याकरण-परम्परायां लिखिताः प्रमुखाः ग्रन्थाः, तेषां लेखकाः, तेषां वैशिष्ट्यानि च अधः लिख्यन्ते –

| **ग्रन्थः** | **लेखकः** | **वैशिष्ट्यम्** |
|---|---|---|
| वाक्यपदीयम् | भर्तृहरिः | व्याकरणस्य दार्शनिकपक्षस्य प्रतिपादनम् |
| काशिका | वामन-जयादित्यौ | अष्टाध्याय्याः प्रत्येकं सूत्रस्य लघुव्याख्या |
| वैयाकरण-सिद्धान्त-कौमुदी | भट्टोजिदीक्षितः | अध्ययन-सौकर्यानुसारम् अष्टाध्याय्याः प्रत्येकं सूत्रस्य भिन्नक्रमेण विन्यासः, लघुव्याख्या च |
| लघु-सिद्धान्त-कौमुदी | वरदराजाचार्यः | वैयाकरण-सिद्धान्त-कौमुद्याः एव सङ्क्षिप्तं स्वरूपम् |

| | | |
|---|---|---|
| परिभाषेन्दुशेखरः | नागेशभट्टः | महाभाष्यस्थ-परिभाषा-रूप-पङ्क्तीनां सङ्ग्रहः व्याख्या च |
| वैयाकरण-भूषण-सारः | कौण्डभट्टः | व्याकरणस्य दार्शनिकपक्षस्य प्रतिपादनम् |

## ७. सूत्र-विवरणम्

**५२. ४१तमे प्रश्ने उक्तं यत् अष्टाध्याय्यां सूत्राणि सन्ति। किं नाम सूत्रम्?**

यद् वाक्यं न्यूनतमानि अक्षराणि उपयुज्य सुस्पष्टतया आशयं प्रकटयति तद् वाक्यं 'सूत्रम्' इति उच्यते।

**५३. सूत्राणां कति प्रकाराः सन्ति?**

सूत्राणां षट् प्रकाराः सन्ति।

**५४. के ते प्रकाराः?**

ते प्रकाराः यथा -

१. संज्ञा-सूत्राणि

२. परिभाषा-सूत्राणि

३. विधि-सूत्राणि

४. नियम-सूत्राणि

५. अतिदेश-सूत्राणि

६. अधिकार-सूत्राणि

**५५. कानि नाम संज्ञा-सूत्राणि?**

संज्ञा-सूत्राणि व्याकरण-शास्त्रस्य प्रवृत्तये आवश्यक-संज्ञानां विधानं कुर्वन्ति। संज्ञा द्विविधा - १. लघुसंज्ञा, २. महासंज्ञा च

**उदाहरणम्**- अचोऽन्त्यादि टि। एतेन सूत्रेण शब्दस्वरूपस्य अन्तिमात् स्वरात् प्रभृति वर्तमानस्य भागस्य टि-संज्ञा क्रियते। यथा 'राजन्' इत्यत्र द्वौ स्वरौ - 'आ', 'अ' च। तत्र अन्तिमः स्वरः जकारात् परं वर्तमानः 'अ'। ततः प्रभृति वर्तमानः भागः 'अन्'। प्रकृत-सूत्रेण

तस्य 'टि' इति संज्ञा क्रियते। एतत् संज्ञा-सूत्रम्।

एतेन कृता 'टि'-संज्ञा लघु-संज्ञा वर्तते। 'बहु-गण-वतु-डति संख्या' इति सूत्रेण 'संख्या'-संज्ञा क्रियते। एषः शब्दः लोके अपि प्रसिद्धः। अतः सूत्रे उक्तानां तु एषा संज्ञा भवति एव, किन्तु एक, द्वि, त्रि इत्यादीनाम् अपि भवति।

**५६. कानि नाम परिभाषा-सूत्राणि?**

व्याकरण-शास्त्रस्य सूत्राणां प्रवृत्ति-सन्दर्भे ये नियमाः पालनीयाः ते परिभाषा-सूत्रैः बोध्यन्ते।

उदाहरणम् - वृक्षेभ्यः इति रूपस्य साधने 'वृक्ष+भ्यस्' इति स्थितौ 'सुपि च (७.३.१०२)', 'बहुवचने झल्येत् (७.३.१०३)' चेति द्वयोः अपि सूत्रयोः प्राप्तिः भवति। तदा 'विप्रतिषेधे परं कार्यम् (१.४.२)' इति परिभाषा-सूत्रं कथयति यत्, यदा समानायां स्थितौ एकाधिकानां सूत्राणां प्राप्तिः भवति तदा अष्टाध्यायी-क्रमे यत् सूत्रं पश्चात् वर्तते तस्य एव प्रवृत्तिः करणीया। इत्थम् 'वृक्ष+भ्यस्' इति स्थितौ 'बहुवचने झल्येत्' इत्येव सूत्रं प्रवृत्तं सत् 'वृक्षेभ्यः' इति साधु-रूपं साधयति।

**५७. कानि नाम विधि-सूत्राणि?**

यानि सूत्राणि कञ्चित् विधानं कुर्वन्ति तानि विधि-सूत्राणि।

**उदाहरणम्** - 'इति+अपि' इति स्थितौ 'इको यणचि (६.१.७७)' इति सूत्रम् इ-वर्णस्य स्थाने य्-वर्णस्य विधानं करोति। अतः 'इको यणचि' इति विधि-सूत्रं कथ्यते। इत्थम् 'इति+अपि = इत्यपि' इति रूपं सिध्यति।

**५८. कानि नाम नियम-सूत्राणि?**

यानि सूत्राणि अपरेषां सूत्राणां व्याप्तिं न्यूनां कुर्वन्ति तानि नियम-सूत्राणि।

**उदाहरणम्** -'अनुदात्तङित आत्मनेपदम्' इति सूत्रस्य बलेन 'मृङ्'-धातोः सदैव आत्मनेपद-संज्ञकाः प्रत्ययाः एव प्राप्नुवन्ति। तथा स्थितौ 'म्रियतेर्लुङ्लिङोश्च' इति सूत्रं कथयति यत् मृङ्-धातोः केवलं शित्-प्रकृतिभूतात् परस्य लकारस्य स्थाने, लुङ्-लकारस्य, लिङ्-लकारस्य च स्थाने आत्मनेपद-संज्ञकाः प्रत्ययाः कर्तव्याः इति। 'अनुदात्तङित आत्मनेपदम्' इति सूत्रं सर्वान् लकारान् व्याप्नोति स्म। 'म्रियतेर्लुङ्लिङोश्च' इति सूत्रेण एषा व्याप्तिः केवलं शित्-प्रकृतिभूतात् परस्य लकारस्य स्थाने, लुङ्-लिङ्-लकारयोः च स्थाने परिसीमिता। तस्मात्

'म्रियतेर्लुङ्‌लिङोश्च' इति सूत्रं नियम-सूत्रं वर्तते।

**५९. कानि नाम अतिदेश-सूत्राणि?**

अतिदेश-सूत्राणि भिन्ने सन्दर्भे अपि पूर्वोपदिष्टेन कार्येण समानं कार्यं प्रापयन्ति।

**उदाहरणम्** -'शृगाल'-वाचक:'क्रोष्टु'-शब्दः उकारान्तः, किन्तु तस्य कतिपय-रूपाणि (क्रोष्टा, क्रोष्टारौ, क्रोष्टारः इत्यादीनि) ऋकारान्त-शब्दवत् भवन्ति। तानि एव साधयितुं 'तृज्वत् क्रोष्टुः' इति सूत्रं कृतम्। तेन ऋकारान्तस्य दातृ-शब्दस्य दाता, दातारौ, दातारः इति रूपाणि यया प्रक्रियया सिध्यन्ति तस्याः एव प्रक्रियायाः क्रोष्टु-शब्दे अपि प्राप्तिः भवति।

**६०. कानि नाम अधिकार-सूत्राणि?**

अधिकार-सूत्राणि स्वयं निरर्थकानि, किन्तु अनुवृत्त्या तानि स्वस्मात् परं वर्तमानेषु नैकेषु सूत्रेषु युक्तानि भवन्ति विशिष्टम् अर्थं बोधयन्ति च।

**उदाहरणम्** - अष्टाध्याय्याः प्रथमाध्याये 'कारके (१.४.२३)' इति सूत्रं स्वस्मात् अनन्तरं वर्तमानेषु ३२ सूत्रेषु अनुवृत्त्या युक्तं भवति।

**६१. का नाम अनुवृत्तिः?**

यदा वयं किमपि अपूर्णं वाक्यं शृणुमः तदा मनसि काश्चन आकाङ्क्षाः उत्तिष्ठन्ति। अष्टाध्याय्यां पठितानि नैकानि सूत्राणि अपूर्ण-वाक्यानि इव वर्तन्ते। एतेषाम् अपूर्ण-वाक्य-रूपाणां सूत्राणां पठनेन याः आकाङ्क्षाः उत्तिष्ठन्ति, तासां पूर्तये पूर्वस्मात् सूत्रात् कतिपय-पदानाम् अनुवर्तनं क्रियते। एषा एव अनुवृत्तिः।

**उदाहरणम्** - 'हल् अन्त्यम्'इति किञ्चित् सूत्रम्। तस्य पठनेन 'अन्त्यं हल्' इति एव ज्ञायते। तद्विषये द्वे आकाङ्क्षे उत्तिष्ठतः-

१. कस्य अन्त्यं हल्? इति


२. अन्त्यस्य हलः किं करणीयम्? इति च।

अष्टाध्याय्याम् इतः पूर्वम् 'उपदेशे अच् अनुनासिकः इत्' इति सूत्रं वर्तते। उपरि प्रदर्शितयोः द्वयोः आकाङ्क्षयोः समाधानार्थम् 'उपदेशे अच् अनुनासिकः इत्' इति सूत्रात् 'उपदेशे' इत्यस्य 'इत्' इत्यस्य च पदस्य अनुवृत्तिः क्रियते। तदा द्वे अपि आकाङ्क्षे इत्थं समाहिते भवतः –

१. कस्य अन्त्यं हल्? उपदेशस्य


२. अन्त्यस्य हल: किं करणीयम्? इत् (इति संज्ञा करणीया)

एतदेव अध: आकृत्या प्रदर्श्यते –




**६२. उपरि आकृत्यां 'हल् अन्त्यम्' इत्यस्य अनन्तरं १.३.३ इत्येव तिस्रः संख्याः लिखिताः, तासां कः अर्थः?**

अष्टाध्याय्यां विन्यस्तानां सूत्राणां क्रमस्य अपि माहात्म्यं वर्तते। तस्माद् एव एताभि: तिसृभि: संख्याभि: सूत्रस्य अष्टाध्याय्यां क्रम: उच्यते। तत्र प्रथमा संख्या यस्मिन् अध्याये सूत्रम् अस्ति तस्य अध्यायस्य वाचिका। द्वितीया संख्या तस्य अध्यायस्य पादस्य वाचिका। तृतीया च तस्मिन् पादे सूत्रक्रमस्य वाचिका। इत्थम् १.३.३. इत्यस्य अर्थ: भवति यत् 'हल् अन्त्यम्' इति सूत्रम् अष्टाध्याय्या: प्रथमाध्यायस्य तृतीयपादस्य तृतीयं सूत्रं वर्तते। एतदेव आकृत्या स्पष्टीक्रियते –




## (शब्दोपदेश-विधिः)

**६३. व्याकरण-शास्त्रे साधु-शब्दानाम् उपदेशः केन प्रकारेण क्रियते?**

यथा पदं 'शब्दः' तथैव वाक्यम् अपि 'शब्दः' इति चतुर्दशे प्रश्ने उक्तम्। यथा वाक्येषु पदानि कल्प्यन्ते, तथैव पदेषु वर्णा: कल्पिता: सन्ति। अत: व्याकरण-शास्त्रे त्रिषु स्तरेषु साधु-शब्दानाम्

उपदेशः कृतः। ते यथा –

१. वर्णस्तरः

२. पदस्तरः

३. वाक्यस्तरः

## ८.१ वर्णोपदेश-विवरणम्

**६४. के वर्णाः?**

मुखे वर्तमानाः स्वरपेटिका, जिह्वा, दन्तपङ्क्तिः, ओष्ठौ, जम्भः इत्यादयः समुदिताः 'वाग्यन्त्रम्' इति कथ्यन्ते। वाग्यन्त्रस्य साहाय्येन नैके ध्वनयः उच्चारयितुं शक्यन्ते। तेषु येषां प्रयोगः भाषायां भवति ते ध्वनयः तस्याः भाषायाः 'वर्णाः' इति कथ्यन्ते। संस्कृते अ, आ, इ, ई, उ, ऊ इत्यादयः, क्, ख्, ग् इत्यादयश्च वर्णाः सुपरिचिताः एव सन्ति।

**६५. व्याकरण-शास्त्रे महर्षिः पाणिनिः वर्णानाम् उपदेशं कथं करोति?**

महर्षिः पाणिनिः अष्टाध्याय्याः आरम्भे वर्णानाम् उपदेशाय १४ सूत्राणि रचितवान्। तानि एव सूत्राणि प्रत्याहार-सूत्राणि, माहेश्वर-सूत्राणि, अक्षर-समाम्नायः इत्यादिभिः नामभिः प्रसिद्धानि।

**६६. कानि तानि प्रत्याहार-सूत्राणि?**

तानि सूत्राणि यथा -

| | | |
|---|---|---|
| १. अइउण् | २. ऋलृक् | ३. एओङ् |
| ४. ऐऔच् | ५. हयवरट् | ६. लण् |
| ७. ञमङणनम् | ८. झभञ् | ९. घढधष् |
| १०. जबगडदश् | ११. खफछठथचटतव् | १२. कपय् |
| १३. शषसर् | १४. हल् | |

**६७. एतानि 'प्रत्याहार-सूत्राणि' इति किमर्थम् उच्यन्ते?**


एतेषाम् उपयोगः प्रत्याहार-निर्माणार्थं भवति, अतः एतानि प्रत्याहार-सूत्राणि इति उच्यन्ते।

**६८. प्रत्याहारः इत्युक्ते किम्?**

सङ्क्षेपेण उक्तः विशिष्ट-वर्णानां समूहः 'प्रत्याहारः' इति उच्यते।

**६९. प्रत्याहारस्य स्वरूपं कीदृशं भवति?**

प्रत्याहारे प्रत्याहार-सूत्रेभ्य: चितौ द्वौ वर्णौ भवत:। तत्र प्रथम: वर्ण: कस्यापि सूत्रस्य अन्तिमात् इतर: भवितुम् अर्हति। द्वितीय: वर्ण: अनिवार्यतया कस्यापि सूत्रस्य अन्तिम: वर्ण: एव भवेत्। अध: दत्तायाम् आकृतौ 'इक्'-प्रत्याहारस्य उदाहरणेन एतत् सुस्पष्टं भवति–




**७०. इत्थं निर्मित: प्रत्याहार: केषां वर्णानां वाचक: भवति?**

इत्थं निर्मित: प्रत्याहार: प्रतिसूत्रम् अन्तिमं वर्णं विहाय तत्र अन्तर्भवतां सर्वेषां वर्णानां वाचक: भवति। तद्यथा 'इक्'-प्रत्याहार: इ, उ, ऋ, लृ चेति एतेषां वर्णानां वाचक: भवति। अध: दत्ता कृति: एतदेव स्पष्टीकरोति –

| | | | |
|---|---|---|---|
| १) अ इ उण्। | २) ऋलृ क्। | ३) एओङ्। | ४) ऐऔच्। |
| ५) हयवरट्। | ६) लण्। | ७) ञमङणनम्। | ८) झभञ्। |
| ९) घढधष्। | १०) जबगडदश्। | ११) खफछठथचटतव्। | |
| १२) कपय्। | १३) शषसर्। | १४) हल्। | |

एतेन प्रकारेण अच्, हल्, अण्, खर्, हश्, झल् इत्यादय: अनेके प्रत्याहारा: सिध्यन्ति।

**७१. वर्णा: कतिविधा:?**

वर्णा: द्विविधा: - १. स्वरा:, २. व्यञ्जनानि च।

**७२. के स्वरा:?**

येषां स्वातन्त्र्येण, सुस्पष्टम्, निरन्तरम् उच्चारणं सम्भवति ते स्वरा:। अ, आ, इ, ई, उ, ऊ, ऋ, लृ, ए, ऐ, ओ, औ इत्यादय: स्वरा: सन्ति। अच्-प्रत्याहारे सर्वेषां स्वराणां समावेश: भवति।

**७३. कानि व्यञ्जनानि?**

येषां स्वातन्त्र्येण, सुस्पष्टं, निरन्तरम् उच्चारणं दुष्करं तानि व्यञ्जनानि।

क्, ख्, ग्, घ् इत्यादीनि ह्-पर्यन्तानि व्यञ्जनानि सन्ति। हल्-प्रत्याहारे सर्वेषां व्यञ्जनानां समावेश: भवति।

## ८.१.१ वर्णोपदेश-निमित्तकानि सन्धिकार्याणि

**७४. वर्णोपदेश-निमित्तकानि कार्याणि कानि?**

सन्धिकार्याणि प्राय: वर्णोपदेश-निमित्तकानि।

**७५. क: सन्धि:?**

यदा द्वौ वर्णौ अत्यन्तं समीपम् आगच्छत: तदा तेषु यत् परिवर्तनं भवति तत् सन्धि: इति उच्यते।

**उदाहरणम्** - 'ॐ सह नाववतु...' इत्यादि-मन्त्रे 'नौ' इत्यत्र अन्त्य: औकार:, 'अवतु' इत्यत्र आदिम: अकार: च यदा समीपम् आगच्छत: तदा 'एचोऽयवायाव:(६.१.७८)' इति सूत्रेण 'नौ' इत्यस्य औकारस्य स्थाने 'आव्' आदेश: भवति। इत्थं 'नौ+अवतु' = नाव्+अवतु= नाववतु इति मन्त्रे दृश्यमानं रूपं सिध्यति।

**७६. सन्धीनां कति प्रकारा: सन्ति?**

सामान्येन सन्धीनां त्रय: प्रकारा: सन्ति -

१. अच्-सन्धय:

२. हल्-सन्धय:

३. विसर्ग-सन्धय:

## ८.१.१.१. अच्-सन्धयः

### ७७. के अच्-सन्धयः?

अच् इत्युक्ते स्वराः। स्वरेषु परस्परं जायमानानि वर्ण-परिवर्तनानि अच्-सन्धयः।

**उदाहरणम्** - 'रमा+ईशः'। अत्र आकार-ईकारयोः स्थाने एकारः भवति। तेन 'रमेशः' इति रूपं सिध्यति।

### ७८. अच्-सन्धि-नियमानाम् उदाहरणानि कानि?

एतानि अच्-सन्धि-नियमानां कानिचित् उदाहरणानि -

१. सवर्ण-दीर्घ-सन्धिः

२. गुण-सन्धिः

३. वृद्धि-सन्धिः

४. यण्-सन्धिः

### ७९. कः सवर्ण-दीर्घ-सन्धिः?

सवर्ण-दीर्घ-सन्धेः प्रमुखान् नियमान् इत्थं वक्तुं शक्नुमः -

१. अ/आ + अ/आ = आ

**उदाहरणम्** - तत्र+अपि = तत्रापि। तथा+अस्तु = तथास्तु।

२. इ/ई + इ/ई = ई

**उदाहरणम्** -इति+इच्छति = इतीच्छति। सती+ईशः = सतीशः

३. उ/ऊ + उ/ऊ = ऊ

**उदाहरणम् –** साधु+उक्तम् = साधूक्तम्। वधू+उक्तिः = वधूक्तिः

### ८०. कः गुण-सन्धिः?

गुण-सन्धेः प्रमुखनियमान् इत्थं वक्तुं शक्नुमः -

१. अ/आ + इ/ई = ए

**उदाहरणम्** - राम+इति = रामेति।, रमा+ईशः = रमेशः।

२. अ/आ + उ/ऊ = ओ

**उदाहरणम् –** रङ्ग+उत्सवः = रङ्गोत्सवः। वाम+ऊरुः = वामोरुः।

**८१. कः वृद्धि-सन्धिः?**

वृद्धि-सन्धेः प्रमुखान् नियमान् इत्थं वक्तुं शक्नुमः -

१. अ/आ + ए/ऐ = ऐ

**उदाहरणम्** - तथा+एव = तथैव। तव+ऐश्वर्यम् = तवैश्वर्यम्।

२. अ/आ + ओ/औ = औ

**उदाहरणम्** - गङ्गा+ओघः = गङ्गौघः। तव+औत्सुक्यम् = तवौत्सुक्यम्।

**८२. कः यण्-सन्धिः?**

यण्-सन्धेः प्रमुखान् नियमान् इत्थं वक्तुं शक्नुमः -

१. इ/ई+इकारवर्जः स्वरः = इ/ई इत्यस्य स्थाने य्

**उदाहरणम् –** इति+अपि = इत्यपि। गच्छति+एषः = गच्छत्येषः।

२. उ/ऊ + उकारवर्जः स्वरः = उ/ऊ इत्यस्य स्थाने व्

**उदाहरणम् –** खलु+अयम् = खल्वयम्। साधु+इदम् = साध्विदम्।

## ८.१.१.२. हल्-सन्धयः

**८३. के हल्-सन्धयः?**

हल् इत्युक्ते व्यञ्जनानि। व्यञ्जनानां स्थाने जायमानानि वर्ण-परिवर्तनानि हल्-सन्धयः।

**उदाहरणम्** - 'तद्+लीनः' इत्यत्र दकारस्य स्थाने लकारः भवति। इत्थं 'तल्लीनः' इति रूपं सिध्यति।

**८४. हल्-सन्धि-नियमानाम् उदाहरणानि कानि?**

एतानि हल्-सन्धि-नियमानां कानिचित् उदाहरणानि -

१. श्चुत्व-सन्धिः

२. जश्त्व-सन्धिः

३. चर्त्व-सन्धिः

**८५. कः श्चुत्व-सन्धिः?**

स्/त्/थ्/द्/ध्/न् + श्/च्/छ्/ज्/झ्/ञ् = स्/त्/थ्/द्/ध्/न् इत्येतेषां स्थाने श्/च्/छ्/ज्/झ्/ञ् एते वर्णाः भवन्ति।

**उदाहरणम्** - तत्+चलति = तच्चलति (तकारस्य स्थाने चकारः)। उद्+ज्वलम् = उज्ज्वलम् (दकारस्य स्थाने जकारः)।

**८६. कः जश्त्व-सन्धिः?**

झल् + स्वरः/हश् = झलां स्थाने जश् भवति। (झल्, हश्, जश् चैते प्रत्याहाराः)

**उदाहरणम्** - वाक्+ईशः = वागीशः। तत्+भिन्नम् = तद्भिन्नम्।

**८७. कः चर्त्व-सन्धिः?**

झल् + खर् = झलां स्थाने चर् भवति। (झल्, खर्, चर् चैते प्रत्याहाराः)

**उदाहरणम्** - सुहृद्+करोति = सुहृत्करोति। षड्+सहस्राणि = षट्सहस्राणि

## ८.१.१.३. विसर्ग-सन्धयः

**८८. के विसर्ग-सन्धयः?**

विशिष्टेषु वर्णेषु परेषु पूर्वत्र वर्तमानस्य विसर्गस्य स्थाने जायमानानि परिवर्तनानि विसर्ग-सन्धयः इति उच्यन्ते।

**उदाहरणम्** - 'कः+तत्र' इत्यत्र विसर्गस्य स्थाने सकारः भवति। इत्थं 'कस्तत्र' इति रूपं सिध्यति।

## ८.२ पदोपदेशे प्रकृति-प्रत्यय-विभागः


**८९. ३०तमे प्रश्ने उक्तं यत् इन्द्रः सर्वादौ शब्दानां 'प्रकृति-प्रत्यय-विभागं' कृतवान्। 'प्रकृति-प्रत्यय-विभागः' इत्यस्य किं तात्पर्यम्?**

व्याकरणकाराः पदेषु अर्थैः युक्तयोः भागयोः कल्पनां कुर्वन्ति। तयोः प्रथमः भागः 'प्रकृतिः' इति, अपरः भागः 'प्रत्ययः' इति च उच्यते।

**उदाहरणम्** –'रामस्य' इति शब्दस्य 'र्+आ+म्+अ+स्+य्+अ' इत्येवं वर्णेषु विभागः तु कर्तुं शक्यते। किन्तु अत्र एकैकस्य अपि वर्णस्य कस्मिंश्चित् विशिष्टे अर्थे प्रयोगः अस्ति इति प्रदर्शयितुं न शक्यते। अतः वैयाकरणाः अस्यशब्दस्य 'राम+स्य' इत्येवं विभागं प्रदर्शयन्ति। अन्वय-व्यतिरेकाभ्याम् एतयोः प्रत्येकं भागस्य अर्थः निश्चेतुं शक्यते। एतेषु एव प्रथमः 'राम' इति भागः प्रकृतिः, द्वितीयः 'स्य' इति भागः प्रत्ययः।

**९०. अन्वय-व्यतिरेकाभ्यां वैयाकरणाः प्रकृति-प्रत्यययोः अर्थनिश्चयं कथं कुर्वन्ति?**

भाषायां 'रामस्य' इति शब्देन सदृशाः नैके शब्दाः उपलभ्यन्ते। प्रकृति-प्रत्यययोः अर्थनिर्णयाय तेषां शब्दानां तुलना अधोलिखित-प्रकारेण क्रियते –




**९१. प्रकृतिः अर्थवती, प्रत्ययः अपि अर्थवान् इति उपरि बोधितम्। तथा सति किं प्रकृति-प्रत्ययानां स्वातन्त्र्येण भाषायां प्रयोगः भवितुम् अर्हति?**

पदेषु प्रकृति-प्रत्यय-विभागः, प्रकृति-प्रत्यययोः स्वतन्त्रौ अर्थौ च न वास्तविकौ, अपि तु वैयाकरणैः कल्पितौ। अतः केवलायाः प्रकृतेः, केवलस्य वा प्रत्ययस्य भाषायां प्रयोगः निषिद्धः वर्तते।

## ८.२.१. प्रकृति-विवरणम्

**९२. प्रकृतिः कतिविधा भवति?**

प्रकृतिः द्विविधाः भवति। 'धातुः', 'प्रातिपदिकं' चेति।

**९३. कः धातुः?**

क्रिया-वाचिका प्रकृतिः 'धातुः' इति उच्यते।

**उदाहरणम्** - 'स्नाति' इति पदस्य विश्लेषणं 'स्ना+ति' इत्येवं कर्तुं शक्यते। तत्र 'स्ना'-भागः प्रकृतिः, 'ति'-भागः च प्रत्ययः। 'स्ना' इति प्रकृतिः 'स्नान-क्रियां' बोधयति। तस्मात् एषा प्रकृतिः 'धातुः' इति कथ्यते।

**९४. किं प्रातिपदिकम्?**

यस्याः प्रकृतेः अर्थः क्रिया न भवति सा प्रकृतिः 'प्रातिपदिकम्' इति उच्यते।

**उदाहरणम्** - 'रामस्य' इति पदे 'राम'-भागः प्रकृतिः, 'स्य'-भागः च प्रत्ययः। 'राम' इत्यस्य 'दशरथ-पुत्रः' इति अर्थः। एषाः प्रकृतिः काम् अपि क्रियां न बोधयति। अतः 'राम' इति प्रकृतिः 'प्रातिपदिकम्' इति उच्यते।

## ८.२.२. प्रत्यय-विवरणम्

**९५. प्रत्ययाः कतिविधाः?**

बोध-सौकर्याय प्रत्ययाः त्रिविधाः इति वक्तुं शक्यते। ते यथा-

१. प्रकृति-साधकाः प्रत्ययाः

२. पद-साधकाः प्रत्ययाः च

३. अन्ये प्रत्ययाः

### ८.२.२.१. प्रकृति-साधकाः प्रत्ययाः

**९६. के प्रकृति-साधकाः प्रत्ययाः?**

प्रकृति-साधकाः प्रत्ययाः यदा प्रकृतिभिः सह युक्ताः भवन्ति तदा विनूतना प्रकृतिः एव निष्पन्ना भवति।

**उदाहरणम्** - 'सेव्' इति सेवा-क्रिया-बोधकः धातुः 'प्रकृतिः'। ततः यदा 'अक' इति प्रत्ययं योजयामः तदा सेव्+अक = 'सेवक' इति रूपं सिद्धं भवति। इदानीं 'सेवक'-शब्दः कामपि क्रियां न बोधयति, प्रत्युत सेवा-क्रियायाः कर्तारं बोधयति। अतः एषः शब्दः प्रातिपदिक-रूपा प्रकृतिः एव। 'अक'-प्रत्ययस्य योजनेन धातु-रूपा प्रकृतिः प्रातिपदिक-रूप-प्रकृतौ परिवर्तिता।

**९७. प्रकृति-साधकाः प्रत्ययाः कतिविधाः?**

प्रकृति-साधकाः प्रत्ययाः त्रिविधाः। ते यथा -

१. कृत्-प्रत्ययाः

२. तद्धित-प्रत्ययाः

३. सनादयः प्रत्ययाः च।

## ८.२.२.१.१. कृत्-प्रत्यय-विवरणम्

**९८. के कृत्-प्रत्ययाः?**

प्रत्ययानां कश्चित् समूहः वर्तते। तस्मिन् समूहे वर्तमानानां सर्वेषां प्रत्ययानां 'कृत्' इति संज्ञा वर्तते। एते प्रत्ययाः धातुभ्यः प्रसक्ताः भवन्ति। एतेषां योजनेन धातवः प्रातिपदिकेषु परिवर्तिताः भवन्ति। ९६तमे प्रश्ने उल्लिखितम् उदाहरणं कृत्-प्रत्ययेषु अनन्यतमस्य 'अक'-प्रत्ययस्य एव।

**९९. कृत्-प्रत्ययानाम् उदाहरणानि कानि?**

एतानि कृत्-प्रत्ययानां कानिचित् उदाहरणानि -

१. अक-प्रत्ययः।

**उदाहरणम्** - स्पर्ध्+अक = स्पर्धक (यः स्पर्धते सः) मूष्+अक = मूषक (यः मूषति = चोरयति सः)

२. अ-प्रत्ययः।

**उदाहरणम्** - पच्+अ = पच (यः पचति सः)। नद्+अ = नद (यः नदति सः)

३. त-प्रत्ययः।

**उदाहरणम्** - स्तु+त = स्तुत (स्तुत्या तोषितः)। हृ+त = हृत (हरणेन प्राप्तम्)।

४. य-प्रत्ययः।

**उदाहरणम्** - दण्ड्+य = दण्ड्य (दण्डयितुं योग्यः)। लभ्+य = लभ्य (लब्धुं योग्यः)।

५. तव्य-प्रत्ययः।

**उदाहरणम् –**ज्ञा+तव्य = ज्ञातव्य (ज्ञातुं योग्यः)। मन्+तव्य = मन्तव्य (मन्तुं योग्यः)।

६. इत्र-प्रत्ययः।

**उदाहरणम्** - खन्+इत्र = खनित्र (येन खन्यते तत्), चर्+इत्र = चरित्र (येन चर्यते तत्)

७. अन-प्रत्ययः।

**उदाहरणम्** - पठ्+अन = पठन (पठन-क्रिया)। गम्+अन = गमन (गमन-क्रिया)

८. ति-प्रत्ययः।

**उदाहरणम्** - स्तु+ति = स्तुति (स्तवन-क्रिया)। दीप्+ति= दीप्ति (दीपन-क्रिया = प्रकाशन-क्रिया)

९. त्वा-प्रत्ययः।

**उदाहरणम्** - ज्ञा+त्वा = ज्ञात्वा (ज्ञान-प्राप्तेः अनन्तरम्)। नी+त्वा = नीत्वा (नयन-अनन्तरम्)

१०. तुम्-प्रत्ययः।

**उदाहरणम्** - ज्ञा+तुम् = ज्ञातुम् (ज्ञानार्थम्)। दा+तुम् = दातुम् (दानार्थम्)

## ८.२.२.१.२. तद्धित-प्रत्यय-विवरणम्

**१००. के तद्धित-प्रत्ययाः?**

अष्टाध्याय्यां प्रत्ययानां कश्चित् विशिष्टः समूहः वर्तते। तस्मिन् समूहे वर्तमानानां सर्वेषां प्रत्ययानां 'तद्धित'-संज्ञा वर्तते। एते प्रत्ययाः प्रातिपदिकेभ्यः प्रसक्ताः भवन्ति। यदा वयं प्रातिपदिकेभ्यः एतान् योजयामः तदा नवीनानि प्रातिपदिकानि निष्पन्नानि भवन्ति। अष्टाध्याय्यां २५०तः अधिकाः तद्धित-प्रत्ययाः उक्ताः सन्ति।

**उदाहरणम्** - 'द्वि' इति द्वित्व-संख्या-वाचकं प्रातिपदिकम्। ततः 'तय' इति तद्धितः प्रत्ययः कर्तुं शक्यते। एतस्य अर्थः 'अवयवः' इति। तदा - द्वि+तय = द्वितय इति शब्दः सिद्धः भवति। द्वौ अवयवौ यस्य सः 'द्वितय' इति उच्यते।

**१०१. तद्धित-प्रत्ययानाम् उदाहरणानि कानि?**

एतानि तद्धित-प्रत्ययानां कानिचित् उदाहरणानि -

१. त्र-प्रत्ययः

**उदाहरणम्** - सर्व+त्र = सर्वत्र (सर्वेषु स्थानेषु)। अन्य+त्र = अन्यत्र (अन्यस्मिन् स्थाने)।

२. था-प्रत्ययः

**उदाहरणम्** - यद्+था = यथा (येन प्रकारेण)। तद्+था = तथा (तेन प्रकारेण)

३. धा-प्रत्ययः

**उदाहरणम्** - बहु+धा = बहुधा (बहुभिः प्रकारैः)**।** चतुर्+धा = चतुर्धा (चतुर्भिः प्रकारैः)।

**४.** दा-प्रत्ययः

**उदाहरणम्** -सर्व+दा = सर्वदा (सर्वस्मिन् काले)। एक+दा = एकदा (एकस्मिन् काले)।

५. तर-प्रत्ययः

**उदाहरणम्** - शूर+तर = शूरतर (द्वयोः तुलनायाम् अधिकः शूरः)। उन्नत+तर = उन्नततर (द्वयोः तुलनायाम् अधिकः उन्नतः)।

६. तम-प्रत्ययः

**उदाहरणम्** - बलवत्+तम = बलवत्तम (सर्वेषाम् अपेक्षया अधिकः बलवान्)। विशाल+तम = विशालतम (सर्वेषाम् अपेक्षया अधिकः विशालः)।

७. त्व-प्रत्ययः

**उदाहरणम्** - मधुर+त्व = मधुरत्व (मधुरस्य भावः)। वीर+त्व = वीरत्व (वीरस्य भावः)

८. मत्-प्रत्ययः

**उदाहरण** - बुद्धि+मत् = बुद्धिमत् (बुद्धिः अस्य अस्ति इति)। शक्ति+मत् = शक्तिमत् (शक्तिः अस्य अस्ति इति)।

९. वत्-प्रत्ययः

**उदाहरणम्** - राम+वत् = रामवत् (रामेण तुल्यम्)। काक+वत् = काकवत् (काकेन तुल्यम्)

१०. अ-प्रत्ययः

**उदाहरणम्** - उपगु+अ = औपगव (उपगोः अपत्यम्)। अश्वपति+अ = आश्वपत (अश्वपतेः अपत्यम्)।

## ८.२.२.१.३. सनादि-प्रत्यय-विवरणम्

### १०२. के सनादयः प्रत्ययाः?

अष्टाध्याय्याः तृतीयाध्याये प्रथमे पादे द्वादश प्रत्ययाः उल्लिखिताः सन्ति। एतेषु प्रत्ययेषु प्रथमः प्रत्ययः 'सन्' वर्तते। तस्मात् एते प्रत्ययाः 'सनादयः प्रत्ययाः' इति उच्यन्ते। एतेषु केचन प्रत्ययाः धातुभ्यः युक्ताः भवन्ति, केचन च प्रातिपदिकेभ्यः युक्ताः भवन्ति। एतेषां प्रत्ययानां योगेन नूतनाः धातवः निष्पन्नाः भवन्ति।

**उदाहरणम्** - पठ्-धातोः इच्छार्थे सन्-प्रत्ययः योजयितुं शक्यते। अत्र अन्येऽपि केचित् नियमाः प्रसक्ताः भवन्ति। तदनुसारं यदा प्रक्रियां कुर्मः तदा - पठ्+सन् = 'पिपठिष' इति शब्दरूपं सिध्यति। 'पिपठिष' इति एषः नव-निर्मितः धातुः एव। एतस्य अर्थः भवति 'पठितुम् इच्छा' इति।

### १०३. सनादि-प्रत्ययानाम् उदाहरणानि कानि?

एतानि सनादि-प्रत्ययानां कानिचित् उदाहरणानि -

१. सन्-प्रत्ययः

**उदाहरणम्** - ज्ञा+सन् = जिज्ञास (ज्ञातुम् इच्छा)।
पा+सन् = पिपास (पातुम् इच्छा)

२. इ-प्रत्ययः

**उदाहरणम्** - पठ्+इ = पाठि (पाठन-क्रिया)।
वद्+इ = वादि (वादन-क्रिया)

३. य-प्रत्ययः

**उदाहरणम्** - पुत्र+य = पुत्रीय (आत्मनः पुत्रप्राप्तेः इच्छा)।

## ८.२.२.२. पदसाधकाः प्रत्ययाः

**१०४. के पद-साधकाः प्रत्ययाः?**

भाषायां केवलायाः प्रकृतेः, केवलस्य वा प्रत्ययस्य उपयोगः वर्जितः। एते प्रत्ययाः यदा प्रकृतिभिः सह युक्ताः भवन्ति तदा भाषायां प्रयोक्तुम् अर्हाणि 'पदानि' सिध्यन्ति । अतः एते 'पद-साधकाः प्रत्ययाः' इति वदामः।

**१०५. पद-साधकाः प्रत्ययाः कतिविधाः?**

पद-साधकाः प्रत्ययाः द्विविधाः। ते यथा -

१. सुप्-प्रत्ययाः

२. तिङ्-प्रत्ययाः

**१०६. के सुप्-प्रत्ययाः?**

एते २१ प्रत्ययाः सन्ति। एते प्रातिपदिकेभ्यः युक्ताः भवन्ति। एतद्-अन्तानि पदानि 'सुबन्तानि' इति कथ्यन्ते। एतेषु प्रथमानां त्रयाणां 'प्रथमा' इति संज्ञा, द्वितीयानां त्रयाणां 'द्वितीया' इति संज्ञा, तृतीयानां त्रयाणां 'तृतीया' इति संज्ञा, इत्थं त्रयाणां त्रयाणां प्रत्ययानां क्रमशः प्रथमातः सप्तमी-पर्यन्तं संज्ञाः सन्ति। विभिन्नानां कारकाणाम् अर्थे, विशिष्टानां पदानां योगे वा एते प्रत्ययाः क्रियन्ते। एते प्रत्ययाः अधो लिख्यन्ते –

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | सु | औ | जस् |
| द्वितीया | अम् | औट् | शस् |
| तृतीया | टा | भ्याम् | भिस् |
| चतुर्थी | ङे | भ्याम् | भ्यस् |
| पञ्चमी | ङसि | भ्याम् | भ्यस् |
| षष्ठी | ङस् | ओस् | आम् |
| सप्तमी | ङि | ओस् | सुप् |

**उदाहरणम् –** प्रथमा-द्विवचने मरुत्+औ = मरुतौ। षष्ठी-बहुवचने मरुत्+आम् = मरुताम् इत्येवम् अन्यानि विभक्तिरूपाणि अपि सिध्यन्ति।

**१०७. के तिङ्-प्रत्ययाः?**

एते १८ प्रत्ययाः सन्ति। एते धातुभ्यः युक्ताः भवन्ति। एतदन्तानि पदानि 'तिङन्तानि' इति कथ्यन्ते। एतेषु प्रथमानां नवानां 'परस्मैपद'-संज्ञा, द्वितीयानां नवानां च 'आत्मनेपद'-संज्ञा वर्तते। पुनरपि प्रथमानां त्रयाणां प्रथम-संज्ञा, द्वितीयानां मध्यम-संज्ञा, तृतीयानां त्रयाणां च उत्तम-संज्ञा भवति। क्रियापदेषु विभिन्नान् कालान्, अर्थान्, पुरुषान् च ज्ञापयितुम् एते प्रत्ययाः क्रियन्ते। एते प्रत्ययाः अधो लिख्यन्ते -

| **परस्मैपदम्** | | | |
|---|---|---|---|
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमः** | तिप् | तस् | झि |
| **मध्यमः** | सिप् | थस् | थ |
| **उत्तमः** | मिप् | वस् | मस् |
| **आत्मनेपदम्** | | | |
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमः** | त | आताम् | झ |
| **मध्यमः** | थास् | आथाम् | ध्वम् |
| **उत्तमः** | इड् | वहि | महिङ् |

**उदाहरणम्** - अस्+तिप् = अस्ति। आस्+त = आस्ते। इत्थम् अन्यानि अपि रूपाणि सिध्यन्ति। अन्ये प्रत्ययाः अधः प्रदर्श्यन्ते।

**१०८. के अन्ये प्रत्ययाः?**

अन्ये प्रत्ययाः तादृशाः यैः योगे न प्रकृतिः सिध्यति न वा पदानि। एते द्विविधाः। ते यथा -

१. विकरणानि

२. स्त्री-प्रत्ययाः

**१०९. कानि विकरणानि?**

विकरणानां कोऽपि अर्थः न भवति। एतानि विशिष्ट-परिस्थितौ धातुभ्यः युक्तानि भवन्ति।

**उदाहरणम्** - 'पठति' इत्यत्र 'पठ्' धातुः, 'ति' प्रत्ययः। किन्तु एतौ भागौ विहाय अपि धातु-प्रत्यययोः मध्ये 'अ' वर्तते। एतद् विकरणम्। अधः दत्तया आकृत्या एतद् इतोऽपि स्पष्टं भविष्यति –

**पठति = पठ् + अ + ति**

↑ पठ् – धातुः

↑ अ – विकरणम्

↑ ति – प्रत्ययः

**११०. के स्त्री-प्रत्ययाः?**

अधः द्वयोः स्तम्भयोः वर्तमानानां शब्दानां तुलनाः कुर्वन्तु -

| | |
|---|---|
| चटक | चटका |
| एडक | एडका |
| व्याघ्र | व्याघ्री |
| शुनक | शुनकी |

उभयोः स्तम्भयोः वर्तमानाः शब्दाः न सर्वथा भिन्नाः। 'चटका' इति शब्दे 'चटक'-शब्दात् केवलम् आकारः एव भिन्नः वर्तते। अर्थ-दृष्ट्या एषः आकारः चटक-शब्दे 'स्त्री' इति अधिकम् अर्थं योजयति। तस्मात् 'चटका' = 'चटक-स्त्री'। तथैव 'एडका' = 'एडक-स्त्री'। 'व्याघ्री' = 'व्याघ्र-स्त्री'। 'शुनकी = शुनक-स्त्री'। इत्थं ये प्रत्ययाः 'स्त्री' इति अर्थाधिक्यं वदन्ति ते 'स्त्री'-प्रत्ययाः इति उच्यन्ते। एते प्रत्ययाः प्रातिपदिकेभ्यः आदौ युक्ताः भवन्ति, ततः परम् एव सुप्-प्रत्ययान् योजयित्वा पदानि साध्यन्ते।

# ८.३. समास-विवरणम्

**१११. यथा प्रकृतिः प्रत्ययेन युक्ता भवति तथा किम् एकं पदम् अपरेण पदेन युक्तं भवितुम् अर्हति?**

आम्। एकस्य पदस्य अपरेण पदेन सह योगः भवितुम् अर्हति। द्वयोः अथवा नैकेषां पदानां योगेन यद् नूतनं पदं निष्पन्नं भवति तत् 'समासः' इति उच्यते।

**११२. किं यानि कानि अपि पदानि इत्थं परस्परं युक्तानि भवितुम् अर्हन्ति?**

न। केवलं समर्थानाम् एव पदानां परस्परं योगः भवितुम् अर्हति।

**११३. 'समर्थानाम्' इत्युक्ते किम्?**

'समर्थानाम्' इत्युक्ते 'परस्परम् अन्वितानाम्' अथवा 'परस्परं सम्बन्धवताम्' इति।

**उदाहरणम्** - 'राज्ञः पुरुषः द्वारकां गच्छति' इति वाक्ये 'राज्ञः' तथैव च 'पुरुषः' इत्यनयोः परस्परम् अन्वयः अथवा सम्बन्धः अस्ति। एवं स्थितौ एतयोः पदयोः 'राजपुरुषः' इत्येवं समासः कर्तुं शक्यते। वाक्ये 'राज्ञः' इत्यस्य तादृशः सम्बन्धः 'द्वारकाम्' इति पदेन सह नास्ति। अतः द्वयोः योगेन 'राजद्वारकाम्' इति समासः कर्तुं न शक्यते।

**११४. समासस्य अर्थः कथं ज्ञायते?**

समासस्य श्रवणेन एव प्रायः समासस्य अर्थः ज्ञातः भवति। क्वचित् समासस्य अर्थ-बोधनाय वाक्यस्य अपि प्रयोगः भवति। एतद् वाक्यम् एव 'विग्रहः' इति कथ्यते।

**उदाहरणम्** -

१. 'खड्गहतः' इति समासः। 'खड्गेन हतः' इति तस्य विग्रहः।

२. 'नीलकण्ठः' इति समासः। 'नीलः कण्ठः यस्य सः' इति तस्य विग्रहः।

३. 'यथाशक्ति' इति समासः। 'शक्तिम् अनतिक्रम्य' इति तस्य विग्रहः।

**११५. समासः कतिविधाः?**

समासः पञ्चविधः। तद् यथा -

१. अव्ययीभाव-समासः

२. तत्पुरुष-समासः

३. द्वन्द्व-समासः

४. बहुव्रीहि-समासः

५. केवल-समासः च।

## ८.३.१. अव्ययीभाव-समासः

**११६. कः नाम अव्ययीभाव-समासः?**

अव्ययीभाव-समासे ये द्वे पदे भवतः तयोः प्रायः पूर्वस्य पदस्य अर्थः प्रधानः भवति। अव्ययीभाव-समासाः अव्ययानि भवन्ति। तन्नाम 'च', 'अपि', इत्यादि-शब्दानाम् इव एतेषाम् अपि विभिन्नानि विभक्तिरूपाणि न भवन्ति।

**उदाहरणम्** - 'अनतिक्रमणम्' इत्यस्मिन् अर्थे 'यथा' इत्यस्य पदस्य 'शक्ति', 'मति' इत्यादिभिः पदैः 'यथाशक्ति', 'यथामति' इत्यादयः समासाः कर्तुं शक्यन्ते। 'यथाशक्ति' इत्यत्र 'यथा' इत्येतत् पूर्वत्र दृश्यमानं पदं 'पूर्व-पदम्' इति उच्यते। 'शक्ति' इति उत्तरत्र दृश्यमानं पदम् 'उत्तर-पदम्' इति उच्यते। 'यथाशक्ति' इत्यस्य अर्थः - 'शक्तिम् अनतिक्रम्य' इति। अत्र 'अनतिक्रम्य' इत्यस्य पूर्व-पदस्य अर्थः एव प्रधानः। तस्मात् एषः अव्ययीभाव-समासः इति उच्यते।

## ८.३.२. तत्पुरुष-समासः

**११७. कः नाम तत्पुरुष-समासः?**

तत्पुरुष-समासे ये द्वे पदे भवतः तयोः प्रायः उत्तरस्य पदस्य अर्थः प्रधानः भवति।

**उदाहरणम्** - देवस्य पुत्रः = 'देवपुत्रः' इत्यत्र 'देवस्य' इत्यस्य पदस्य अर्थः तु 'पुत्र' इत्यस्य पदस्य अर्थेन सह अन्वितः भवति। यस्मिन् वाक्ये 'देवपुत्रः' इति समासः प्रयुक्तः भवति तस्य वाक्यस्य क्रियया तु 'पुत्र' इति पदस्य अर्थः एव अन्वितः भवति। अतः अत्र उत्तर-पदस्य अर्थः एव प्रधानः मन्यते। तस्मात् एषः तत्पुरुष-समासः इति उच्यते।

**११८. तत्पुरुष-समासस्य मुख्याः प्रकाराः के?**

एते तत्पुरुष-समासस्य मुख्याः प्रकाराः -

१. द्वितीयादि-विभक्ति-तत्पुरुष-समासः,

२. कर्मधारय-समासः,

३. द्विगु-समासः च।

**११९. कः द्वितीयादि-विभक्ति-तत्पुरुष-समासः?**

द्वितीयान्तेन पदेन अपरस्य पदस्य समासः 'द्वितीया-तत्पुरुष-समासः', तृतीयान्तेन पदेन अपरस्य पदस्य समासः 'तृतीया-तत्पुरुष-समासः'। इत्थं द्वितीया-तत्पुरुष-समासात् प्रभृति सप्तमी-तत्पुरुष-समासाः सिध्यन्ति।

**उदाहरणानि –**

१- द्वितीया-तत्पुरुष-समासः - कृष्णं श्रितः = कृष्णश्रितः। अत्र 'कृष्णम्' इति द्वितीयान्तेन पदेन 'श्रित' इत्यस्य पदस्य समासः अस्ति। तस्मात् एषः 'द्वितीया-तत्पुरुष-समासः।

२- तृतीया-तत्पुरुष-समासः - गुडेन मिश्रः = गुडमिश्रः।

३- चतुर्थी-तत्पुरुष-समासः - काकाय बलिः = काकबलिः।

४- पञ्चमी-तत्पुरुष-समासः - चोरात् भयम् = चोरभयम्।

५- षष्ठी-तत्पुरुष-समासः - वृक्षस्य शाखा = वृक्षशाखा।

६- सप्तमी-तत्पुरुष-समासः - शास्त्रे पण्डितः = शास्त्रपण्डितः।

**१२०. कः कर्मधारय-समासः?**

द्वयोः समानविभक्तिकयोः पदयोः समासः 'कर्मधारय-समासः' इति उच्यते।

**उदाहरणम्** - नीलम् कमलम् = नीलकमलम्। अत्र 'नील' इति प्रथमान्तस्य 'कमल' इति प्रथमान्तेन पदेन समासः वर्तते। द्वे अपि पदे समानविभक्तिके। अतः एषः कर्मधारयसमासः इति उच्यते।

**१२१. कः द्विगु-समासः?**

तत्पुरुष-समासे यत्र पूर्वपदं संख्या भवति सः 'द्विगु-समासः' इति उच्यते।

**उदाहरणम्** - सप्त च इमे ऋषयः = सप्तर्षयः। 'सप्तर्षयः' इति समासे पूर्वं पदं 'सप्त'-संख्या वर्तते। तस्मात् एषः द्विगु-समासः।

## ८.३.४. द्वन्द्व-समासः

**१२२. कः नाम द्वन्द्व-समासः?**

यत्र समासे वर्तमानानां सर्वेषां पदानाम् अर्थाः प्रधानाः भवन्ति सः द्वन्द्व-समासः इति उच्यते।

**उदाहरणम्** - रामः च लक्ष्मणः च = रामलक्ष्मणौ। यदा वाक्ये एतादृशस्य समासस्य प्रयोगः भवति तदा समासस्थयोः द्वयोः अपि पदयोः अर्थौ वाक्यस्थस्य क्रियापदस्य अर्थेन समानतया अन्वितौ भवतः। तस्मात् एषः द्वन्द्वसमासः।

## ८.३.५. बहुव्रीहि-समासः

**१२३. कः नाम बहुव्रीहि-समासः?**

यत्र समासे वर्तमानयोः द्वयोः अपि पदयोः अर्थौ गौणौ भवतः, ताभ्यां मिलित्वा ज्ञाप्यमानस्य अन्यस्य पदस्य अर्थः च प्रधानः भवति, सः बहुव्रीहि-समासः।

**उदाहरणम्** - दश आननानि (=मुखानि) यस्य सः = दशाननः। अत्र वयं पश्यामः यत् 'दशानन' इत्यस्मिन् समासे 'दश' तथा च 'आनन' इति ये द्वे पदे प्रयुक्ते, तयोः अर्थौ गौणौ। द्वाभ्यां मिलित्वा ज्ञापितम् अन्यत् पदं 'रावणः'। अस्य अन्य-पदस्य अर्थः प्रधानः अस्ति। एतादृशः समासः 'बहुव्रीहि-समासः' इति कथ्यते।

## ८.३.६. केवल-समासः

**१२४. कः नाम केवल-समासः?**

यः समासः उपरि उक्तेषु चतुर्षु अपि समास-प्रकारेषु अन्तर्भावयितुं न शक्यते सः 'केवल-समासः' इति उच्यते।

**उदाहरणम्** -जातः एव = जातमात्रः, पूर्वं भूतः = भूतपूर्वः इत्यादयः नैके समासाः संस्कृते प्रयुज्यन्ते। उपर्युक्त-समास-प्रकारेषु कस्यापि प्रकारस्य लक्षणानि अत्र न सन्ति। अतः एतादृशाः समासाः 'केवल-समासाः' इति उच्यन्ते।

**१२५. येषां पदानाम् अर्थाः परस्परम् अन्विताः/सम्बद्धाः भवन्ति किं तेषां समासः अनिवार्यः?**

एवं स्थितौ क्वचित् समासः अनिवार्यः भवति, किन्तु प्रायः वाक्यम् अपि कर्तुं शक्यते।

**उदाहरणम्** - 'दशरथपुत्रः गच्छति' इत्यस्य स्थाने 'दशरथस्य पुत्रः गच्छति' इत्यपि वक्तुं शक्यते।

## ८.४. वाक्योपदेश-विवरणम्

**१२६. किं नाम वाक्यम्?**

एकेन क्रियापदेन युक्तः परस्परम् अन्वितानां पदानां समूहः वाक्यम्।

उदाहरणम् - 'बालः आम्रं खादति' इत्यत्र 'खादति' इति एकं क्रियापदं वर्तते। 'बालः' इति पदं 'खादति' इति क्रियायाः कर्ता। अतः 'बालः' इति पदं खादन-क्रियायां कर्तृत्वेन अन्वेति। 'खादति' इति क्रियायाः प्रभावः आम्रे भवति। खादन-क्रियायाः कारणेन आम्रं निरन्तरं क्षीणं भवति। अतः आम्रं खादन-क्रियायां कर्मत्वेन अन्वेति। इत्थं वाक्ये वर्तमानानि सर्वाणि पदानि परस्परं सम्बद्धानि सन्ति। अतः 'बालः आम्रं खादति' इत्येतत् 'वाक्यम्' इति उच्यते।

**१२७. वाक्ये वर्तमानानां पदानां परस्पर-सम्बन्धः कति-प्रकारकः?**

बोध-सौकर्याय एतादृशः सम्बन्धः द्वि-प्रकारकः इति वक्तुं शक्यते। तौ प्रकारौ यथा -

१. वाक्यस्थ-पदानां क्रियया सह सम्बन्धः

२. वाक्यस्थ-पदानाम् इतरैः पदैः सह सम्बन्धः

## ८.४.१. कारक-विवरणम्

**१२८. कः वाक्यस्थ-पदानां क्रियया सह सम्बन्धः?**

१२६ तमे प्रश्ने 'बालः आम्रं खादति' इति वाक्ये 'बालः' इत्यस्य पदस्य 'आम्रम्' इत्यस्य च पदस्य 'खादति' इति क्रियया सह सम्बन्धः कथम् अस्ति इति प्रदर्शितम्। एषः एव वाक्यस्थ-पदानां क्रियया सह सम्बन्धः। एषः सम्बन्धः एव 'कारकम्' इति उच्यते।

**१२९. कारकाणि कतिविधानि?**

कारकाणि षड्विधानि। तानि यथा -

१. कर्ता / कर्तृ-कारकम्

२. कर्म / कर्म-कारकम्

३. करणम् / करण-कारकम्

४. सम्प्रदानम् / सम्प्रदान-कारकम्

५. अपादानम् / अपादान-कारकम्

६. अधिकरणम् / अधिकरण-कारकम्

**१३०. किं नाम कर्तृ-कारकम्?**

वाक्ये वर्तमानया क्रियया सह यः कर्तृत्वेन अन्वेति तत् कर्तृ-कारकम्।

**उदाहरणम्** - 'रामः काव्यं पठति' इत्यत्र 'पठति' इति क्रिया। 'रामः' च पठन-क्रियां करोति। तस्मात् 'रामः' कर्ता।

**१३१. किं नाम कर्म-कारकम्?**

कर्ता क्रियया यत् प्राप्तुम् इच्छति तत् कर्म-कारकम् इति उच्यते। **उदाहरणम्** - 'बालः आम्रं खादति' इत्यत्र 'बालः' कर्ता। सः 'खादन'-क्रियां करोति। खादन-क्रियया सः 'आम्रस्य' आस्वादम् आप्तुम् इच्छति। तस्मात् आम्रं 'कर्म-कारकम्' इति उच्यते।

**१३२. किं नाम करण-कारकम्?**

क्रियायाः सिद्धौ यत् अत्यन्तम् उपकारकं भवति तत् करण-कारकम् इति उच्यते।

**उदाहरणम्** - 'बालः हस्तेन आम्रं खादति' इत्यत्र खादन-क्रियायाः सिद्धौ 'हस्तः' अतीव उपकारकः। तस्मात् हस्तः 'करण-कारकम्' इति उच्यते।

**१३३. किं नाम सम्प्रदान-कारकम्?**

कर्ता दानक्रियायाः कर्मणा यं सम्बन्धुम् इच्छति तत् 'सम्प्रदान-कारकम्' इति उच्यते।

**उदाहरणम्** - 'राजा विप्राय धनं ददाति' इति वाक्ये दान-क्रियायाः कर्ता 'राजा'। 'धनं' कर्म। राजा दानक्रियायाः कर्मभूतेन धनेन 'विप्रं' सम्बन्धुम् इच्छति। तस्मात् विप्रः 'सम्प्रदान-कारकम्' इति उच्यते।

**१३४. किं नाम अपादान-कारकम्?**

यत्र द्वयोः वियोगे एकः स्थिरः एकः च चलः, तत्र स्थिरम् 'अपादान-कारकम्' इति उच्यते।

**उदाहरणम्** - 'वृक्षात् फलं पतति' इत्यत्र पतनात् पूर्वं फल-वृक्षयोः संयोगः आसीत्। पतन-काले द्वयोः वियोगः अभवत्। पतन-क्रिया फले अस्ति। अतः फलं चलम्। वृक्षः तु स्थिरः। तस्मात् अत्र वृक्षः 'अपादान-कारकम्' इति उच्यते।

**१३५. किं नाम अधिकरण-कारकम्?**

क्रियायाः आधारः 'अधिकरण-कारकम्' इति उच्यते।

**उदाहरणम्** - 'रामः कटे उपविशति' इत्यत्र उपवेशन-क्रियायाः आधारः 'कटः' अस्ति। तस्मात् कटः 'अधिकरण-कारकम्' इति उच्यते।

## ८.४.२. कारकेतर-सम्बन्ध-विवरणम्

**१३६. वाक्यस्थ-पदानां क्रियायाः इतरैः पदैः सह सम्बन्धः किंस्वरूपः?**

'अयोध्यायाः महाराजः विप्राय धेनुं ददाति' इति वाक्यं दृश्यताम्। अत्र 'ददाति' इति क्रिया। 'महाराजः' दान-क्रियां करोति। तस्मात् महाराजः 'कर्ता'। 'अयोध्यायाः' दान-क्रियया सह साक्षात् सम्बन्धः नास्ति। अयोध्यायाः सम्बन्धः तु महाराजेन सह अस्ति। 'महाराजः अयोध्यायाः विप्राय धेनुं ददाति' इत्यत्र अयोध्यायाः सम्बन्धः विप्रेण सह अस्ति। 'महाराजः विप्राय अयोध्यायाः धेनुं ददाति' इत्यत्र अयोध्यायाः सम्बन्धः धेन्वा सह अस्ति। अयम् एव अस्ति 'वाक्यस्थ-पदानां क्रियायाः इतरैः पदैः सह सम्बन्धः'।

## ८.४.३. प्रत्ययैः वाक्यस्थ-पदानां परस्पर-सम्बन्ध-बोधकत्वम्

**१३७. वाक्ये वर्तमानानां पदानां परस्पर-सम्बन्धः कथं बोधितः भवति?**

वाक्ये वर्तमानानां पदानां परस्पर-सम्बन्धः प्रायेण 'पद-साधकैः प्रत्ययैः' बोधितः भवति (के पद-साधकाः प्रत्ययाः? इति १०४तमे प्रश्ने दृश्यताम्)।

**१३८. एतेषु के प्रत्ययाः कानि कारकाणि बोधयन्ति?**

एतत् अधस्तन-कोष्ठकेन स्पष्टीभवति -

| **कारकाणि** | **बोधकाः प्रत्ययाः** | **उदाहरणम्** |
|---|---|---|
| कर्ता | तिङ्-प्रत्ययाः / तृतीया विभक्तिः | बालः आम्रं खादति। (अत्र 'ति'-प्रत्ययः कर्तृकारकं बोधयति) बालेन आम्रं खाद्यते।(अत्र 'इन'इति तृतीया-विभक्तिप्रत्ययः कर्तृकारकं बोधयति) |
| कर्म | तिङ्-प्रत्ययाः / द्वितीया विभक्तिः | बालेन मोदकः खाद्यते। (अत्र 'ते'-प्रत्ययः कर्मकारकं बोधयति) बालः मोदकं खादति। (अत्र 'अम्' इति द्वितीया-विभक्तिप्रत्ययः कर्मकारकं बोधयति) |
| करणम् | तृतीया विभक्तिः | योद्धा खड्गेन युद्धं करोति। |
| सम्प्रदानम् | चतुर्थी विभक्तिः | राजा विप्राय धेनुं ददाति। |
| अपादानम् | पञ्चमी विभक्तिः | वृक्षात् फलं पतति। |
| अधिकरणम् | सप्तमी विभक्तिः | बालः कटे उपविशति। |

**१३९. के प्रत्ययाः वाक्यस्थ-पदानां क्रियायाः इतरैः पदैः सह सम्बन्धान् बोधयन्ति?**

प्रायः सुप्-प्रत्ययाः वाक्यस्थ-पदानां क्रियायाः इतरैः पदैः सह सम्बन्धान् बोधयन्ति। अधस्तन-कोष्ठके एतादृशानि कतिचित् उदाहरणानि प्रस्तूयन्ते–

| **सम्बन्धः** | **बोधकः प्रत्ययः** | **उदाहरणम्** |
|---|---|---|
| स्व-स्वामिभावादि-सम्बन्धाः | षष्ठी विभक्तिः | मगधस्य राजा यजति। (स्व-स्वामि-भावः) वृक्षस्य शाखा पतति। (अवयवावयवि-भावः) सुवर्णस्य कुण्डलं शोभते। (प्रकृति-विकृति-भावः) |

| | | |
|---|---|---|
| 'उभयतः' इति अव्ययेन योगः | द्वितीया विभक्तिः | नदीम् उभयतः वृक्षाः सन्ति। |
| 'सह' इति अव्ययेन योगः | तृतीया विभक्तिः | रामेण सह सीता वनं गच्छति। |
| 'नमः' इति अव्ययेन योगः | चतुर्थी विभक्तिः | देवाय नमः अस्तु। |
| 'ऋते' इति अव्ययेन योगः | पञ्चमी विभक्तिः | ज्ञानात् ऋते मुक्तिः नास्ति। |
| 'कुशल'-शब्देन योगः | सप्तमी विभक्तिः | विप्रः हरिपूजने कुशलः अस्ति। |

**१४०. प्रथमा विभक्तिः वाक्यस्थ-पदानां कं सम्बन्धं बोधयति?**

प्रातिपदिकेभ्यः प्रथमा-विभक्ति-प्रत्ययानां योजनेन पदानि एव सिद्धानि भवन्ति, एषा विभक्तिः वाक्ये एकस्य पदस्य अपरेण पदेन कमपि सम्बन्धं न बोधयति।

* * *

# चतुर्थं प्रकरणम्

# पुराण-विवरणम्

## १. पुराण-शब्दस्य व्युत्पत्तिः अर्थः च

तुलसीकाननं यत्र यत्र पद्मवनानि च।
पुराणपठनं यत्र तत्र सन्निहितो हरिः॥ - (श्रीमार्कण्डेय-पुराणम्)

१. **किं नाम पुराणम्?**
"पुरा अर्थेषु आनयति इति पुराणमिति"- पद्म-पुराणे कथितम्।

२. **पद्म-पुराणे कथितम् इति उक्तम्; तर्हि अन्यत्र कुत्र पुराण-व्युत्पत्तिः अर्थः च कथितः?**
पुराणस्य व्युत्पत्तिः अर्थः च वायु-पुराणे, ब्रह्माण्ड-पुराणे, मत्स्य-पुराणे, महाभारते च महर्षि-व्यासेन कथितः ।

३. **महर्षि-व्यासेन कथितः इति उक्तम्; तर्हि अन्येन केन पुराणस्य व्युत्पत्तिः अर्थः च प्रोक्तः?**
सायणाचार्येण, यास्काचार्येण, पाणिनि-मुनिना, मधुसूदन-सरस्वतिना, राजशेखरेण चापि पुराण-व्युत्पत्तिः अर्थः च प्रोक्तः ।

४. **वायु-पुराणे पुराणस्य व्युत्पत्तिः अर्थः च कः उक्तः?**
वायु-पुराणे उक्तं यत् "पुरा परम्परां वक्ति पुराणं तेन वै स्मृतम्" इति। तन्नाम यत्र प्राचीन-परम्परायाः वर्णनम् उपलभ्यते तत् पुराणम्।

५. **ब्रह्माण्ड-पुराणे पुराणस्य व्युत्पत्तिः अर्थः च कः उक्तः?**
ब्रह्माण्ड-पुराणे उक्तं यत् –
"यस्मात् पुराह्यभूच्चैतत् पुराणं तेन तत्स्मृतम् ।
निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते"॥ इति।
तन्नाम यत्र प्राचीनानां घटनानां वर्णनम् उपलभ्यते तत् पुराणम् ।

**६. मत्स्य-पुराणे पुराणस्य व्युत्पत्तिः अर्थः च कः उक्तः?**

"पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः" इति मत्स्य-पुराणे उक्तम्। तन्नाम यत्र प्राचीनानां विदुषाम् ऋषीणां च विचाराः प्रकल्पिताः तत् पुराणम् इति बुधाः वदन्ति।

**७. महाभारते पुराणस्य व्युत्पत्तिः अर्थः च कः उक्तः?**

"पुराणमाख्यानं पुराणम्" इति महाभारते उक्तम्। अर्थात् प्राचीनम् आख्यानम् एव पुराणम्।

**८. सायणाचार्येण उक्तः पुराणस्य व्युत्पत्तिः अर्थः च कः?**

"पुराणं पुरातन-वृत्तान्त-कथन-रूपम् आख्यानम् अथवा जगतः प्रागवस्थाम् अनुक्रम्य सर्ग-प्रतिपादकं वाक्यजातं पुराणम्" इति। अर्थात् जगतः उत्पत्तेः विकास-क्रमः, विवरणं च यत्र प्राप्यते तद् 'पुराणम्' इति उच्यते।

**९. यास्काचार्येण उक्तः पुराणस्य व्युत्पत्तिः अर्थः च कः?**

"पुरा नवं भवति" इति यास्काचार्येण उक्तम्। अर्थात् प्राचीनत्वे अपि नवीनत्वं तत् पुराणत्वम्।

**१०. पाणिनि-मुनिना उक्तः पुराणस्य व्युत्पत्तिः अर्थः च कः?**

पाणिनिमुन्यनुसारम् 'पुरा भवमिति पुराणम्' इति। अर्थात् यत् पूर्वम् अभवत् तत् पुराणम् ।

**११. मधुसूदनसरस्वतिना उक्तः पुराणस्य व्युत्पत्तिः अर्थः च कः?**

"विश्वसृष्टेरितिहासः पुराणम्" इति मधुसूदनसरस्वतिना उक्तम्। सम्पूर्ण-विश्वस्य इतिहासः यत्र वर्णितः तत् पुराणम् इति।

**१२. आचार्येण राजशेखरेण उक्तः पुराणस्य व्युत्पत्तिः अर्थः च कः?**

"वेदाख्यानोपनिबन्धप्रायं पुराणम्" इति आचार्येण राजशेखरेण उक्तम्। तन्नाम वेदाख्यानानां निबन्धनं यत्र कृतं तत् पुराणम् इति ।

## २. पुराणानां रचनाकालः

**१३. पुराणानां रचना कदा जाता?**

तत् पुराणं वेदैः सह सञ्जातम् इति अथर्व-वेदस्य मन्त्रे उक्तम् -

ऋचः सामानि छन्दांसि पुराणं यजुषा सह।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिवि श्रिताः॥ (अथर्ववेद-११/७/२४)
एतेन ज्ञायते यत् वेदैः सह एव पुराणस्य उत्पत्तिः जाता।

**१४. अथर्व-वेदे उक्तम् इति ज्ञातम्; अन्यत्र कुत्र कुत्र पुराण-रचना-कालस्य उल्लेखः अस्ति?**

गोपथ-ब्राह्मणे, शतपथ-ब्राह्मणे, बृहदारण्यके, छान्दोग्योपनिषदि, आपस्तम्ब-धर्मसूत्रे, हर्षचरिते च पुराण-रचनाकालस्य उल्लेखः अस्ति।

**१५. गोपथ-ब्राह्मणे पुराण-रचना-कालस्य विषये किम् उक्तम्?**

"एवम् इमे सर्वे वेदा निर्मिताः सकल्पाः सरहस्याः सब्राह्मणाः सोपनिषत्काः सेतिहासाः सान्वयाख्याताः सपुराणाः सस्वराः" इति (गोपथ-ब्राह्मणम्-प्रपाठक-२)।
विश्व-सृष्टेः इतिहासः एव 'पुराणम्'। इत्थम् उपरि 'सेतिहासाः' इति शब्दात् 'पुराणम्' इति अर्थः ग्रहीतुं शक्यते।

**१६. शतपथ-ब्राह्मणे पुराण-रचना-कालस्य विषये किम् उक्तम्?**

"सोऽयमिति किञ्चित् पुराणमाचक्षीत" इति। (शतपथ-ब्राह्मणम्-१३/४/३/१३ ) तन्नाम वेदे यद् उक्तं तदेव सरल-भाषया पुराणे कथितं वर्तते।

**१७. बृहदारण्यके पुराण-रचना-कालस्य विषये किम् उक्तम्?**

"इतिहासः पुराणं विद्या उपनिषदः" इति। (बृहदारण्यकम्-२/४/११) तन्नाम वैदिक-काले एव पुराणम् अपि विद्यात्वेन प्रतिष्ठितम् आसीत्।

**१८. छान्दोग्योपनिषदि पुराण-रचना-कालस्य विषये किम् उक्तम्?**

"इतिहास-पुराणं पञ्चमं वेदानां वेदम्" इति छान्दोग्योपनिषदि उक्तम्। तन्नाम पुराणं पञ्चमः वेदः एव अस्ति।

**१९. आपस्तम्ब-धर्मसूत्रे पुराण-रचना-कालस्य विषये किम् उक्तम्?**

"अथ पुराणे श्लोकानुदाहरन्ति, अष्टाशीतिसहस्राणि" इति आपस्तम्ब-धर्मसूत्रे उक्तम्। एतेन ज्ञायते यत् धर्म-सूत्र-रचनाकाले अपि पुराणानां श्लोक-रचना प्रवर्तते स्म।

**२०. महाकविना बाणभट्टेन विरचिते हर्षचरिते पुराण-रचना-कालस्य विषये किम् उक्तम्?**

"पुराणे वायु-प्रलपितमिति" महाकविना बाणभट्टेन विरचिते हर्षचरिते उक्तम्। तन्नाम पुराणानि वायुना कथितानि सन्ति।

## ३. पुराणानां संख्या

**२१. पुराणानां व्युत्पत्तिः, अर्थः, कालः च उक्तः अधुना पुराणानि कति सन्ति इति पश्यामः -**
अष्टादश पुराणानि सन्ति ।

**२२. कानि अष्टादश पुराणानि?**
'म-द्वयं भ-द्वयञ्चैव ब्र-त्रयं व-चतुष्टयम् ।
अ-ना-प-लिङ्-ग-कू-स्कानि पुराणानि प्रचक्षते॥ इति श्रीमद्-देवी-भागवते उक्तम्।

अत्र प्रत्येकं पुराणस्य आदिमम् अक्षरं गृहीतं वर्तते। पुराणानां श्लोक-संख्या श्रीमद्-भागवत-महापुराणे उल्लिखिता वर्तते। द्वयोः आधारेण पुराणानां नामानि, श्लोक-संख्या च अधस्तन-कोष्ठके प्रस्तूयते -

| **पुराण-नामानि** | **श्लोक-संख्या** |
|---|---|
| मत्स्य-पुराणम् | १४,००० |
| मार्कण्डेय-पुराणम् | ९,००० |
| श्रीमद्भागवत-महापुराणम् | १८,००० |
| भविष्य-पुराणम् | १४,५०० |
| ब्रह्म-पुराणम् | १०,००० |
| ब्रह्माण्ड-पुराणम् | १२,००० |
| ब्रह्मवैवर्त-पुराणम् | १८,००० |
| विष्णु-पुराणम् | २३,००० |
| वायु-पुराणम् | २४,००० |
| वामन-पुराणम् | १०,००० |
| वराह-पुराणम् | २४,००० |

| | |
|---|---|
| अग्नि-पुराणम् | १५,४०० |
| नारद-पुराणम् | २५,००० |
| पद्म-पुराणम् | ५५,००० |
| लिङ्ग-पुराणम् | ११,००० |
| गरुड-पुराणम् | १९,००० |
| कूर्म-पुराणम् | १७,००० |
| स्कन्द-पुराणम् | ८१,१०० |
| आहत्य श्लोक-संख्या - | ४,००,००० |

## ४. पुराणानां लक्षणानि

**२३. पुराणस्य कति लक्षणानि?**

पुराणास्य पञ्च लक्षणानि सन्ति।

**२४. पुराणस्य तानि पञ्च लक्षणानि कानि?**

एतद्-विषये विष्णुपुराणे उक्तं यत् -

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम्॥

एतदाधारेण पुराणास्य पञ्च लक्षणानि यथा १. सर्गः, २. प्रतिसर्गः, ३.वंशः, ४. मन्वन्तराणि, ५. वंशानुचरितं चेति।

**२५. पञ्चसु लक्षणेषु सर्गः कः?**

मूल-प्रकृतौ त्रिगुण-विक्षोभात् जगतः विविध-पदार्थानाम् उत्पत्तिः एव 'सर्गः' अर्थात् 'सृष्टिः' इति उच्यते।

**२६. पञ्चसु लक्षणेषु प्रतिसर्गः कः?**

प्रलयः, सृष्टेः पुनःप्रादुर्भावःच'प्रतिसर्गः' इति उच्यते।

**२७. पञ्चसु लक्षणेषु वंशः कः?**

देवानाम्ऋषीणांचकुल-परम्पराणांवर्णनम्एव'वंशः' इति उच्यते।

**२८. पञ्चसु लक्षणेषु मन्वन्तरम् किम्?**

मनोः, मनु-पुत्राणां, देवतायाः, इन्द्रस्य, ऋषेः, भगवतः अंशावताराणां चेति एतेषां षण्णां वर्णनं "मन्वतरम्" इति उच्यते। मन्वन्तरं नाम कालस्य गणना, परिमाणं वा। एकस्मात् मनोः अपर-मनु-पर्यन्तं यः कालः भवति सः 'मन्वन्तरम्' इति उच्यते। आहत्य चतुर्दश मन्वन्तराणि सन्ति।

**२९. तानि चतुर्दश मन्वन्तराणि कानि?**

तानि चतुर्दश मन्वन्तराणि यथा -

| | | | |
|---|---|---|---|
| १. स्वायम्भुवम् | २. स्वरोचिषम् | ३. औत्तमम् | ४. तामसम् |
| ५. रैवतम् | ६. चाक्षुषम् | ७. वैवस्वतम् | ८. सावर्णि |
| ९. दक्ष-सावर्णि | १०. ब्रह्म-सावर्णि | ११. धर्म-सावर्णि | १२. रुद्र-सावर्णि |
| १३. देव-सावर्णि | १४. इन्द्र-सावर्णि | | |

**३०. पञ्चसु लक्षणेषु वंशानुचरितं किम्?**

विभिन्न-वंशेषु उत्पन्नानां महर्षीणां राजर्षीणां चचरित्र-वर्णनं,वंश-परम्परा-वर्णनं च'वंशानुचरितम्' इति कथ्यते ।

## ५. महापुराणस्य लक्षणानि

**३१. महापुराणस्य कति लक्षणानि सन्ति?**

अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः॥ (श्रीमद्भागवतम्-२/१०/०१)

अथ च

सर्गश्चाथ विसर्गश्च वृत्तिरक्षान्तराणि च ।
वंशो वंशानुचरितं संस्था हेतुरपाश्रयः॥ (श्रीमद्भागवतम्-१२/०७/०९)

इति कथनानुसारं महापुराणस्य दश लक्षणानि भवन्ति। तानि यथा -

| श्रीमद्-भागवतस्य | | |
|---|---|---|
| क्रमः | द्वितीय-स्कन्धानुसारम् | द्वादश-स्कन्धानुसारम् |
| १ | सर्गः | सर्गः |
| २ | विसर्गः | विसर्गः |
| ३ | स्थानम् | वृत्तिः |
| ४ | पोषणम् | रक्षा |
| ५ | ऊतयः | अन्तराणि |
| ६ | मन्वन्तरम् | वंशः |
| ७ | ईशानुकथा | वंशानुचरितम् |
| ८ | निरोधः | संस्था |
| ९ | मुक्तिः | हेतुः |
| १० | आश्रयः | अपाश्रयः |

(सर्गः, प्रतिसर्गः अर्थात् 'संस्था', अन्तराणि नाम 'मन्वन्तराणि', वंशः, वंशानुचरितं चेति महापुराणस्य दशसु लक्षणेषु एतानि पञ्च लक्षणानि उपरि२४तमे प्रश्ने 'पुराण-पञ्च-लक्षणे' ज्ञातानि एव)

**३२. महापुराणस्य दशसु लक्षणेषु 'विसर्गः' कः?**

पुरुषानुगृहीतानामेतेषां वासनामयः।
विसर्गोऽयं समाहारो बीजाद्बीजं चराचरम्॥

(श्रीमद्-भागवत-महापुराणे १२/७/१२)

यथा बीजात् बीजं जायते तथैव जीवेभ्यः जीवानाम् उत्पत्तिः एव 'विसर्गः' इति उच्यते।

**३३. महापुराणस्य दशसु लक्षणेषु 'वृत्तिः' का?**

वृत्तिर्भूतानि भूतानां चराणामचराणि च।
कृता स्वेन नृणां तत्र कामाच्चोदनयापि वा॥

(श्रीमद्-भागवत-महापुराणे १२/७/१३)

अर्थात् सर्वेषां जीवानां जीवन-यापनाय चराचर-पदार्थानाम् उपयोगिता 'वृत्तिः' इति उच्यते।

**३४. महापुराणस्य दशसु लक्षणेषु 'रक्षा' का?**

रक्षाऽच्युतावतारेहा विश्वस्यानु युगे युगे।
तिर्यङ्मर्त्यर्षिदेवेषु हन्यन्ते यैस्त्रयीद्विषः॥

(श्रीमद्-भागवत-महापुराणे १२/७/१४)

रक्षायाः सम्बन्धः परब्रह्मणा परमात्मना सह विद्यते। भगवतः युगे युगे धर्म-रक्षार्थम् अंशावतारः एव 'रक्षा' इति उच्यते।

**३५. महापुराणस्य दशसु लक्षणेषु 'हेतुः' कः?**

हेतुर्जीवोऽस्यसर्गादेरविद्याकर्मकारकः।
यं चानुशयिनं प्राहुरव्याकृतमुतापरे॥ (श्रीमद्-भागवत-महापुराणे १२/७/१८)

'हेतुः' इति पदम् अत्र जीवानां कृते प्रयुक्तम्। जीवः स्वीयेन दृष्टादृष्ट-कर्मणा विश्वस्य, सृष्टेः तथा प्रलयस्य कारणम् अस्ति, अतः जीवः 'हेतुः' इति उच्यते।

**३६. महापुराणस्य दशसु लक्षणेषु 'अपाश्रयः' कः?**

व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु।
मायामयेषु तद्ब्रह्म जीववृत्तिस्वपाश्रयः॥ (श्रीमद्-भागवत-महापुराणे १२/७/१९)

सर्वेषां जीवानाम् आश्रय-स्थानं परब्रह्म वर्तते। तस्मात् परब्रह्म एव 'अपाश्रयः' इति उच्यते।

## ६. पुराणानां कर्ता

**३७. पुराणानां कर्ता कः?**

पुराणानां कर्ता महर्षिः व्यासः वर्तते।

**३८. महर्षेः व्यासस्य अन्यानि नामानि कानि?**

महर्षेः व्यासस्य अन्यानि नामानि 'कृष्णः', 'द्वैपायनः', 'वेदव्यासः','बादरायणः', 'पाराशरः', 'पाराशर्यः', 'सत्यवतीसुतः', 'माठरः', 'कानीनः', 'सत्य-भारतः', 'सत्यवतः', 'सत्यरतः' इत्यादीनि सन्ति।

**३९. पुराण-कर्तुः महर्षेः व्यासस्य प्रमुखानां नाम्नां रहस्यं किम्?**

| नाम | नाम्नः रहस्यम् |
|---|---|
| कृष्णः | महर्षेः शरीरं श्याम-वर्णम् आसीत्। अतः सः 'कृष्णः'। |
| द्वैपायनः | महर्षेः जन्म द्वीपे जातम्। अतः सः 'द्वैपायनः'। |
| वेदव्यासः | महर्षिः वेदानां विस्तारं कृतवान्। अतः सः 'वेद-व्यासः। उक्तम् अपि - 'विव्यास वेदान् यस्मात् स तस्माद्व्यास इति स्मृतः' (श्रीमहाभारते आदिपर्वणि ६६.८८) |
| बादरायणः | महर्षिः बदरि-वने पुराणानां रचनां कृतवान्। अतः सः 'बादरायणः'। |
| पाराशरः/ पाराशर्यः | सः महर्षेः पराशरस्य पुत्रः आसीत्। अतः 'पाराशरः' तथा च 'पाराशर्यः' इति नाम्नी प्राप्तवान्। |
| सत्यवतीसुतः/ सत्यवतः | महर्षिः मातुः सत्यवत्याः पुत्रः आसीत्। अतः सः 'सत्यवतीसुतः' तथा च 'सत्यवतः' इति नामभ्यां ख्यातः। |

**४०. महर्षेः कृष्ण-द्वैपायन-व्यासस्य नाम्नाम् उल्लेखः कुत्र प्राप्यते?**

महर्षेः कृष्णद्वैपायनव्यासस्य नाम्नाम् उल्लेखः शिव-पुराणे वायु-संहितायां प्राप्यते। तद्यथा-

द्वापरे समनुप्राप्ते तृतीये युगपर्यये ।
जातः पराशराद्योगी वासव्यां कलया हरेः॥
द्वीपे तु बदरीप्राये बादरायणमच्युतम्।
द्वीपे जातो यतो बालस्तेन द्वैपायनोऽभवत्॥
वेदशाखाविभजनाद्वेदव्यासः प्रकीर्त्तितः।
व्यासनाम्ना चरत्यस्मिन्नवतीर्य महीतले॥
स पुनर्द्वापरे चास्मिन् कृष्णद्वैपानाख्यया।
अरण्यमिव हव्याशी सत्यवत्यामजायत॥
संक्षिप्त स पुनर्वेदांश्चतुर्धा कृतवान् मुनिः।
वेदभ्यस्ततया लोके वेदव्यासः इति श्रुतः॥ - (शिवपुराणे वायुसंहिता-०१/३४-३८)

**४१. उपरि, "स पुनर्द्वापरे जातः" इति उक्तम्। तर्हि पुराणानुसारं कति व्यासाः सन्ति? के च ते?**

पुराणानुसारम् अष्टाविंशतिः व्यासाः सन्ति। ते यथा -

| | | | |
|---|---|---|---|
| १. ब्रह्मा | ८. वसिष्ठः | १५. त्र्य्यारुणः | २२. वाजश्रवा |
| २. प्रजापतिः | ९. सारस्वतः | १६. धनञ्जयः | २३. तृणबिन्दुः |
| ३. शुक्राचार्यः | १०. त्रिधामा | १७. कृतञ्जयः | २४. ऋक्षः (वाल्मीकिः) |
| ४. बृहस्पतिः | ११. विलिखः | १८. जयः | २५. शक्तिः |
| ५. सूर्यः | १२. भरद्वाजः | १९. भारद्वाजः | २६. पराशरः |
| ६. मृत्युः | १३. अन्तरीक्षः | २०. गौतमः | २७. जातुकर्णः |
| ७. इन्द्रः | १४. वर्णी | २१. अर्यमा | २८. कृष्णः द्वैपायनः व्यासः |

एतावतः विस्तृतस्य साहित्यस्य रचनया श्रीव्यासः मानवेषु महान्तम् उपकारम् अकरोत्। अस्मिन् संसारे न कोऽपि विषयः तादृशः वर्तते यस्य परामर्शः व्यास-रचनासु न जातः। तस्मात् 'व्यासोच्छिष्टं जगत् सर्वम्' इति अभियुक्तानाम् उक्तिः स्थाने एव। श्रीव्यासस्य महान् परिश्रमः अयं समग्राम् अपि मानव-जातिम् उपकृतवान्। तस्मात् एव श्रीव्यासस्य वन्दनाम् इत्थं कुर्वन्ति -

नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायतपत्रनेत्र।
येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः॥

अपि च -

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः।
अभाललोचनः शम्भुर्भवान् बादरायणः॥

तथा च -

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः॥

**४२. श्रीव्यासस्य जन्म कदा जातम्?**

वैवस्वत-मन्वन्तरे द्वापर-युगे श्रीकृष्णाविर्भावात् प्राक् श्रीवेदव्यासस्य सत्यवती-पराशराभ्यां जन्म

जातम्। आषाढमासस्य शुक्ल-पक्षस्य पूर्णिमायां अस्य महर्षेः जन्म जातम् इति श्रद्धया अद्यापि इयं तिथिः 'व्यास-पूर्णिमा' अथवा 'गुरु-पूर्णिमा' इति नाम्ना पाल्यते। परमगुरोः श्रीव्यासस्य स्मरण-पूर्वकम् अद्यापि अस्यां तिथौ शिष्याः स्वान् स्वान् गुरून् पूजयन्ति।

## ७. उपपुराणानि

**४३. कानि उपपुराणानि?**

केषाञ्चन विदुषाम् इदं मतं वर्तते यत् पुराणानां लक्षणेषु पञ्चभिः लक्षणैः युक्तानि यानि पुराणानि भवन्ति तानि 'उपपुराणानि' इति उच्यन्ते।

**४४. उपपुराणानि केन रचितानि सन्ति?**

उपपुराणानि महर्षिणा वेदव्यासेन रचितानि सन्ति।

**४५. उपपुराणानि कति सन्ति?**

अष्टादश उपपुराणानि सन्ति।

**४६. तानि उपपुराणानि कानि?**

अष्टादश उपपुराणानि यथा -

| | | | |
|---|---|---|---|
| १) सनत्कुमारम् | २) नारसिंहम् | ३) स्कान्दम् | ४) शिवधर्मम् |
| ५) दुर्वासा | ६) नारदीयम् | ७) कपिलम् | ८) वामनम् |
| ९) औशनसम् | १०) ब्रह्माण्डम् | ११) वरुणम् | १२) कालिका |
| १३) माहेश्वरम् | १४) शाम्बम् | १५) सौरम् | १६) पाराशरम् |
| १७) मारिचम् | १८) भास्करम् | | |

## ८. पुराणानां महत्त्वम्

**४७. पुराण-रचनायाः प्रयोजनं किम्?**

वेदार्थं वै पुराणानि सेतिहासानि शक्तितः।
जपयज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत्॥ - याज्ञवल्क्यस्मृतिः-१/१०१

यदा वेदोक्तान् अर्थान् ज्ञातुं लोकाः असमर्थाः अभवन्तदा वेदोक्तार्थस्य ज्ञानं कथा-उपाख्यानादि-द्वारा सुलभं कर्त्तुं पुराणानि प्रवृत्तानि। पुराणानि वेदस्य महिमानं वर्धयितुम् एव प्रवर्तन्ते।

वेदेषु, उपनिषत्सु च 'सत्यं वद', 'धर्मं चर', 'मातृदेवो भव', 'पितृदेवो भव', 'आचार्यदेवो भव', 'अतिथिदेवो भव', 'श्रिया देयम्', 'ह्रिया देयम्', 'स्वाध्यायान्मा प्रमदः' इत्यादयः उपदेशाः कृताः सन्ति। कथा आबालवृद्धेभ्यः रोचते। तस्मात् पुराणैः एते एव उपदेशाः कथा-उपाख्यानादि-द्वारा जनानां हृदयेषु दृढीक्रियन्ते। यथा - 'सत्यं वद' इत्यस्य उपदेशस्य महिमा पुराणेषु सत्यवादिनः महाराजस्य हरिश्चन्द्रस्य उपाख्यानेन ज्ञापितः। 'धर्मं चर' इत्यस्य उपदेशस्य महिमा पुराणेषु धर्मराजस्य युधिष्ठिरस्य अन्येषां च नैकेषां चरितैः वर्णितः। 'मातृदेवो भव', 'पितृदेवो भव' इति उपदेशयोः श्रीरामस्य, श्रवणकुमारस्य च चरितेन बोधनं पुराणेषु वर्तते। 'आचार्यदेवो भव' इत्यस्य उपदेशस्य महिमानं वर्णयितुं स्वयं भगवतः रामस्य, भगवतः कृष्णस्य च गुरुकुल-गमनस्य वृत्तान्तः पुराणेषु दृश्यते। 'श्रिया देयम्', 'ह्रिया देयम्' इत्यादिभिः दानस्य उपदेशः वेदेषु कृतः। दानस्य महिमा पुराणेषु दधीचि-कर्ण-सदृशानां पात्राणां माध्यमेन प्रतिपादितः।

### ४८. मनुष्येभ्यः पुराण-साहित्यस्य महत्तमं प्रदानं किम्?

जीवने आध्यात्मिक-प्रगतये ये विविधाः मार्गाः उपदिष्टाः,तेषाम् अनुसरणाय प्रायः संसार-त्यागः अनिवार्यः। समाजस्य अल्पः एव अंशः एवं प्रकारेण संसार-त्यागे समर्थः सफलः च भवति। संसारे स्थितस्य गृहस्थस्य कृते आध्यात्मिक-विकासाय 'भक्तिः' एव सुकरः उपायः। वेदे प्रतिपादिता 'उपासना' एव पुराणेषु 'भक्तिः' इति नाम्ना उपबृंहिता वर्तते। भक्ति-मार्गस्य सुव्यवस्थितं मण्डनं सर्वादौ पुराणेषु एव जातम्। उक्तं च –

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥ - श्रीमद्भागवतम् ७.५.२३

अत्र भक्ति-मार्गस्य विविधाः नव प्रकाराः उक्ताः।

अथ च –

श्रीविष्णोः श्रवणे परीक्षिदभवत् वैयासकिः कीर्तने
प्रह्लादः स्मरणे तदङ्घ्रिभजने लक्ष्मीः पृथुः पूजने।
अक्रूरस्त्वभिवन्दने कपिपतिः दास्येऽथ सख्येऽर्जुनः
सर्वस्वात्मनिवेदने बलिरभूत् कृष्णाप्तिरेषां फलम्॥

अत्र भक्तेः प्रत्येकं प्रकारे यः अतिशेते तादृशम् आदर्शभूतं पात्रं स्मारितम्। पुराणेषु प्रत्येकं पात्रस्य विस्तृताः कथाः अपि उपलभ्यन्ते। एतदेव अधुना कोष्ठकस्य साहाय्येन प्रस्तूयते –

| **क्रमः** | **भक्तेः प्रकारः** | **तत्र आदर्शः** | **विशेषः** |
|---|---|---|---|
| १ | श्रवणम् | महाराजः परीक्षित् | श्रीशुकदेवात् श्रीमद्-भागवतस्य श्रवणं कृत्वा मोक्षं प्राप्तवान्। |
| २ | कीर्तनम् | श्रीशुकदेवः | शैशवात् एव श्रीमद्-भागवतस्य निरन्तरं कीर्तनं कृतवान्। |
| ३ | स्मरणम् | प्रह्लादः | प्राण-अपाये अपि नारायणस्य जपं न त्यक्तवान्। |
| ४ | पाद-सेवनम् | लक्ष्मीः | निरन्तरं नारायणस्य पादौ सेवते। |
| ५ | अर्चनम् | महाराजः पृथुः | शतम् अश्वमेध-यज्ञैः भगवद्-अर्चनं कृतवान्। |
| ६ | वन्दनम् | अक्रूरः | भगवन्-नाम्नि श्रुते एव दण्डवत् प्रणमति स्म। |
| ७ | दास्यम् | श्रीहनुमान् | सर्वेषु कालेषु श्रीरामस्य कार्याय उत्सुकः भवति। |
| ८ | सख्यम् | अर्जुनः | श्रीकृष्णेन सह उत्कृष्टं सख्यम् ऊढवान्। |
| ९ | आत्मनिवेदनम् | महाराजः बलिः | भगवतः वामनस्य चरणं स्व-मस्तके ऊढवान्। |

### ४९. भारतीय-समाजे पुराण-साहित्यस्य प्रभावः कः?

समाजे आचर्यमाणानां व्रत-जप-तपस्-स्वाध्यायादीनां विधिः, महिमा च विविधाभिः कथाभिः पुराणेषु गुम्फितः वर्तते। इत्थं पुराणानि सामान्यजनेभ्यः आचार-शिक्षणाय महर्षिणा व्यासेन

उपदिष्टानि सन्ति। शिक्षणस्य हृदयभूतः विषयः 'मूल्य-शिक्षणं' वर्तते। मूल्य-विहीनः प्रगतः अपि समाजः विनाशं प्रति एव गच्छति। पुराणानि एतानि मूल्यानि एव ग्राहयन्ति। मूल्यानाम् दैनन्दिन-जीवने आरोपणाय विविधान् उपायान् सूचयन्ति।

अद्यापि पुराणानां चर्चा, गानं, वर्णनं च न केवलं ब्रह्मचर्याश्रमे विद्यालयेषु भवति, अपि तु जीवनस्य प्रत्येकम् अवस्थायां भवति। इत्थं अप्रविष्ट-विद्यालयस्य जनस्य अपि मूल्य-शिक्षणं पुराणैः क्रियते। एवं हि उच्यते –

श्रुतिर्विभिन्ना स्मृतयोऽपि भिन्नाः
नैको मुनिर्यस्य वचः प्रमाणम्।
धर्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः॥

प्राकृतः जनः यदा धर्माधर्मयोः विवेकं कर्तुं न शक्नोति तदा पुराणे वर्णितानां राम-कृष्णादीनां वृद्धानां, ज्येष्ठ-श्रेष्ठानां, महाजनानां, सतां च चरितानि स्मृत्वा ततः कर्तव्य-अकर्तव्यस्य निर्णयं करोति। इत्थं पुराणानि भारतीय-समाजस्य मार्ग-दर्शनाय नैकान् आदर्शान् प्रस्तुवन्ति।

पुराणानां महान् प्रभावः भारतीय-समाज-जीवने दृष्टि-गोचरः भवति। तेनैव कारणेन विश्वे भारतीया-संस्कृतिः सर्वैः स्तूयते। भारतीय-समाज-जीवने रूढाः नैके आचाराः, जीवनस्य महत्त्वपूर्ण-प्रसङ्गेषु च अनुष्ठातव्याः विधयः पुराण-मूलकाः एव सन्ति। इत्थं भारतीय-संस्कृतेः भारतीय-समाज-जीवनस्य च सम्यक् ज्ञानाय अपि पुराणाध्ययनम् उपकरोति।

### ५०. पुराणेषु किं निरूपितं वर्तते?

पुराणेषु चतुर्णाम् अपि युगानां निरूपणं वर्तते। अतीतेषु युगेषु ये प्रसङ्गाः जाताः ते यथा पुराणेषु उपलभ्यन्ते तथैव वर्तमानस्य युगस्य प्रसङ्गाः अपि पुराणेषु प्राप्यन्ते, किं बहुना ततः अग्रे वर्तमाने सम्भाविनां प्रसङ्गानां निरूपणम् अपि पुराणे नैकत्र उपलभ्यते। इत्थं पुराणानि भूत-वर्तमान-भविष्यत्-कालिक-प्रसङ्गाणां वर्णनं प्रस्तुवन्ति।

### ५१. पुराणानाम् अध्ययनेन कः लाभः?

"श्रुति-स्मृती उभे नेत्रे पुराणं हृदयं स्मृतम्" इति देवीभागवते उक्तम्। पुराणाध्ययनस्य लाभाः अधो लिखितेषु पद्येषु सम्यक् वर्णिताः। ते यथा -

वेदार्थादधिकं मन्ये पुराणार्थं वरानने।
वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः॥ (नारद-पुराणम्-२/२४/१७)
यन्न दृष्टं हि वेदेषु न दृष्टं स्मृतिषु द्विजाः।
उभयोर्यन्न दृष्टं हि तत् पुराणैः प्रगीयते॥ (स्कन्द-पुराणम्-प्रभासखण्डः-२/९२)
विशेषतः कलौ व्यास पुराणश्रवणादृते।
परो धर्मो न पुंसां हि मुक्तिध्यानपरः स्मृतः॥
या गतिः पुण्यशीलानां यज्विनां च तपस्विनाम्।
सा गतिः सहसा तात पुराणश्रवणात् खलु॥
पापं सङ्क्षीयते नित्यं धर्मश्चैव विवर्धते।
पुराणश्रवणाज्ज्ञानी न संसारं प्रपद्यते॥ (शिवपुराणम्-उमासंहिता-अ=१३)

इत्थं पुराणानाम् अध्ययनेन मनुष्यस्य जीवने शान्तिः, मृत्यु-भयात् मुक्तिः, जीवनान्ते च मोक्षः सुलभः भवति।

## ९. पुराणेषु गुम्फिताः विषयाः

**५२. पुराणेषु के के विषयाः प्रतिपादिताः?**

एतद्-विषये नारद-पुराणे उक्तं यत् -

सर्ववेदार्थसाराणि पुराणानीति भूपते।
तर्कस्तु वादः हेतुः स्यान्नीतिस्त्वैहिकसाधनम्॥
यज्ञकर्मक्रियावेदः स्मृतिर्वेदो गृहाश्रमे।
स्मृतिर्वेदो क्रियावेदः पुराणेषु प्रतिष्ठितः॥

पुराणेषु प्रतिपादितेभ्यः विषयेभ्यः केचन इत्थं सन्ति –

| | | |
|---|---|---|
| १. वेदाख्यानानि | २.दर्शन-शास्त्रम् | ३. आयुर्वेदः |
| ४. राजनीति-शास्त्रम् | ५. धर्म-शास्त्रम् | ६. अर्थ-शास्त्रम् |
| ७. काम-शास्त्रम् | ८. मोक्ष-शास्त्रम् | ९. ज्योतिष-शास्त्रम् |
| १०. वास्तु-शास्त्रम् | ११. भूगोल-शास्त्रम् | १२. खगोल-शास्त्रम् |

| | | |
|---|---|---|
| १३. तत्त्व-ज्ञानम् | १४. नीति-शास्त्रम् | १५. शकुन-शास्त्रम् |
| १६. सङ्गीत-शास्त्रम् | १७. साहित्य-शास्त्रम् | १८. शस्त्र-विद्या |
| १९. व्याकरण-शास्त्रम् | २०. छन्दः-शास्त्रम् | २१. युद्ध-विद्या |

## १०. पुराणेषु अवताराः

**५३. पुराणेषु भगवतः नारायणस्य कति अवताराः वर्णिताः सन्ति?**

पुराणेषु भगवतः चतुर्विंशतिः अवताराः वर्णिताः सन्ति। तेषु प्रमुखाः दश सन्ति।

**५४. प्रमुखाः दश अवताराः के?**

वनजौ[२] वनजौ[२] खर्वः[१] त्रिरामी[३] सकृपो[१]ऽकृपः[१]।
अवतारा दशैवैते कृष्णस्तु भगवान् स्वयम्॥

अवताराणां विवरणं यथा -

| **क्रमः** | **सङ्केतः** | **अवतार-नाम** |
|---|---|---|
| १ | वनजौ (वनम् अर्थात् जलम्) | मत्स्यावतारः |
| २ | | कूर्मावतारः |
| ३ | वनजौ (वनम् अर्थात् अरण्यम्) | वराहावतारः |
| ४ | | नृसिंहावतारः |
| ५ | खर्वः | श्रीवामनावतारः |
| ६ | त्रिरामी | दशरथ-पुत्रः श्रीरामावतारः |
| ७ | | श्रीपरशुरामावतारः |
| ८ | | श्रीबलरामावतारः |
| ९ | सकृपः (कृपया सहितः) | श्रीबुद्धावतारः |
| १० | अकृपः (कठोर-कृपा-युतः) | श्रीकल्क्यवतारः |

एषः सङ्ग्रहः -

मत्स्यः कूर्मो वराहश्च नारसिंहोऽथ वामनः।
रामो रामश्च कृष्णश्च बुद्धः कल्किश्च ते दश॥

**५५. भगवतः चतुर्विंशतिः अवताराः के?**

व-न-त्रयं क-चतुष्कं ह-ब-प-र-म-युग्मकम्।
स-ध-य-दा-द्यवताराःचतुर्विंशति सङ्ख्यकाः॥

कोष्ठक-साहाय्येन अवताराणां नामानि जानीमः -

| **क्रमः** | **सङ्क्षेपः** | **अवतार-नाम** | **क्रमः** | **सङ्क्षेपः** | **अवतार-नाम** |
|---|---|---|---|---|---|
| १ | 'व'-त्रयम् | वराहावतारः | १३ | 'ब'-युग्मकम् | बलरामावतारः |
| २ | | वामनावतारः | १४ | | बुद्धावतारः |
| ३ | | वेदव्यासावतारः | १५ | 'प'-युग्मकम् | पृथु-अवतारः |
| ४ | 'न'-त्रयम् | नृसिंहावतारः | १६ | | परशुरामावतारः |
| ५ | | नर-नारायणावतारः | १७ | 'र'-युग्मकम् | रामावतारः |
| ६ | | नारदावतारः | १८ | | ऋषभावतारः |
| ७ | 'क'-चतुष्कम् | कृष्णावतारः | १९ | 'म'-युग्मकम् | मत्स्यावतारः |
| ८ | | कूर्मावतारः | २० | | मोहिनी-अवतारः |
| ९ | | कपिलावतारः | २१ | 'स' | सनत्कुमारावतारः |
| १० | | कल्क्यवतारः | २२ | 'ध' | धन्वन्तरि-अवतारः |
| ११ | 'ह'-युग्मकम् | हंसावतारः | २३ | 'य' | यज्ञ-नारायणावतारः |
| १२ | | हयग्रीवावतारः | २४ | 'द' | दत्तावतारः |

## ११. श्रीमद्-भागवत-महापुराणस्य परिचयः

**५६. 'भागवत'-शब्दस्य अर्थः कः?**

भागवत-शब्दस्य द्वे व्युत्पत्ती इत्थं प्रदर्श्येते -

१. भगवान् च भगवन्तः च एतेषां चरित्रं यस्मिन् तद् भागवतम्। अत्र भगवतः चरित्रं वर्तते, भगवतः विविधानाम् अवताराणां चरित्रं विद्यते, भगवद्-भक्तानां च चरित्रं विद्यते इति एतदर्थम्

एतद् 'भागवतम्' इति उच्यते।

२. भगवता प्रोक्तं यत् तत् भागवतम्।

पद्याभ्याम् अपि 'भागवत'-शब्दस्य अर्थः इत्थम् उच्यते -

> **भा**तीदं सर्वलोकेषु **गी**यते नारदादिभिः।
> **व**रिष्ठं सर्वशास्त्राणां **त**त्त्वं परमगोपितम्॥

अथ च -

> यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः।
> वृत्रासुरवधोपेतं तद्भागवतमिष्यते॥ (देवी-भागवते)

अत्र प्रथम-श्लोकस्य प्रत्येकं पादस्य प्रथमः वर्णः 'भा-ग-व-त' शब्दस्य एकैकः वर्णः वर्तते। द्वितीय-श्लोकानुसारं 'भागवत'-ग्रन्थः गायत्री-मन्त्रस्य एव विस्तरः वर्तते।

### ५७. श्रीमद्-भागवते किम् अस्ति?

एषः ग्रन्थः परीक्षित्-श्रीशुकदेवयोः संवाद-रूपः अस्ति। अस्मिन् ग्रन्थे द्वादश स्कन्धाः, ३३५ अध्यायाः, १८००० श्लोकाः, ४७६००० वर्णाः च सन्ति।

### ५८. श्रीमद्-भागवतस्य उत्पत्तिः कथं जाता?

सप्तदशानां पुराणानां रचनान्ते अपि श्रीवेदव्यासस्य मनसि परितोषः न जातः। तदा तस्मै देवर्षिः नारदः उपदिष्टवान् यत् तेन किञ्चित् भक्ति-रस-प्रधानं पुराणं विरचनीयम् इति। तदा श्रीवेदव्यासः श्रीमद्-भागवतस्य रचनायाम् उद्युक्तः जातः।

### ५९. श्रीमद्-भागवतस्य वैशिष्ट्यं किम्?

एतत् पुराणम् उपरि उक्तैः महापुराणस्य दशभिः लक्षणैः युक्तम् अस्ति। तस्मादेव एतत् 'महापुराणम्' इति कथ्यते। अस्य महापुराणस्य माहात्म्यं श्रीपद्म-पुराणे, श्रीस्कन्द-पुराणे च वर्णितं वर्तते। भगवतः विष्णोः चतुर्विंशत्याः अवताराणां वर्णनम् अस्मिन् ग्रन्थे वर्तते।

अन्येषां पुराणानाम् अपेक्षया अस्मिन् महापुराणे अधिकानां छन्दसाम् उपयोगः वर्तते। स्थाने स्थाने गद्य-भागाः अपि अत्र वर्तन्ते। इतः पूर्वं श्रीवेद-व्यासेन विरचितानि सप्तदश पुराणानि, श्रीमहाभारतं च ज्ञान-प्रधानानि आसन्। भक्ति-विरहितं ज्ञानं शुष्कताम् आपद्यते। एताम् एव शुष्कताम् अनुभवन् श्रीवेदव्यासः देवर्षेः नारदस्य वचनेन यदा श्रीमद्-भागवतस्य रचनायां प्रवृत्तः

तदा सः आनन्दस्य परां काष्ठां प्राप्नोत् इति श्रूयते। अतः श्रीमद्-भागवतं श्रीवेद-व्यासस्य 'समाधि-भाषा' उच्यते। एतेन एव अत्र प्रतिपादितस्य अर्थस्य गाम्भीर्यं कियत् स्यात् इति ऊहितुं शक्यते। श्रीमद्-भागवतस्य प्रतिपाद्य-विषयः यथा विलक्षणः तथैव तस्य भाषा अपि विलक्षणा। अस्य गूढार्थस्य ज्ञानं न सहजम्। तस्मात् एव श्रीमद्-भागवतस्य विषये 'विद्यावतां भागवते परीक्षा' इति उक्तिः जनेषु प्रसिद्धा।

अस्य महापुराणस्य प्रशस्तौ उक्तं यत् -

श्रीमद्भागवतं पुराणतिलकं यद्वैष्णवानां धनं
यस्मिन् पारमहंस्यमेवममलं ज्ञानं परं गीयते।
यत्र ज्ञान-विराग-भक्ति-सहितं नैष्कर्म्यमाविष्कृतं
तच्छृण्वन् प्रपठन् विचारणपरो भक्त्या विमुच्येन्नरः॥

अथ च -

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम्।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः॥

पुनश्च -

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्॥

यद्यपि भक्ति-रसस्य अत्र प्राधान्यं तथापि मोक्षहेतू ज्ञान-वैराग्ये अपि अत्र उपदिष्टे। इत्थम् अस्य ग्रन्थस्य पठनं मनुष्यस्य परम-लक्ष्य-भूतस्य मोक्षस्य साधकम् अस्ति इति हेतोः श्रीमद्-भागवतं 'पुराण-तिलकम्' अस्ति इति उपरि पद्ये उक्तम्।

अपरस्मिन् पद्ये श्रीमद्-भागवतं वेदराशि-रूपात् सर्व-काम-पूरकात् कल्प-वृक्षात् पतितं मधुरं फलम् अस्ति इति वर्णितं वर्तते। कल्पतरोः अपि पर्ण-शाखादिकं रस्यं न भवति। किन्तु एतस्य निगम-कल्पतरोः फलम् अतीव रस्यम् इति स्वयं श्रीशुकदेवः आस्वाद्य अस्मान् आश्वासयति। अस्य श्रीमद्-भागवतस्य श्रवणेन ईश्वरः सद्यः भक्तस्य हृदि विराजते इति अन्तिमे पद्ये उक्तम्।

सर्वैः अपि पूर्वोक्तैः गुणैः इदं महापुराणं सर्वासु व्यासकृतिषु श्रेष्ठं मन्यन्ते विद्वांसः।

## ६०. श्रीमद्-भागवत-महापुराणस्य समाजे कः प्रभावः अस्ति?

सत्सु अपि न्याय-मीमांसा-वेदान्तादि-दर्शनेषु अद्य सनातन-परम्पराम् अनुसरतः समाजस्य महान् अंशः वैष्णवः अस्ति, तन्नाम विष्णु-भक्तौ श्रद्धावान् अस्ति। प्राचीनकालात् समाजे रूढा श्रीमद्-भागवताध्ययन-कथन-कीर्तन-परम्परा एव तत्र मूलं कारणम् इति वक्तुं शक्यते। अत्र चित्रवत् वर्णिताः बालकृष्णस्य लीलाः अद्यापि लोकानां चित्तानि हरन्ति। तत्र वर्तमान-विवरणानुगुणाः श्रीकृष्णस्य प्रतिमाः अद्यापि गृहे गृहे सेव्यन्ते।

पुराणेषु एतत् पुराणम् अतीव लोक-प्रियं वर्तते। अस्य कीर्तनं गानं च अद्यापि सर्वत्र प्रवर्तते। इयं कथा प्रसिद्धा यत् - 'राजा परीक्षित् सप्तसु एव दिनेषु तक्षक-दंशेन मृत्योः शापम् प्राप्नोत्। ततः परम् एतावता अल्पेन कालेन मोक्ष-प्राप्तिः कथं स्यात् इति सः अचिन्तयत्। तादृशाय परीक्षिते श्रीशुकदेवः श्रीमद्भागवत-कथां श्रावयित्वा प्ररमं पदं प्रापयति'। एतेन एव श्रीमद्-भागवतस्य श्रवणं मोक्ष-साधकम् इति सिध्यति। 'अतिक्रान्तानां मनुष्याणाम् अपि अस्य पुराणस्य श्रवणेन सद्गतिः भवति' इति प्रतिपादयन्त्यः नैकाः कथाः श्रीमद्-भागवते वर्तन्ते। तासाम् आधारेण एतादृशः विश्वासः भारतीय-जन-मानसे दृढः वर्तते। तस्मात् नैकत्र श्रीमद्-भागवत-सप्ताहानां सवैभवम् आयोजनम् अद्यापि क्रियते।

श्रीमद्-भागवत-महापुराणे श्रीकृष्णः तस्य लीलाः चैव केन्द्र-स्थाने वर्तन्ते। तस्मात् श्रीकृष्णस्य लीलानां यावत् विशदं वर्णनम् अत्र उपलभ्यते तावत् अन्यत्र कुत्रापि न उपलभ्यते। कृष्णस्य एताः एव कथाः मीरा, सूरदासः, रसखानः, नरसिंह-महेता, तुकारामः, एकनाथः इत्यादीनां भक्त-शिरोमणीनां प्रेरणा स्त्रोतांसि जाताः। ततः एव प्रेरितैः नैकैः लेखकैः संस्कृतेन अनुपमस्य स्तोत्रसाहित्यस्य, काव्यानां, नाटकानां चापि रचना कृताः। संस्कृतेतर-भाषाभिः अपि अनुपमानां पदानां, काव्यानां, भजनानां, नाटकानां, चलच्चित्राणां च रचनाः जाताः।

## ६१. श्रीमद्-भागवते प्रतिपादिताः विषयाः के?

श्रीमद्-भागवते द्वादश स्कन्धाः सन्ति इति पूर्वत्र उक्तम्। तेषा विवरणं यथा-

| क्रमः | स्कन्ध-नाम | अध्याय -संख्या | विषय-वस्तु |
|---|---|---|---|
| १ | अधिकार- | १९ | देवर्षि-नारद-व्यास-समागमः, भागवत-रचनायै प्रेरणा, |

| | | | |
|---|---|---|---|
| | लीला | | उत्तरा-कुन्ती-भीष्मैः च कृता भवतः स्तुतिः, परीक्षित्-जन्म-वृत्तान्तम्, धर्म-पृथ्वी-संवादः, परीक्षिते ऋषि-शापः, परीक्षितः अनशनव्रतं च। |
| २ | साधन-लीला | १० | श्रीशुकदेव-मुखात् कथारम्भः, सद्योमुक्तिः, क्रम-मुक्तिः, विराट्-स्वराट्-वर्णनं, चतुश्श्लोकीभागवतोपदेशः च। |
| ३ | सर्ग-लीला | ३३ | उद्धव-विदुर-संवादः, सृष्टि-प्रक्रिया-वर्णनं, वराहावतार-कथा, जय-विजययोः कथा, देवहूति-कर्दम-विवाहः, कपिलावतार-कथा, कपिल-पञ्चाध्यायी च। |
| ४ | विसर्ग-लीला | ३१ | शिव-सती-कथा, दक्ष-यज्ञ-विध्वंसः, ध्रुव-पञ्चाध्यायी, पृथु-चरितं, पुरञ्जन-पञ्चाध्यायी, देवर्षेः नारदस्य प्रचेतोभ्यः उपदेशः च। |
| ५ | स्थान-लीला | २६ | प्रियव्रत-चरितं, ऋषभदेव-कथा, भरत-जडभरत-चरितं, भवाटवी-भुवनकोश-द्वीप-वर्णनं, खगोल-भूगोल-पञ्चाध्यायी, सूर्यस्य रथ-गति-वर्णनं, नरकाणां वर्णनं च। |
| ६ | पोषण-लीला | १९ | अजामिलोपाख्यानं, नारायण-कवचोपदेशः, वृत्र-महाराज-स्तुतिः, वृत्रस्य पूर्वचरितं, पुंसवन-व्रत-विधिः च। |
| ७ | ऊति-लीला | १५ | हिरण्यकशिपोः तपश्चर्या, प्रह्लाद-चरितं, धर्म-पञ्चाध्यायी, वर्णाश्रम-धर्माः च। |
| ८ | मन्वन्तर-लीला | २४ | मन्वन्तराणां वर्णनं, गजेन्द्र-मोक्ष-कथा, समुद्र-मन्थन-प्रसङ्गः, बलि-वामन-कथा, मत्स्यावतार-कथा च। |
| ९ | ईशानुकथा-लीला | २४ | चन्द्रवंश-सूर्यवंश-भृगुवंश-वर्णनं, सुकन्या-च्यवनोपाख्यानं, अम्बरीश-कथा, त्रिशङ्कु-हरिश्चन्द्र-सगर-भगीरथ-कथा, गङ्गावतरण-कथा, शकुन्तलोपाख्यानं, ययाति-चरितं, रन्तिदेव-कथा च। |

| | | | |
|---|---|---|---|
| १० | निरोध-लीला | ४९+४१ = ९० | श्रीकृष्णस्य प्राकट्यं, गोकुले बाल्य-लीलाः, गोवर्धन-लीला, रास-पञ्चाध्यायी, मथुरा-गमनं, कंस-चाणूर-मुष्टिक-कुवलयादीनां वधः, गुरोः सान्दीपनेः सकाशात् विद्या-ग्रहणं, द्वारिका-निर्माणं, रुक्मिणी-हरणं, श्रीकृष्णस्य अन्ये विवाहाः, भगवतः गृहचर्या, दन्तवक्र-विदुरथ-उद्धारः, कृष्ण-सुदाम-मेलनं, वेद-स्तुतिः, श्रीकृष्णस्य अन्याः लीलाः च। |
| ११ | मुक्ति-लीला | ३१ | देवर्षि-नारद-वसुदेव-संवादः, नवयोगीश्वराणां संवादः, दत्तात्रेयस्य चतुर्विंशतिः गुरवः, ज्ञान-पञ्चाध्यायी, बद्ध-मुक्त-भक्तानां लक्षणं, भगवद्-विभूतीनां वर्णनं, ज्ञान-कर्म-भक्ति-योग-वर्णनं, भगवतः उद्धवाय अन्तिमोपदेशः, भगवतः स्वधाम-गमनं च। |
| १२ | आश्रय-लीला | १३ | कलि-युगे राज-वंशानां धर्माणां च वर्णनं, कलौ नाम-सङ्कीर्तनस्य महिमा, चत्वारः प्रलयाः, श्रीशुकदेवस्य परीक्षिते अन्तिमोपदेशः, जनमेजयस्य सर्पसत्रं, पुराणानां लक्षणानि, मार्कण्डेयस्य तपश्चर्या, श्रीमद्भागवतस्य सङ्क्षिप्ता विषयसूचिः, पुराणानां श्लोकसंख्या, श्रीमद्भागवतस्य महिमा च। |

एतेन सङ्ग्रह-श्लोकेन अपि श्रीमद्-भागवतस्य विषय-वस्तुनः वर्णनं क्रियते –

आदौ देवकीदेवगर्भजननं गोपीगृहे वर्धनं
मायापूतनजीवतापहरणं गोवर्धनोद्धारणम्।
कंसच्छेदनकौरवादिहननं कुन्तीसुतापालनम्
एतद्भागवतं पुराणकथितं श्रीकृष्णलीलामृतम्॥

## ६२. श्रीमद्-भागवतस्य प्रमुखाः टीकाः काः?

श्रीमद्-भागवतस्य प्रमुखाः टीकाः यथा -

| क्रमः | टीकायाः नाम | टीका-कर्तुः नाम |
|---|---|---|
| १ | भावार्थ-दीपिका | श्रीधरस्वामी |
| २ | भावार्थ-दीपिका-प्रकाशः (इयं उपरि उक्तायाः भावार्थ-दीपिकायाः टीका वर्तते) | श्रीवंशीधर |
| ३ | दीपिनी टीका | श्रीराधा-रमण-दास-गोस्वामी |
| ४ | श्रीमद्-भागवतचन्द्रिका | श्रीमद्वीरराघवाचार्यः |
| ५ | सिद्धान्त-प्रदीपः | श्रीमत्-शुकदेवः |
| ६ | सुबोधिनी टीका | श्रीमद्-वल्लभाचार्यः |

श्रीकृष्णशङ्करशास्त्रिणा षोडश-खण्डात्मकम् श्रीमद्भागवतस्य एकादशभिः टीकाभिः युक्तं 'अनेकटीकोपेतं भागवतम्' इत्ययं ग्रन्थः सज्जीकृत्य प्रकाशितः वर्तते।

**६३. श्रीमद्-भागवतस्य समीक्षिता आवृत्तिः कया संस्थया प्रकाशिता?**

अहमदाबाद-स्थितेन भो.जे.विद्याभवनेन अस्य महापुराणस्य समीक्षिता आवृत्तिः प्रकाशिता वर्तते।

## १२. इतराणि पुराणानि

**६४. श्रीमद्-भागवतात् इतरेषु पुराणेषु किं किं वर्तते?**

श्रीमद्-भागवतात् अन्येषु पुराणेषु वर्तमानानि वैशिष्ट्यानि कोष्ठक-साहाय्येन जानीमः -

| क्रमः | पुराण-नाम | वैशिष्ट्यानि |
|---|---|---|
| १ | मत्स्य-पुराणम् | पुराणे अस्मिन् श्रीविष्णोः 'मत्स्य'-आख्यस्य प्रथमस्य अवतारस्य कथा वर्तते। |
| २ | मार्कण्डेय-पुराणम् | ब्रह्मणः शिष्यस्य मार्कण्डेयस्य नाम्ना एतस्य पुराणस्य नाम कृतम्। पुराणे अस्मिन् धर्मस्य विशदं विवरणं वर्तते। देवी-माहात्म्येन सहिता दुर्गा सप्तशती अस्मिन् एव पुराणे अन्तर्भवति। एषा एव 'चण्डी-पाठः' इति नाम्ना अपि प्रसिद्धा। |

| | | |
|---|---|---|
| ३ | भविष्य-पुराणम् | पुराणे अस्मिन् भविष्यत्-कथनम्, विविधानाम् उत्सवानां वर्णनं, विविधानां तीर्थानां च वर्णनम् उपलभ्यते। |
| ४ | ब्रह्म-पुराणम् | अस्मिन् पुराणे शिल्प-कलायाः, संस्कृतेः, युद्ध-कलायाः, तीर्थ-स्थानानां च वर्णनानि उपलभ्यन्ते। 'आदि-पुराणम्' इत्यपि एतस्य पुराणस्य अपरं नाम वर्तते। |
| ५ | ब्रह्माण्ड-पुराणम् | अस्मिन् पुराणे बहवः राज-वंशाः, प्रशासन-नियमाः, शासन-व्यवस्थाः, न्याय-व्यवस्थाः च वर्णिताः सन्ति। प्रसिद्धं 'ललिता-सहस्र-नाम-स्तोत्रम्' अस्मिन् एव पुराणे उपलभ्यते। |
| ६ | ब्रह्मवैवर्त-पुराणम् | अस्मिन् पुराणे राधा-कृष्णयोः चरितस्य विस्तृतं वर्णनं वर्तते। अत्र उक्तं यत् कृष्णः एव परब्रह्म अस्ति। शिवः, ब्रह्मा इत्यादयः सर्वे अपि देवाः कृष्णस्य एव अवताराः सन्ति इति अत्र प्रतिपादितम्। |
| ७ | विष्णु-पुराणम् | अस्मिन् पुराणे भगवतः विष्णोः कथाः सन्ति। |
| ८ | वायु-पुराणम् | एतत् पुराणं प्रामुख्येन भगवतः शिवस्य महिमा-गानं करोति। पुराणे अस्मिन् दक्षिण-भारतस्य विस्तृतं वर्णनम् उपलभ्यते। |
| ९ | वामन-पुराणम् | अस्मिन् पुराणे भूतले वर्तमानानां शिव-सम्बद्धानं स्थानानां वर्णनं, तत्-सम्बद्धानां कथानां च सङ्ग्रहः वर्तते। |
| १० | वराह-पुराणम् | अस्मिन् पुराणे भगवतः विष्णोः वराहावतारस्य विस्तृतं वर्णनं वर्तते। उत्तर-भारते विद्यमानानां विष्णु-सम्बद्धानां स्थानानां तत्-सम्बद्ध-कथानां च अत्र वर्णनं विद्यते। |
| ११ | अग्नि-पुराणम् | एतत् पुराणं ज्ञान-कोशः इव वर्तते। अस्मिन् भूगोल-शास्त्रं, इतिहासः, राज-नीतिः, शिक्षा, युद्ध-विद्या, न्याय-व्यवस्था, नगरे जल-विरतण-व्यवस्था, वास्तु-शास्त्रम् इत्यादयः विविधाः विषयाः चर्चिताः सन्ति। "आग्नेये हि पुराणेऽस्मिन् सर्वा विद्या प्रदर्शिताः"। |

| | | |
|---|---|---|
| १२ | नारद-पुराणम् | वेद-वेदाङ्गानां विस्तृता चर्चा, तत्र अपि विशेषतः ज्योतिष-शास्त्रस्य विशिष्टा चर्चा अत्र वर्तते। भारतस्य प्रमुखानां नदीनां, तीर्थ-स्थानानां च अत्र वर्णनं वर्तते। 'नारद-पञ्चरात्रम्' इति प्रसिद्धं प्रकरणम् अस्मिन् एव पुराणे अस्ति। |
| १३ | पद्म-पुराणम् | भगवतः विष्णोः अवताराणां चर्चा अत्र वर्तते। शिव-विष्ण्वोः परस्पर सम्बन्धः अपि अत्र चर्चितः। |
| १४ | लिङ्ग-पुराणम् | एतत् पुराणं 'लिङ्गस्य' शिवस्य प्रतीकत्वेन प्रतिपादनं करोति। शैव-सम्प्रदायानुसारं सृष्टि-निर्माणस्य प्रक्रिया अपि अत्र विस्तरशः उक्ता। |
| १५ | गरुड-पुराणम् | पुराणे अस्मिन् विष्णु-गरुडयोः संवादः वर्तते। अत्र स्वर्ग-नरकयोः वर्णनं वर्तते। कर्मणः पुनर्जन्मनः च सिद्धान्तः अत्र वर्णितः वर्तते। |
| १६ | कूर्म-पुराणम् | अत्र शिवस्य विष्णोः च विविधाः कथाः सङ्कलिताः सन्ति। |
| १७ | स्कन्द-पुराणम् | एतस्मिन् पुराणे शिव-पुत्रस्य कार्त्तिकेयस्य जन्मनः कथा वर्तते। सर्वाधिकाः श्लोकाः अस्मिन् पुराणे सन्ति। अस्य प्रभास-खण्डे प्रभासक्षेत्रस्य, श्रीसोमनाथस्य च वर्णनं वर्तते। सुप्रसिद्धा 'श्रीसत्यनारायण-व्रत-कथा', 'गुरु-गीता' चापि अस्मिन् एव पुराणे वर्तेते। |

एकेन श्लोकेन पुराणानां सारः प्रसिद्धः एव अस्ति, यथा -

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम्॥

## १३. इतिहास-पुराणयोः भेदः

### ६५. इतिहासः इत्युक्ते किम्?

इति+ह+आस = इतिहासः। तन्नाम पुरा 'एवं प्रकारेण एव आसीत्' इति। संस्कृत-वाङ्मये

'इतिहास'-शब्देन रामायण-महाभारत-ग्रन्थयोः परिगणनं भवति। इतिहासस्य लक्षणं यथा -

धर्मार्थकाममोक्षाणामुपदेशसमन्वितम्।
पूर्ववृत्तं कथायुक्तमितिहासं प्रचक्षते॥ (विष्णु-धर्मोत्तर-पुराणम् ३/१५/११)

**६६. इतिहास-पुराणयोः भेदः कः?**

यत्र केवलं भूत-कालस्य प्रसिद्धं वृत्तान्तं, चरित्रं, कथनं, वार्ता, युद्धानि च वर्णितानि भवन्ति सः इतिहासः। यत्र भूत-भविष्यद्-वर्तमान-सम्बद्धानाम् ईदृश-प्रसङ्गाणां वर्णनं वर्तते तत्पुराणम् इति कथ्यते।

आदिगुरु-शङ्कराचार्यः कथयति यत् प्राचीनाख्यानानाम् आख्यायिकानां च यः भागः वर्तते सः इतिहासः इति कथ्यते। एवं च सृष्टि-प्रक्रियायाः वर्णनात्मकः भागः पुराणम् इति कथ्यते।

## १४. रामायण-विवरणम्

**६७. प्रथमः इतिहास-ग्रन्थः कः?**

भगवतः श्रीरामस्य चरितं यत्र वर्णितं तत् रामायणं प्रथमः इतिहास-ग्रन्थः।

**६८. रामायण-शब्दस्य कः अर्थः?**

रामस्य अयनं = रामायणम्।

**६९. किं नाम 'अयनम्'?**

अयन-शब्दस्य एते अर्थाः सन्ति –
१. भक्तिः २. सेवा ३. मार्गः ४. चरितम् ५. शास्त्रं ६. गमनं चेति।

**७०. रामायणं केन रचितम्?**

महर्षिः वाल्मीकिः सर्वादौ रामायणं रचितवान्। ततः परं संस्कृत-भाषया अन्ये अपि रामायण-ग्रन्थाः रचिताः सन्ति। ते यथा - योगवासिष्ठ्य-रामायणम्, आनन्द-रामायणम्, अध्यात्म-रामायणम्, काक-भुशुण्डि-रामायणम्,अगस्त्य-रामायणम्, अद्भुत-रामायणम्, चम्पू-रामायणम्, कृत्तिवास-रामायणम् इत्यादि। प्रादेशिक-भाषाभिः अपि बहुभिः रामकथा विरचिता। तासु प्रमुखः ग्रन्थः अवधी-भाषया गोस्वामि-तुलसीदास-विरचितं श्रीरामचरितमानसम्। श्रीतुलसीदासः महर्षेः वाल्मीकेः एव अवतारः अस्ति इति जनश्रुतिः वर्तते।

**७१. महर्षिःवाल्मीकिःकः?**

अध्यात्म-रामायणानुसारं महर्षिः वाल्मीकिः पूर्व-जन्मनि दशसु प्रचेतस्सु दशमः प्रचेताः आसीत्।

**७२. 'वाल्मीकि'-शब्दस्यकःअर्थः?**

वल्मीकात् जातः = वाल्मीकिः । इदं श्रूयते यत् तपः आचरन् एषः वृष्ट्या वल्मीकान्निर्गतः अथवा ऋषि-मुनिभिः वल्मीकात् निष्कासितः। अतः सः 'वाल्मीकिः' इति नाम्ना प्रसिद्धः।

**७३. महर्षेः वाल्मीकेः मूलं नामकिम्?**

महर्षेः वाल्मीकेः मूलं नाम 'रत्नाकरः' इति। अध्यात्म-रामायणानुसारं रत्नाकरः भृगु-वंशे ब्राह्मण-कुले जातः। तस्य दरिद्रौ पितरौ तं वने त्यक्तवन्तौ। ततः कौचित् भिल्लदम्पती तं वर्धितवन्तौ। यौवने सः लुण्ठन-वृत्तिम् आचरति स्म। ततः "किं तव पापे तव कुटुम्बः सहभागी भविष्यति?" इति देवर्षिणा नारदेन पृष्टः। तम् एव प्रश्नं सः कुटुम्बीयान् पृच्छति। तदा ते वदन्ति 'पापं तवैव तत्सर्वं वयं तु फलभागिनः" इति। एतत् श्रुत्वा प्रबुद्धः सः तपः आचरितवान्। तपोबलेन सः महर्षिः वाल्मीकिः संजातः।

**७४. महर्षेः वाल्मीकेः अन्यानि नामानि कानि?**

प्राचेताः, मैत्रावरुणिः, वाल्मीकिः, आदि-कविः चैतानि वाल्मीकेः अपराणि नामानि सन्ति।

**७५. रामायणस्य रचना कथं जाता?**

कदाचित् महर्षिः वाल्मीकिः स्नानार्थं तमसा-नद्याः तीरं गतः। नद्याः तीरे क्रौञ्च-दम्पती विहरतः स्म। कश्चित् व्याधः तयोः नर-क्रौञ्चं बाणेन हतवान्। एतद् दृष्ट्वा महर्षिः वाल्मीकिः शोकाकुलः जातः। यदा तस्य शोकः श्लोकत्वम् आगतः तदा तस्य मुखात् अनुष्टुप्-छन्दसि रामायणस्य बीज-भूतं पद्यं स्फुरितम्। तत् च यथा -

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥

पद्ये अस्मिन् श्रीरामायणस्य क्रमेण सर्वेषाम् अपि काण्डानां सङ्केतः वर्तते।

**७६. अस्य आदि-काव्यस्य प्रधानः रसः कः?**

'करुण-रसः' अस्य काव्यस्य प्रधानः रसः अस्ति। शोकः करुण-रसस्य स्थायि-भावः भवति।

नर-क्रौञ्चस्य वधात् महर्षेः वाल्मीकेः हृदये उत्पन्नस्य शोकस्य परिणति-रूपेण एव रामायणस्य रचना जाता इत्यतः एतस्य आदि-काव्यस्य प्रधानः रसः करुण-रसः अभवत्।

आदि-काव्ये अस्मिन् अन्ये अपि रसाः साहाय्यकाः सन्ति इति श्रीवाल्मीकिरामायणे एव आदि-कविना उक्तम्। तद् यथा -

हास्यशृङ्गारकारुण्यरौद्रवीर्यभयानकैः।
बीभत्साद्भुतसंयुक्तं काव्यमेतदगायताम्॥ (बालकाण्डे ४.९)

**७७. श्रीरामायणे के के साहाय्यकाः रसाः कुत्र कुत्र वर्तन्ते?**

अस्मिन् विषये श्रीराम-कर्णामृते एषः श्लोकः वर्तते –

शृङ्गारं क्षितिनन्दिनीविहरणे वीरं धनुर्भञ्जने
कारुण्यं बलिभञ्जनेऽद्भुतरसं सिन्धौ गिरिस्थापने।
हास्यं शूर्पणखामुखे भयवहे बीभत्समान्यामुखे
रौद्रं रावणमर्दने मुनिजने शान्तं वपुः पातु नः॥

**७८. अधुना रामायणस्य सङ्क्षिप्तं परिचयं पश्यामः -**

संस्कृत-वाङ्मये रामायणम् आदिकाव्यं मन्यते। महर्षिः वाल्मीकिः सम्प्रति प्रवर्तमानस्य 'वैवस्वत'-मन्वन्तरस्य प्रथमः कविः अस्ति, अतः सः आदिकविः इति नाम्ना सम्बोध्यते। महर्षेः वाल्मीकेः प्रशस्तौ श्रीक्षेमेन्द्रेण उक्तं यत् -

स वः पुनातु वाल्मीकेः सूक्तामृतमहोदधिः।
ॐकार इव वर्णानां कवीनां प्रथमो मुनिः॥ (रामायण-मञ्जरी)
कूजन्तं राम रामेति मधुरं मधुराक्षरम्।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्॥ (श्रीराम-रक्षास्तोत्रम्)

रामायणे सप्त काण्डानि सन्ति। तानि यथा -

| काण्डम् | काण्डस्य नाम | कथा-भागः |
|---|---|---|
| १ | बाल-काण्डम् | श्रीरामस्य बाल-लीलाः, गुरुकुले अध्ययनम्, विवाहः च। |
| २ | अयोध्या-काण्डम् | श्रीरामस्य वन-गमनम्। |

| | | |
|---|---|---|
| ३ | अरण्य-काण्डम् | श्रीरामस्य अरण्ये परिभ्रमणम्, ऋषि-सेवा, यज्ञ-रक्षा, राक्षस-वधः, ज्ञानोपलब्धिः च। |
| ४ | किष्किन्धा-काण्डम् | श्रीराम-सुग्रीवयोः मैत्री, वालि-वधः, सुग्रीवस्य राज्याभिषेकः च। |
| ५ | सुन्दर-काण्डम् | हनुमतः समुद्र-लङ्घनं, सीतान्वेषणम्, लङ्का-दहनं च। |
| ६ | युद्ध-काण्डम् | श्रीराम-रावणयोः युद्धस्य वर्णनम्। |
| ७ | उत्तर-काण्डम् | श्रीरामस्य राज्याभिषेकः, सीता-त्यागः, अश्वमेध-यज्ञः, श्रीरामस्य स्वधाम-गमनं च। |

एतेषु सप्तसु काण्डेषु ५०० सर्गाः २४००० श्लोकाः च सन्ति। तथा हि-

चतुर्विंशत्सहस्राणि श्लोकानामुक्तवान् ऋषिः।
तथा सर्गशतान् पञ्च षट् काण्डानि तथोत्तरम्॥ (बालकाण्डम् ४.२)

२४००० श्लोकात्मकं श्रीरामायणं २४ अक्षरात्मकस्य गायत्री-मन्त्रस्य विस्तारः अस्ति इति विद्वांसः मन्यन्ते। गायत्री-मन्त्रस्य, श्रीरामायणस्य च प्रथमः वर्णः, अन्तिमः वर्णः च त-कारः एव अस्ति। वर्णमालायां त-कारः सुखदायकः गण्यते।

एतत् काव्यं माधुर्येण, ओजसा, प्रसादगुणेन च समन्वितं वर्तते। एतद् अत्यन्तं प्राञ्जलं, भावपूर्णं, मनोहरं, पद-लालित्य-युतं, रस-पूर्णं च अस्ति। अस्मिन् मानवीयान्तः-प्रकृतेः सालङ्कारं निरूपणं, नैसर्गिकं विश्लेषणं च दृश्यते। गिरि-निर्झर-नदी-वन्यलता-वृक्ष-पुष्प-षड्ऋतु-प्रभृतीनां प्राकृतिक-दृश्यानां सजीव-चित्रणम् अत्र यादृशं वर्णितं न तादृशम् अन्यत्र सुलभम्। अस्मिन् आचार-संहितायाः, सभ्यतायाः च सुस्पष्टं चित्रं प्राप्यते। महाकाव्ये अस्मिन् आदर्शानि चरित्राणि, नीति-शिक्षायाः सङ्ग्रहः, वेदोपवेदानां निश्कर्षः, छन्दस्-संगीतादीनाम् अन्वयः च वर्तते। नव-रस-रुचिरा आदि-कवेः इयं कृतिः अद्वितीया वर्तते।उक्तंच -

सदूषणापि निर्दोषा सखरापि सुकोमला।
नमस्तस्मै कृता येन रम्या रामायणी कथा॥ (नलचम्पूः १.११)

**७९. श्रीरामायणस्य कथानकं किम्?**

अस्मिन् विषये एषः श्लोकः प्रसिद्धः -

आदौ राम तपोवनादिगमनं हत्वा मृगं काञ्चनं
वैदेहीहरणं जटायु मरणं सुग्रीव सम्भाषणम्।
वालिनिग्रहणं समुद्रतरणं लङ्कापुरीदाहनं
पश्चाद्रावणकुम्भकर्णहननमेतद्धि रामायणम्॥

अपर: अपि कश्चित् श्लोक: यथा-

जन्मादौ क्रतुरक्षणं मुनिपते: स्थाणोर्धनुर्भञ्जनं
वैदेहीग्रहणं पितुश्च वचनाद्धोराटवीगाहनम्।
कोदण्ड-ग्रहणं खरादिमथनं मायामृगच्छेदनं
बद्धाब्धिक्रमणं दशास्यनिधनं चैदद्धि रामायणम्॥ (श्रीरामकर्णामृतम्)

**८०. रामायणस्य टीका: का:?**

रामायणस्य काश्चन संस्कृत-टीका: यथा-

| टीका-नाम | टीकाकार: |
|---|---|
| रामाभिरामी व्याख्या | नागोजि-भट्ट: |
| भूषण-टीका | गोविन्दराज: |
| रामायण-शिरोमणि: | शिवसहाय: |
| तीर्थ-व्याख्या | माहेश्वरतीर्थ: |

प्राय: सर्वासु अपि भारतीय-भाषासु अपि श्रीवाल्मीकि-रामायणस्य नैका: टीका: उपलभ्यन्ते।

**८१. श्रीवाल्मीकि-रामायणस्य समीक्षिता आवृत्ति: कया संस्थया प्रकाशिता?**

श्रीवाल्मीकि-रामायणस्य समीक्षिता आवृत्ति: वडोदरा-स्थित-प्राच्य-संशोधन-संस्थया प्रकाशिता।

## १५. महाभारत-विवरणम्

**८२. इतिहास-ग्रन्थे अपर: ग्रन्थ: क:?**

इतिहास-ग्रन्थे अपर:ग्रन्थ: महर्षिणा व्यासेन विरचितं महाभारतं वर्तते।

## ८३. 'महाभारत'-शब्दस्य कः अर्थः?

'महाभारत'-ग्रन्थस्य विकासे त्रयः चरणाः वर्तन्ते। तान् वयं कोष्ठक-साहाय्येन जानीमः -

| क्रमः | संस्करणम् | श्लोक-सङ्ख्या | विशेषः |
|---|---|---|---|
| १ | जय-संहिता | ८८०० | श्रीव्यास-वैशम्पायनयोः संवादः |
| २ | भारत-संहिता | २४००० | श्रीवैशम्पायन-जनमेजययोः संवादः |
| ३ | महाभारतम् | १,००,००० | सूत-शौनकादीनां संवादः |

भरत-वंशीयान् अधिकृत्य कृतः ग्रन्थः 'भारतम्' इति नाम्ना प्रसिद्धः। भारतस्य एव परिबृंहितं स्वरूपं 'महाभारतम्' अस्ति इति उपरितन-कोष्ठकात् ज्ञायते। इत्थं 'महत्त्वात् भारतत्वाच्च महाभारतमुच्यते'।

## ८४. श्रीमहाभारतस्य रचयिता कः?

श्रीमहाभारतस्य रचयिता श्रीवेदव्यासः।

## ८५. श्रीमहाभारतस्य रचना कथं जाता?

अस्मिन् विषये काचित् आख्यायिका प्रसिद्धा। श्रीवेदव्यासः विशाल-कायस्य श्रीमहाभारतस्य लेखनाय लेखकस्य अन्वेषणम् अकरोत्। श्रीगणेशः महाभारत-लेखनस्य कार्यम् अङ्गीकृतवान्। तत्र श्रीगणेशेन उक्तं यत् लेखन-काले यदि श्रीव्यासः मध्ये क्वचित् स्थगितः भवेत् तर्हि सः तस्मिन् एव क्षणे लेखन-कार्यं त्यक्ष्यति। श्रीव्यासेन इदम् अङ्गीकृतम्। तेन अपि समयः स्थापितः यत् श्रीगणेशेन अविचिन्त्य किम् अपि न लेखनीयम् इति। इत्थं द्वयोः सम्मत्या महाभारतस्य लेखन-कार्यम् आरब्धम्। तत्र श्रीव्यासः वक्ता, श्रीगणेशः च लेखकः अभवत्। ग्रन्थस्य अस्य लेखनं त्रिषु वर्षेषु सम्पन्नम् इति एतेन श्लोकेन ज्ञायते -

त्रिभिर्वर्षैः सदोत्थाय कृष्णद्वैपायनो मुनिः।
महाभारतमाख्यानं कृतवानिदमुत्तमम्॥ - (आदिपर्व ५६.३२)

## ८६. श्रीमहाभारत-काव्यस्य नायकः कः?

श्रीमहाभारत-काव्यस्य नायकः श्रीकृष्णः।

**८७. श्रीमहाभारत-काव्यस्य प्रधानरसः कः?**

श्रीमहाभारतस्य प्रधानः रसः शान्तरसः।

**८८. श्रीमहाभारतस्य प्रथमः श्लोकः कः?**

नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।
देवीं सरस्वतीं व्यासं ततो 'जय'मुदीरयेत्॥

एषः श्लोकः श्रीमहाभारतस्य प्रथमः श्लोकः तु अस्ति एव, प्रत्येकं पर्वणः प्रारम्भे अपि एषः श्लोकः वर्तते। नैकेषु पुराणेषु अपि एषः श्लोकः पठितः दृश्यते। अत्र 'जय'-शब्दः श्रीव्यासेन विरचितस्य समग्रस्य साहित्यस्य परामर्शकः गण्यते।

**८९. अधुना श्रीमहाभारतस्य सङ्क्षिप्तं परिचयं पश्यामः -**

लक्ष-पद्यात्मकं श्रीमहाभारतं संस्कृत-वाङ्मये विशालतमः ग्रन्थः वर्तते। 'शत-साहस्री संहिता' इत्यपि अस्य ग्रन्थस्य अपरं नाम वर्तते। अस्मिन् अष्टादश पर्वाणि सन्ति। सङ्क्षेपतः एतेन श्लोकेन तानि स्मर्तुं शक्नुमः-

म-द्वयं व-द्वयं चैव श-द्वयं स-द्वयं तथा।
अ-स्वो-स्त्री-भ-द्र-काश्चैव आ-त्रयी भाति भारते॥

उपरितन-श्लोके वर्तमानानां सङ्केतानां विवरणं यथा -

| **क्रमः** | **सङ्केतः** | **पर्व-नाम** | **क्रमः** | **सङ्केतः** | **पर्व-नाम** |
|---|---|---|---|---|---|
| १ | म-द्वयम् | मुसल-पर्व | १० | स्व | स्वर्गारोहण-पर्व |
| २ | | महाप्रस्थानिक-पर्व | ११ | उ | उद्योग-पर्व |
| ३ | व-द्वयम् | वन-पर्व | १२ | स्त्री | स्त्री-पर्व |
| ४ | | विराट्-पर्व | १३ | भ | भीष्म-पर्व |
| ५ | श-द्वयम् | शल्य-पर्व | १४ | द्र | द्रोण-पर्व |
| ६ | | शान्ति-पर्व | १५ | क | कर्ण-पर्व |
| ७ | स-द्वयम् | सभा-पर्व | १६ | आ-त्रयी | आदि-पर्व |
| ८ | | सौप्तिक-पर्व | १७ | | आश्वमेधिक-पर्व |
| ९ | अ | अनुशासन-पर्व | १८ | | आश्रमवासिक-पर्व |

ग्रन्थे पर्वणां यः क्रमः अस्ति तेनैव क्रमेण एव स्मरणाय अधस्तनं पद्यम् उपयुक्तम् -

पर्वस्वादिसभावनं ननु विराडुद्योगभीष्मस्तथा
द्रोणः कर्ण च शल्यसौप्तिकमथ स्त्रीशान्त्यनुशासने।
आश्वामेधिकमाश्रमश्च मुशलं प्रस्थानमारोहणम्
पर्वाणि प्रतिपादितानि कविना श्रीमन्महाभारते॥

विवरणं यथा -

| **पर्व-संख्या** | **पर्व-नाम** | **कथा-भागः** |
|---|---|---|
| १ | आदि-पर्व | महाभारतस्य अनुक्रमणिका भूमिका च |
| २ | सभा-पर्व | कौरव-पाण्डवानां द्यूत-क्रीडा |
| ३ | वन-पर्व | द्यूत-क्रीडायां पराजितानां पाण्डवानां द्वादशवर्षाणि यावत् वनगमनम् |
| ४ | विराट्-पर्व | पाण्डवानाम् एक-वर्षात्मकः अज्ञात-वासः |
| ५ | उद्योग-पर्व | युद्धस्य पूर्व-सज्जता, विदुरनीतिः च |
| ६ | भीष्म-पर्व | भगवद्-गीतोपदेशः, कौरव-पाण्डवानां भीषण-युद्धं, भीष्मस्य बाणशय्या च |
| ७ | द्रोण-पर्व | सेनापति-पदे गुरु-द्रोणस्य नियुक्तिः, युद्धं च |
| ८ | कर्ण-पर्व | सेनापति-पदे कर्णस्य नियुक्तिः, युद्धं च |
| ९ | शल्य-पर्व | सेनापति-पदे शल्यस्य नियुक्तिः, युद्धं च |
| १० | सौप्तिक-पर्व | युद्धस्य परिसमाप्तिः, सर्वेषां कौरवाणां वधः च |
| ११ | स्त्री-पर्व | गान्धार्याः शोकः, गान्धार्याः श्रीकृष्णाय शापः च |
| १२ | शान्ति-पर्व | भीष्मस्य युधिष्ठिराय राज-धर्मोपदेशः, युधिष्ठिरस्य राज्याभिषेकः च |
| १३ | अनुशासन-पर्व | भीष्म-युधिष्ठिरयोः संवादे प्रसिद्धं 'विष्णु-सहस्र-नाम-स्तोत्रम्', भीष्मस्य मृत्युः च |

| | | |
|---|---|---|
| १४ | आश्वमेधिक-पर्व | युधिष्ठिरेण कृतः अश्वमेध-यज्ञः |
| १५ | आश्रम-वासिक-पर्व | गान्धारी-धृतराष्ट्र-कुन्तीनां वन-गमनं मृत्युश्च |
| १६ | मुसल-पर्व | श्रीकृष्ण-बलरामयोः स्वधाम-गमनं यादवानां नाशः च |
| १७ | महाप्रस्थानिक-पर्व | युधिष्ठिरस्य राजत्यागः, हिमालयं प्रति प्रस्थानं च |
| १८ | स्वर्गारोहण-पर्व | द्रौपद्या सह पाण्डवानां स्वर्गं प्रति प्रस्थानम् |

महाभारतस्य सारः एकेन प्रसिद्धेन पद्येन यथा -

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।
आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥ इति।

## ९०. अस्य ग्रन्थस्य वैशिष्ट्यं किम्?

समग्रस्य अपि संस्कृत-वाङ्मयस्य सारः महाभारते वर्तते। सरलया, मधुरया, अतिदीर्घ-समास-विरहितया च भाषया लिखितत्वात् ग्रन्थः अयम् अत्यन्तं लोक-प्रियः। ग्रन्थस्य अस्य रचना-कालात् प्रभृति अद्यावधि रसिकाः अस्य रसास्वादं कुर्वन्ति। महाभारतं न केवलम् आख्यानम् अपि तु निखिलं वैदिकं, लौकिकं च तथ्यं, दर्शनं, शास्त्र-सारः, नीति-शास्त्रम्, आचार-शास्त्रं च अत्र विद्यते। धर्मार्थ-काम-मोक्ष-विषयकं निखिलम् अपि जिज्ञासितं तथ्यम् अत्र अवलोक्यते। अतः एव उक्तम् -

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥ - (आदि-पर्व ६२.५३)

महाभारते उपर्युक्तानि अष्टादश पर्वाणि (एकं खिल-पर्व च), शतम् उपपर्वाणि, १९२३ अध्यायाःच सन्ति। एतस्मिन् काव्ये अधिकांशानि पद्यानि अनुष्टुप्-छन्दसि विरचितानि सन्ति। महाभारते प्रसिद्धानि आख्यानानि अपि बहूनि सन्ति। यथा - शाकुन्तलोपाख्यानम्, मत्स्योपाख्यानम्, रामोपाख्यानम्, नलोपाख्यानम्, सावित्री-उपाख्यानम् इत्यादीनि।

महाभारतस्थानां कथोपाख्यानादीनां महान् प्रभावः परवर्तिनि प्रशिष्ट-संस्कृत-साहित्ये दृश्यते। कालिदास-भारवि-श्रीहर्ष-भासादिभिः श्रेष्ठैः संस्कृत-कविभिः स्वीय-कृतयः महाभारतस्थानाम् उपाख्यानानाम् आधारेण रचिताः। संस्कृतेतरासु नैकासु भारतीय-भाषासु अपि महाभारताश्रितम् उत्कृष्टं साहित्यं रचितम्। श्रीमहाभारतं, श्रीरामायणं च आश्रित्य दूरदर्शन-धारा-वाहिन्यः अपि लोकेषु महतीं प्रसिद्धं प्राप्तवत्यः।

श्रीमहाभारते नैकाः 'गीताः' उपलभ्यन्ते। तासु ग्रन्थस्य अस्य भीष्म-पर्वणि वर्तमाना श्रीमद्-भगवद्-गीता अतीव महत्त्वपूर्णा, ज्ञानपूर्णा, सार्वकालिकी, विश्व-विख्याता च वर्तते। अष्टादशभिः अध्यायैः गुम्फिता सप्तशतेन श्लोकैः विभूषिता इयं गीता युद्धात् विमुखं, विषाद-ग्रस्तं च अर्जुनं प्रति स्वयं भगवतः श्रीकृष्णस्य उपदेश-रूपा वर्तते। विश्व-साहित्यस्य न कोऽपि ग्रन्थः तादृशीं प्रशस्तिं, प्रतिष्ठां च प्राप्नोत् यादृशीं महाभारते उपनिबद्धा गीता प्राप्तवती।

महाभारते धर्म-प्राधान्यं, यज्ञ-यागादि-कर्म-काण्ड-समन्वयः, अध्यात्म-प्रभावः, नीति-दीक्षा-शिक्षणम्, मूल्य-शिक्षणं, आचार-संहिता-संपोषणं च वर्तते। महाभारते काव्यम्, ऐतिह्यं, सङ्गीतं, नृत्यं, वाद्यं, कलाः, वैद्यक-शास्त्रं, वास्तु-शास्त्रं, पाक-शास्त्रं, ज्योतिष-शास्त्रं, गणित-विज्ञानं, खगोल-भूगोल-वर्णनं, जीव-शास्त्रं, रसायन-शास्त्रं, वनस्पति-विज्ञानम्, अस्त्र-शस्त्र- विद्या, योग-शास्त्रम्, क्रीडाः, व्यायामः, आदर्श-अध्यापन-पद्धतिः इत्यादयः विषयाः अपि चर्चिताः सन्ति। सर्व-विषय-सङ्कलनात्, सकल-शास्त्रीय-तत्त्व-सार-ग्रहणात् विश्व-कोशत्वेन चापि अस्य ग्रन्थस्य गणना क्रियते। इत्थं सर्व-मनोहरत्वात् अस्य ग्रन्थस्य विषये न केवलं भारते अपि तु विदेशेषु अपि 'भारतं पञ्चमो वेदः' इति उक्तिः सुप्रसिद्धा।

## ९१. श्रीमहाभारतस्य कथानकं किम्?

अस्मिन् विषये एषः श्लोकः प्रसिद्धः -

आदौ पाण्डवधार्तराष्ट्रजननं लाक्षागृहे दाहनं
द्यूते श्रीहरणं वने विहरणं मत्स्यालये वर्तनम्।
लीलागोग्रहणं रणे वितरणं सन्धिक्रियाजृम्भणम्
पश्चाद्भीष्मसुयोधनादिहननं चैतन्महाभारतम्॥

**९२. श्रीमहाभारतस्य प्रसिद्धाः टीकाः काः?**

श्रीमहाभारतस्य काश्चन प्रसिद्धाः टीकाः यथा -

१. श्रीनीलकण्ठ-विरचिता श्रीमहाभारत-दीपिका टीका,

२. श्री-अर्जुन-मिश्र-विरचिता भारतार्थ-दीपिका टीका,

३. श्री-नारायण-सर्वज्ञ-विरचिता भारतार्थ-प्रकाशाख्या टीका च।

**९३. श्रीमहाभारतस्य समीक्षिता आवृत्तिः कया संस्थया प्रकाशिता?**

श्रीमहाभारतस्य समीक्षिता आवृत्तिः पुणे-स्थितेन भाण्डारकर-प्राच्य-विद्या-संस्थानेन प्रकाशिता।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाग्भवेत्॥
- (श्रीगरुड-पुराणम्, बृहदारण्यकोपनिषद् - १/४/१४)

* * *

# पञ्चमं प्रकरणम्

# सर्वदर्शन-विवरणम्

## १. दर्शन-परिचयः

### १. किं नाम दर्शनम्?

धर्मः अर्थः कामः मोक्षः च इति चत्वारः पुरुषार्थाः सन्ति। तेषु मोक्षः एव एतादृशः विषयः अस्ति यम् अधिकृत्य समग्रे संस्कृत-साहित्ये विचाराः प्राप्यन्ते। समस्तम् अपि वैदिक-साहित्यं मोक्ष-प्राप्तेः उपायान् विविध-प्रकारेण विवृणोति। यत् शास्त्रं एतस्य मोक्षस्य प्राप्त्युपायान् दर्शयति तत् "दर्शनम्" इति पदेन कथ्यते।

यथा अस्मिन् लोके वयं प्रगतिम् इच्छामः तर्हि 'दृष्टिः' अर्थात् नेत्रम् आवश्यकम्, तथैव यदि वयम् अस्माकं आध्यात्मिकस्य जीवनस्य प्रगतिम् इच्छामः तर्हि 'दर्शनम्' आवश्यकम्। दर्शनविहीनः नरः अन्धः भवति।

अतः दर्शनं नाम १. वेदानां सारतत्त्वम्, २. आध्यात्मिक उन्नतेः एकं साधनम्, ३. किञ्चित् शास्त्रम् इति वक्तुं शक्यते।

### २. भारतीय-दर्शनस्य मूलं कुत्र दृश्यते?

संस्कृत-साहित्यक्षेत्रे वेदानाम् अतीव महत्त्वपूर्णं स्थानं विद्यते। यतो हि वेदाः संस्कृत-साहित्ये विद्यमानानां निखिल-ग्रन्थानां मूल-स्रोतांसि वर्तन्ते। धर्मस्य मूलभूतं प्रमाणं वेदाः एव। अतः भारतीय-दर्शनस्य मूलं वेद-संहितासु एव दृश्यते। तथा च ब्राह्मण-साहित्ये आरण्यक-साहित्ये अपि भारतीय-दर्शनस्य मूलम् उपलभ्यते। उपनिषत्-साहित्यं तु दर्शनस्य परमं स्थानम् अस्ति।

### ३. मानव-जीवनस्य चरमं लक्ष्यं किम् अस्ति?

धर्मः, अर्थः, कामः, मोक्षः, चेति चतुर्वर्गाणां प्राप्तिः मानव-जीवनस्य चरमं लक्ष्यम् अस्ति। इमे चत्वारः पुरुषार्थाः पुरुषैः सर्वदा अर्थ्यमानाः सन्ति। एतत्-प्राप्त्यर्थम् एव पुरुषः अनवरतं प्रयत्नशीलः भवति।

**४. एतेषां चतुर्णां पुरुषार्थानां प्राप्तिः कथं भवति?**

एतेषां चतुर्णां पुरुषार्थानां प्राप्तिः वेदानाम्, तदङ्गानां, दर्शनानां च अध्ययनेन, तत्र प्रतिपादित-कर्मणाम् अनुष्ठानेन च भवति।

## १.१ दर्शन-शब्दार्थः

**५. दर्शन-शब्दस्य व्युत्पत्तिः कथं भवति?**

'दृशिर् - प्रेक्षणे' इति प्रेक्षणार्थक-दृश्-धातोः भावे करणे वा अर्थे 'ल्युट्'-प्रत्ययः क्रियते। ल्युटः स्थाने 'अन'-आदेशे कृते स्वादिकार्ये च कृते 'दर्शनम्' इति पदं सिद्ध्यति।

**६. 'दर्शनम्' इति पदस्य अर्थः कः?**

दृश्यते ज्ञायते वस्तुतत्त्वम् अनेन इति दर्शनम्। वस्तुनः यथार्थज्ञानं येन साधनेन भवति, तस्य साधनस्य नाम दर्शनम् इति वक्तुं शक्यते।

**७. दर्शन-पदस्य "दृश्यते अनेन इति दर्शनम्" इति अर्थः कथं प्राप्यते?**

दर्शन-शब्दे करणार्थे 'ल्युट्'-प्रत्ययः कृतः अस्ति। करणम् अर्थात् क्रियायां प्रकृष्टोपकारकम्, 'साधनम्' इति वा। अतः येन साधनेन इदं वस्तुजातम्, ब्रह्म, जीवात्मा, प्रकृतिः च याथातथ्येन दृश्यते, अर्थात् निरीक्ष्यते तत् साधनम् एव 'दर्शनम्' इति प्रसिद्धम्।

**८. किं नाम दर्शन-शास्त्रम्?**

अस्मिन् संसारे आध्यात्मिक-आधिभौतिक-आधिदैविकेति त्रिविध-दुःखानाम् अनुभवः सर्वेषां भवति। अतः एतेभ्यः त्रिविध-दुःखेभ्यः सर्वथा मुक्त्यर्थम् ऋषिभिः सूक्ष्म-चिन्तन-द्वारा ये अनुभूति-सम्पन्नाः सिद्धान्ताः प्रदत्ताः सन्ति, तेषां लिखितानां सिद्धान्तानां यत् ग्रन्थ-स्वरूपम् अस्ति तद् 'दर्शन-शास्त्रम्' इति उच्यते।

**९. दर्शनस्य शास्त्रत्वं कथं सिद्ध्यति?**

शास्त्रं नाम यत् हितं शास्ति/उपदिशति। मनुष्याणां प्रवृत्तिः शुभकर्मसु भवेत्, अशुभकर्मभ्यः तेषां निवृत्तिः भवेत् इति शास्त्रम् उपदिशति। दर्शनम् अपि सर्वेषां परम-कल्याणाय मोक्षस्य मार्गं प्रदर्शयति। अतः दर्शनस्य शास्त्रत्वं प्रसिद्धम् एव।

**१०. शास्त्रस्य लक्षणं किम् अस्ति?**

शास्त्रस्य लक्षणं श्लोकवार्तिके ग्रन्थे एवम् उक्तम् –

प्रवृत्तिर्वा निवृत्तिवा नित्येन कृतकेन वा।
पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते॥

अर्थात् यत् पुंसां नित्येन अनित्येन वा प्रवृत्तिं निवृत्तिं वा अवबोधयति तत् शास्त्रम्।

शास्त्रस्य लक्षणान्तरम् अपि प्राप्यते। तद्यथा –

शासनात् शंसनात् शास्त्रं शास्त्रमित्यभिधीयते।
शासनं द्विविधं प्रोक्तं शास्त्रलक्षणवादिभिः॥

शास्त्रपदस्य अर्थद्वयं (१) शासनम्, (२) शंसनं चेति। शासनं द्विविधं प्रवृत्तिः निवृत्तिः वा। शासनार्थे शास्त्रं क्रियाप्रेरकम् अतः पुरुषतन्त्रम्। शंसनार्थे शास्त्रं ज्ञानपरम् अतः वस्तुतन्त्रम्।

**११. 'दर्शनम्' इति पदस्य पर्याय-पदानि कानि सन्ति?**

तत्त्व-शास्त्रम्, तत्त्व-विज्ञानम्, अन्वीक्षा-शास्त्रम् इत्यादि-पदानि 'दर्शनम्' इति पदस्य पर्याय-वाचकानि सन्ति।

**१२. संस्कृत-वाङ्मये दर्शन-शास्त्राणां कीदृशं स्थानं वर्तते?**

संस्कृत-वाङ्मये दर्शन-शास्त्राणाम् उच्चतम-स्थानं वर्तते। यतो हि दर्शन-शास्त्रम् उच्चतमं तत्त्वज्ञानं दर्शयति। किं बहुनां परम-कल्याण-भूतस्य मोक्षस्य मार्गम् अपि दर्शन-शास्त्रम् एव दर्शयति। अतः संस्कृत-वाङ्मये दर्शन-शास्त्रम् उच्चतम-शिखरे वर्तते।

**१३. वेदेषु दर्शन-शास्त्रस्य कानि स्त्रोतांसि प्राप्यन्ते?**

दर्शनस्य उद्भव-बीजं वेदेषु दृश्यते। वेदानाम् उपनिषद्-भागः तथा च आरण्यक-भागः अपि दर्शनस्य मूल-स्रोतः वर्तते।

यथा ऋग्वेदस्य अस्य वामीयसूक्ते एकः मन्त्रः प्राप्यते तद्यथा –

**"को ददर्श प्रथमं जायमानमस्थन्वन्तं यदनस्थ बिभर्ति।**
**भूम्या असुरसृगात्मा क्व स्वित् को विद्वांसमुपगात् प्रष्टुमेतत्"** इति।

अस्मिन् मन्त्रे जगत्-कारणस्य परमात्मनः तत्त्व-विवेचना उपलभ्यते। एवमेव बृहदारण्यकोपनिषदि आत्म-विषयिण्याः चर्चायाः एकः मन्त्रः अस्ति, यथा – **"आत्मा वा अरे**

**द्रष्टव्यः श्रोतव्यः मन्तव्यो निदिध्यासितव्यः। मैत्रेय्यात्मनि खल्वरे मते विज्ञाते इदं सर्वं विदितम्॥"** इति।

**१४. दर्शन-शास्त्रे केषां विषयाणां चर्चा भवति?**

दर्शन-शास्त्रे प्राधान्येन अधोलिखित-विषयाणां चर्चा भवति – (१) ब्रह्म किम् अस्ति? (२) ब्रह्मणः स्वरूपं किम्? (३) ईश्वरः कः अस्ति? (४) ब्रह्म-प्राप्त्युपायाः के सन्ति? (५) इदं जगत् किम् अस्ति? (६) अस्मिन् संसारे नित्यं किम् अस्ति अनित्यं किम् अस्ति? (७) इयं सृष्टिः कुतः उत्पन्ना? (८) जीवः कः अस्ति? (९) जीवात्मनः स्वरूपं किम् अस्ति? (१०) मरणानन्तरं जीवस्य किं भवति? (११) जीवस्य लक्ष्यं किम् अस्ति? (१२) मोक्ष-प्राप्तेः उपायाः के सन्ति? (१३) आत्मा चेतनः उत अचेतनः? (१४) श्रेयः किम् अस्ति? (१५) प्रेयः किम् अस्ति?

**१५. दर्शन-शास्त्रस्य अध्ययनेन कः लाभः?**

दर्शन-शास्त्रं विशिष्ट-प्रकारकं विज्ञानम् अस्ति। अतः अस्य अध्ययनेन द्विविधः लाभः भवति - (१) लौकिकः लाभः, (२) पारमार्थिकः लाभः च।

**१६. दर्शनशास्त्रस्य अध्ययनेन पारमार्थिकः लाभः कः?**

दर्शन-शास्त्रस्य अध्ययनेन एते पारमार्थिकाः लाभाः भवन्ति - दर्शन-शास्त्रं मोक्ष-शास्त्रम् अस्ति, अतः मोक्ष-प्राप्त्यर्थम् अस्य अध्ययनम् अनिवार्यम्। अतः –

१. दर्शन-शास्त्रस्य अध्ययनेन परमात्मनः स्वरूपं ज्ञातुं शक्यते।

२. दर्शन-शास्त्रस्य अध्ययनेन परमात्मनः स्वरूपं ज्ञात्वा मोक्षस्य प्राप्तिः भवितुम् अर्हति।

३. जीवने श्रद्धा, भक्तिः, समर्पणम्, विश्वासः, परोपकारिता इत्यादि-सात्त्विक-गुणानाम् अभिवृद्धिः भवति।

४. अहंता ममता इत्यादि-भावानां परित्याग-कारणात् मनुष्यः सर्वत्र समवस्थाम् अनुभवति। अतः मनुष्यः आध्यात्मिकम् आनन्दं प्राप्नोति दर्शन-शास्त्रस्य अध्ययनेन।

५. अस्य अध्ययनेन जगतः ईश्वरस्य मायायाः प्रकृतेः च ज्ञानं भवति। अस्मिन् जगति कार्य-कारणयोः सम्बन्ध-ज्ञानेन तत्त्वज्ञानं भवति।

६. विभिन्न-मोक्ष-शास्त्राणाम् अध्ययनेन तेषु प्रतिपादितानां पारमार्थिक-तत्त्वानां ज्ञानं भवति, येन मोक्ष-प्राप्तिः भवितुम् अर्हति।

**१७. दर्शन-शास्त्रस्य अध्ययनेन लौकिकः लाभः कः?**

दर्शन-शास्त्रस्य अध्ययनेन एते लौकिकाः लाभाः भवन्ति –

१. कस्यापि पदार्थस्य ज्ञानं प्रमाणात् भवति, दर्शन-शास्त्रस्य अध्ययनेन प्रमाणानां सम्यक् ज्ञानं भवति।

२. जगति विद्यमानानां पदार्थानां कार्य-कारणभावः ज्ञायते।

३. कस्यापि शास्त्रस्य तलस्पर्शि-ज्ञानस्य कृते तस्य दार्शनिकाः पक्षाः ज्ञातव्याः भवन्ति, अतः दर्शन-शास्त्रस्य अध्ययनेन विभिन्न-शास्त्राणां दार्शनिकाः पक्षाः ज्ञातुं शक्यन्ते।

४. दर्शन-शास्त्रेषु निरूपितानां जीवन-मूल्यानाम् आचरणेन वयं स्वजीवनम् आनन्दमयं कर्तुं शक्नुमः।

५. दर्शन-शास्त्रस्य अध्ययनेन बुद्धिः अत्यन्तं तीक्ष्णा भवति, अतः कस्यापि विषयस्य सूक्ष्मातिसूक्ष्मरूपेण विचारं कर्तुं सामर्थ्यं प्राप्यते।

## १.२ दर्शनस्य प्रकाराः

**१८. दर्शनस्य कति प्रकाराः सन्ति?**

दर्शनस्य प्रकारद्वयम् अस्ति। वैदिक-दर्शनम् अवैदिक-दर्शनं च।

**१९. प्रमुखानि वैदिक-दर्शनानि कति सन्ति?**

प्रमुखानि वैदिकदर्शनानि षट् सन्ति। (१) न्याय-दर्शनम्, (२) वैशेषिक-दर्शनम्, (३) सांख्य-दर्शनम्, (४) योग-दर्शनम्, (५) पूर्व-मीमांसा-दर्शनम्, (६) उत्तर-मीमांसा-दर्शनं च।

**२०. प्रमुखानि अवैदिक-दर्शनानि कति सन्ति?**

प्रमुखानि अवैदिक-दर्शनानि त्रीणि सन्ति – (१) चार्वाक-दर्शनम्, (२) बौद्ध-दर्शनम्[१], (३) जैन-दर्शनं चेति।

---

[१] बौद्धदर्शनस्य चत्वारः सम्प्रदायाः सन्ति (१) वैभाषिकः (सर्वास्तित्ववादः), (२) सौत्रान्तिकः (बाह्यानुमेयवादः), (३) योगाचारः(विज्ञानवादः), (४) माध्यमिकः (शून्यवादः) च। अतः क्वचित् ग्रन्थेषु तथा च केषाञ्चन विदुषां मते बौद्धदर्शनस्य सम्प्रदायभेदेन बौद्धदर्शनं चतुर्धा विभक्तम्। अतः चत्वारि बौद्धदर्शनानि, चार्वाकदर्शनं, जैनदर्शनं च इत्येवंरूपेण अवैदिकदर्शनानि षट् सन्ति।


**२१. वैदिक-अवैदिकदर्शनयोः अपरं नाम किम्?**

वैदिक-दर्शनानाम् अपरं नाम 'आस्तिक-दर्शनानि' इति, अवैदिक-दर्शनानाम् अपरं नाम 'नास्तिक-दर्शनानि' इति।

**२२. आस्तिक-दर्शनेषु किं साम्यम् अस्ति?**

षड् आस्तिक-दर्शनानि त्रिधा विभक्तानि भवन्ति। तद्यथा – (१) द्वौ तर्कौ, (२) द्वे सांख्ये, (३) द्वे मीमांसे च। समानतन्त्रत्वात् अयं विभागः कृतः। यथा द्वौ तर्कौ – १. न्याय-दर्शनं वैशेषिक-दर्शनं च प्रमाण-पदार्थ-विचार-प्रधानौ। द्वे सांख्ये – १. सांख्य-दर्शनं योग-दर्शनं च प्रकृति-पुरुषयोः विचार-प्रधाने, द्वे मीमांसे च १. पूर्व-मीमांसा उत्तर-मीमांसा च धर्म-ब्रह्म-विचारप्रधाने।

दर्शनानां प्रकारं वयम् अधस्तनाकृत्या पश्यामः –




**२३. आस्तिक-नास्तिक-दर्शनयोः भेदस्य कारणं किम्?**

भारतीय-दर्शनानि द्विधा विभज्यन्ते – आस्तिक-दर्शनानि, नास्तिक-दर्शनानि चेति। "अस्ति परलोके मतिः यस्य स आस्तिकः", "नास्ति परलोके मतिः यस्य सः नास्तिकः" इति आस्तिक-नास्तिक-शब्दयोः अर्थः। अथवा "अस्ति पारलौकिक-विषय-प्रवृत्तिः यस्य स आस्तिकः", "नास्ति च पारलौकिक-विषय-प्रवृत्तिः यस्य सः नास्तिकः" इत्यपि व्युत्पत्तिः कथयितुं शक्यते। "अस्तिनास्ति दिष्टं मतिः" इति पाणिनीय-सूत्रेण (८.८.६०) ठक्प्रत्यये 'ठस्येक' इति सूत्रेण ठकारस्य स्थाने 'इक'-आदेशे स्वादि-कार्ये च आस्तिक-नास्तिक-पद-द्वयं

सिद्ध्यति। तत्र यानि दर्शनानि वेदानां परमं प्रामाण्यं स्वीकुर्वन्ति तानि आस्तिक-दर्शनानि इति व्यवह्रियन्ते। आस्तिक-दर्शनानि पूर्वोक्तरीत्या षट् सन्ति (१) न्याय-दर्शनम्, (२) वैशेषिक-दर्शनम्, (३) सांख्य-दर्शनम्, (४) योग-दर्शनम्, (५) पूर्व-मीमांसा-दर्शनम्, (६) उत्तर-मीमांसा-दर्शनं च। "नास्तिका वेदनिन्दकाः" इति वचनानुरोधात् यानि दर्शनानि वेदानां प्रामाण्यं न स्वीकुर्वन्ति तानि नास्तिक-दर्शनानि इति व्यवह्रियन्ते। नास्तिक-दर्शनानि त्रीणि सन्ति - (१) चार्वाक-दर्शनम्, (२) बौद्ध-दर्शनम्, (३) जैन-दर्शनं चेति।

## २४. आस्तिक-दर्शनानां प्रवर्तकाः के सन्ति?

अधोलिखित-तालिकायाम् आस्तिक-दर्शनानां प्रवर्तकानाम् महर्षीणां नामानि प्रस्तूयन्ते–

| **क्रमः** | **दर्शनस्य नाम** | **प्रवर्तकः महर्षिः** | **सूत्र-ग्रन्थः** |
|---|---|---|---|
| १. | न्याय-दर्शनम् | महर्षिः गौतमः | न्याय-सूत्रम् |
| २. | वैशेषिक-दर्शनम् | महर्षिः कणादः | वैशेषिक-सूत्रम् |
| ३. | सांख्य-दर्शनम् | महर्षिः कपिलः | सांख्य-सूत्रम् |
| ४. | योग-दर्शनम् | महर्षिः पतञ्जलिः | योग-सूत्रम् |
| ५. | पूर्व-मीमांसा | महर्षिः जैमिनिः | मीमांसा-सूत्रम् |
| ६. | उत्तर-मीमांसा | महर्षिः बादरायणः (वेदव्यासः) | ब्रह्म-सूत्रम् (वेदान्त-सूत्रम्) |

## २५. नास्तिक-दर्शनानां प्रवर्तकाः के सन्ति?

अधोलिखित-तालिकायाम् नास्तिक-दर्शनानां प्रवर्तकानां नामानि प्रस्तूयन्ते–

| **क्रमः** | **दर्शनस्य नाम** | **प्रवर्तकः** |
|---|---|---|
| १. | चार्वाक-दर्शनम् | बृहस्पतिः |
| २. | बौद्ध-दर्शम् | तथागतः बुद्धः |
| ३. | जैन-दर्शनम् | भगवान् महावीरः |

## २. न्याय-वैशेषिक-दर्शनयोः परिचयः

**२६. षड् आस्तिक-दर्शनेषु सर्व-प्रथमं स्थानं कस्य अस्ति?**

षड् आस्तिक-दर्शनेषु सर्व-प्रथमं स्थानं न्याय-दर्शनस्य अस्ति।

**२७. "न्यायः" इति शब्दस्य अर्थः कः?**

न्याय-पदस्य व्युत्पत्तिः बहुधा प्राप्यते। तद्यथा -

१. "नियमेन ईयते" इति न्यायः।

२. "प्रमाणैः अर्थ-परीक्षणं न्यायः"। (वात्स्यायन-भाष्ये)

३. "नीयते=प्राप्यते अयनं=मोक्षः येन असौ न्यायः"।

४. "नीयते=अधिगम्यते विवक्षितार्थस्य सिद्धिः येन असौ न्यायः"।

**२८. न्याय-दर्शनम् इतोऽपि केन नाम्ना प्रसिद्धम्?**

न्याय-दर्शनम् इतोऽपि तर्क-शास्त्रम्, अनुमान-शास्त्रम्, तर्क-विद्या, वाद-शास्त्रम्, प्रमाण-शास्त्रम्, हेतु-विद्या, मनन-शास्त्रम्, अक्षपाद-दर्शनम् आन्वीक्षिकी इत्यादिभिः नामभिः प्रसिद्धम् अस्ति।

**२९. न्याय-दर्शनम् "आन्वीक्षिकी" इति नाम्ना किमर्थं प्रसिद्धम्?**

अस्मिन् दर्शने अनुमान-प्रमाणस्य प्राधान्यात् इदं दर्शनम् "आन्वीक्षिकी" इति नाम्ना अपि प्रसिद्धम्।

**३०. का नाम अन्वीक्षा?**

प्रत्यक्ष-आगम-आश्रितं यत् अनुमानं भवति तत् "अन्वीक्षा" इति उच्यते। प्रत्यक्ष-अनुमानाभ्याम् ईक्षितस्य अन्वीक्षणम् अन्वीक्षा, तया प्रवर्तते इति आन्वीक्षिकी = न्याय-विद्या = न्याय-शास्त्रम्।

**३१. वैशेषिक-दर्शनस्य नाम-करणे कः हेतुः?**

'विशेषः' इति पदार्थं ये स्वीकुर्वन्ति ते वैशेषिकाः। विशेष-शब्दात् ठक्-प्रत्यये कृते तस्य इकादेशे स्वादि-कार्ये कृते च वैशेषिकाः इति रूपं सिद्धं भवति। अयं पदार्थः अस्मात् पदार्थात् भिन्नः इति पदार्थयोः भेदः विशेष-नामकेन पदार्थ-द्वारा स्पष्टः भवति। अतः अयं विशेष-नामकः पदार्थः यस्मिन् दर्शने स्वीक्रियते तत् दर्शनम् वैशेषिक-दर्शनम् इति नाम्ना प्रसिद्धिं गतम्।

वैशेषिक-शब्दस्य उत्पत्ति-विषये क्वचित् मतभेदः अपि दृश्यते। केचन वदन्ति यत् वैशेषिक-दर्शनस्य प्रवर्तकः महर्षिः कणादः विशेषस्य उपदेष्टा, इदं दर्शनं न्याय-सांख्यादि-दर्शन-तुलनया द्रव्यादि-पदार्थानां प्रतिपादने विशिष्टम् अस्ति इति कारणात् अस्य दर्शनस्य नाम वैशेषिकम् इति जातम्। अन्ये तु कथयन्ति यत् पञ्चम-पदार्थस्य 'विशेषस्य' अतिरिक्ततया कथनात् वैशेषिकम् इति नाम। वस्तुतः अन्तिमं मतं किञ्चित् युक्ति-युक्तम् अस्ति इति बहुभिः स्वीक्रियते।

**३२. वैशेषिक-दर्शनस्य प्रवर्तकः कः अस्ति?**

वैशेषिक-दर्शनस्य प्रवर्तकः महर्षिः कणादः अस्ति। "कणं कणम् अत्ति" इति अन्वर्थ-नाम्ना प्रसिद्धः कणादः।

**३३. वैशेषिक-दर्शनस्य अपरं नाम किम्?**

वैशेषिक-दर्शनम् "औलूक्य-दर्शनम्", "काणाद-दर्शनम्" इत्यादि-नाम्ना अपि दर्शन-जगति प्रसिद्धम्।

**३४. बहुत्र न्याय-वैशेषिक-दर्शनयोः युगपत् नाम किमर्थं स्वीक्रियते?**

न्याय-दर्शनस्य वैशेषिक-दर्शनस्य च समान-तन्त्रत्वात् प्रायः उभयोः नाम युगपत् स्वीक्रियते।

**३५. समानतन्त्रम् इति पदस्य कः अर्थः?**

येषां शास्त्राणां तत्त्व-विचारस्य सरणिः समाना भवति, प्रयोजनम् अपि समानं भवति, तेषां शास्त्राणाम् मध्ये "समान-तन्त्रत्वम्" भवति।

**३६. न्याय-वैशेषिक-दर्शनयोः मध्ये समान-तन्त्रत्वं कथम् अस्ति?**

न्याय-दर्शने प्रतिपादितानां विषयाणां समानः विचारः वैशेषिक-दर्शने अपि प्राप्यते। न्याय-दर्शने प्रमाणं प्रधानतया विचार्यते, वैशेषिक-दर्शने तु प्रमेयस्य प्रधानतया विचारः क्रियते।

## २.१ न्याय-दर्शनस्य महत्त्वम्

**३७. आस्तिक-दर्शनेषु न्याय-दर्शनस्य किं महत्त्वम् अस्ति?**

आस्तिक-दर्शनेषु न्याय-दर्शनं सर्व-शास्त्रोपकारकत्वेन प्रसिद्धम् अस्ति। यथा उच्यते –

"काणादं पाणिनीयं च सर्व-शास्त्रोपकारकम्" इति।

काणादम् इत्युक्ते कणाद-महर्षिद्वारा प्रवर्तितं वैशेषिक-दर्शनम्। अत्र काणादम् इति पदेन महर्षिगौतम-प्रणीतस्य न्याय-दर्शनस्य अपि ग्रहणं भवति। पाणिनीयम् इत्युक्ते पाणिनिना रचितं व्याकरणशास्त्रम्। एतद् उभयं सर्वेषां शास्त्राणाम् उपकारकत्वेन प्रसिद्धम् अस्ति।

**३८. आस्तिक-दर्शनेषु सर्वप्रथमं न्यायदर्शनस्य नाम किमर्थं स्वीक्रियते?**

न्याय-दर्शनं प्राचीनम् अस्ति। अपि च इदं दर्शनं सर्व-शास्त्राणाम् उपकारकम् अस्ति। अतः आस्तिक-दर्शनेषु सर्व-प्रथमं न्याय-दर्शनस्य नाम स्वीक्रियते। यथा उक्तम् –

प्रदीपः सर्वविद्यानाम् उपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता[१] ॥
सम्यग्-दर्शनसम्पन्नः कर्मभिर्न निबध्यते।
दर्शनेन विहीनस्तु संसारं प्रतिपद्यते॥

## २.२ न्याय-दर्शनस्य ग्रन्थाः

**३९. न्याय-दर्शनस्य मुख्याः ग्रन्थाः के सन्ति?**

न्याय-दर्शनस्य मुख्य-ग्रन्थानां संक्षेपेण परिचयः अधः प्रस्तूयते –

| ग्रन्थस्य नाम | रचयिता | वैशिष्ट्यम् |
|---|---|---|
| न्याय-सूत्रम् | महर्षिः गौतमः | न्याय-दर्शनस्य आधारभूतः सूत्रग्रन्थः |
| वात्स्यायन-भाष्यम् | वात्स्यायनः | न्यायसूत्राणां प्रसिद्धः भाष्य-ग्रन्थः |
| न्याय-भाष्य-वार्तिकम् | उद्द्योतकरः | वात्स्यायन-भाष्यस्य उपरि वार्तिकग्रन्थः |
| न्याय-मञ्जरी | जयन्त-भट्टः | प्रमुख-न्याय-सूत्राणाम् उपरि लिखितः अयं ग्रन्थः नैकान् न्याय-विषयान् सूक्ष्मतया प्रतिपादयति। |
| न्यायसारः | भासर्वज्ञः | न्याय-दर्शनस्य प्रकरण-ग्रन्थः यत्र प्रमाण-मीमांसायाः प्राधान्यम्, अस्ति। |

[१] क्वचित् "आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता" इत्यपि पाठः उपलभ्यते।

| | | |
|---|---|---|
| तत्त्व-चिन्तामणिः | गङ्गेशोपाध्यायः | नव्य-न्यायस्य प्रवर्तकः अत्यन्तं प्रसिद्धः ग्रन्थः। |
| दीधिति-टीका (तत्त्वचिन्तामणेः टीका) | रघुनाथ-शिरोमणिः | तत्त्व-चिन्तामणेः प्रसिद्धाः टीका |
| माथुरी (तत्त्वचिन्तामणेः टीका) | मथुरानाथ-तर्कवागीशः | मथुरानाथः रघुनाथ-शिरोमणेः प्रधान-शिष्यः आसीत्। अनेन स्वगुरोः दीधिति-टीकाम् अवलम्ब्य माथुरी टीका कृता। |
| जागदीशी | जगदीश-तर्कालङ्कारः | रघुनाथ-शिरोमणेः दीधिति-टीकां विषयीकृत्य जागदीशी नाम्ना टीका जगदीश-भट्टाचार्येण विरचिता। |
| गादाधरी | गदाधर-भट्टाचार्यः | रघुनाथ-शिरोमणेः दीधितिव्याख्यायाः व्याख्या |
| न्याय-सिद्धान्त-मुक्तावली | विश्वनाथ-पञ्चाननः | कारिकाभिः निबद्धः अयं ग्रन्थं न्याय-विषयान् सरलतया प्रतिपादयति। |
| तर्क-भाषा | केशव-मिश्रः | न्याय-दर्शनस्य षोडश-पदार्थानां निरूपणं सरलरीत्या प्राप्यते। |
| तर्क-सङ्ग्रहः | अन्नम्भट्टः | न्याय-दर्शने प्रवेशाय अत्यन्तं सरलरीत्या संक्षिप्त-रीत्या च लिखितः प्रकरणग्रन्थः। |

### ४०. न्याय-सूत्रेषु किं वर्तते?

न्याय-सूत्रेषु ५ अध्यायाः, १० आह्निकानि, ५२८ सूत्राणि[१] च सन्ति।

### ४१. न्याय-सूत्रेषु प्रथमं सूत्रं किम्?

न्याय-सूत्रेषु प्रथमं सूत्रम् "प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानात् निःश्रेयसाधिगमः" इति अस्ति।

[१] पाठभेदकारणात् क्वचित् सूत्रसंख्या ५३२ अपि उच्यते।

**४२. न्याय-सूत्रम् अतिरिच्य न्याय-दर्शने इतोऽपि कः ग्रन्थः अत्यन्तं महत्त्वपूर्णः?**

न्याय-सूत्रम् अतिरिच्य न्याय-दर्शने गङ्गेशोपाध्याय-विरचितः "तत्त्व-चिन्तामणिः" इति ग्रन्थः महत्त्वपूर्णः अस्ति।

**४३. "तत्त्व-चिन्तामणिः" इति ग्रन्थः किमर्थम् अत्यन्तं महत्त्वपूर्णः अस्ति?**

"तत्त्व-चिन्तामणिः" इति ग्रन्थाद् आरभ्य न्याय-दर्शने "नव्य-न्यायः" इति काचित् परम्परा आरब्धा। अतः गङ्गेशोपाध्यायात् पूर्वं यत् न्यायदर्शनस्य स्वरूपं प्राप्यते तत् "प्राचीन-न्यायः" इति नाम्ना व्यवह्रियते। न्यायदर्शने नूतनायाः धारायाः प्रवर्तकत्वात् अयं ग्रन्थः अत्यन्तं महत्त्वपूर्णः वर्तते।

**४४. "प्राचीन-न्यायः", "नव्य-न्यायः" अनयोः मध्ये कः भेदः?**

न्याय-शास्त्रस्य प्रवृत्तिः द्विधा दृश्यते - प्रमेय-प्रधाना, प्रमाण-प्रधाना च। येषु ग्रन्थेषु प्रमेय-विचाराणां प्राधान्यं भवति ते प्रमेय-प्रधानाः। येषु ग्रन्थेषु प्रमाण-विचाराणां प्राधान्यं भवति ते प्रमाण-प्रधानाः। महर्षि-गौतमाद् आरभ्य गङ्गेशोपाध्याय-पर्यन्तेषु सर्वेषु ग्रन्थेषु प्रमेय-निरूपणस्य प्राधान्यं दृश्यते अतः ते प्रमेय-प्रधानाः ग्रन्थाः। गङ्गेशोपाध्यायात् आरब्धेषु सर्वेषु ग्रन्थेषु प्रमाण-निरूपणस्य प्राधान्य-दर्शनात् ते प्रमाण-प्रधानाः ग्रन्थाः। तथा च प्रमेय-प्रधानाः ग्रन्थाः प्राचीन-न्याय-शास्त्रे, प्रमाण-प्रधानाः ग्रन्थाः नव्य-न्याय-शास्त्रे च परि-गण्यन्ते इति "प्राचीन-न्यायः", "नव्य-न्यायः" अनयोः मध्ये एकः भेदः अस्ति।

**४५. "प्राचीन-न्यायः", "नव्य-न्यायः" इति अनयोः मध्ये इतोऽपि कः भेदः?**

प्राचीन-नव्यन्याययोः न केवलं प्रमेय-प्रमाण-विचाराणां भेदः, परं भाषायां शैल्यां च भेदः अस्ति। प्राचीन-न्याय-शास्त्रस्य शैली सरला सुगमा आडम्बर-रहिता च दृश्यते। प्रायोगिक-शैल्यां रचिताः ग्रन्थाः संक्षिप्ताः सन्ति। परं नव्य-न्याय-शास्त्र-ग्रन्थेषु प्रकारता-विशेष्यता-संसर्गता-प्रतियोगिता-अनुयोगिता-अवच्छेदकता-निरूप्यता-निरूपकता-प्रभृतयः शब्दाः आधिक्येन दृश्यन्ते। नव्य-न्याय-शैली परिमार्जिता आडम्बर-पूर्णा स्वरूपतः दुर्गमा अपि शैलीसौन्दर्यात् अर्थतः स्पष्टा भवति। प्राचीन-न्याय-शास्त्रे विषय-प्रतिपादनं तलस्पर्शि न अपि तु स्थूलं भवति। नव्य-न्याये तु विषय-प्रतिपादनं सूक्ष्मातिसूक्ष्मविचारप्रधानं सत् सर्वाङ्ग-स्पर्शि भवति।

**४६. वैशेषिक-दर्शनस्य आदिमं सूत्रं किम्?**

“धर्म-विशेष-प्रसूतात् द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायानां पदार्थानां साधर्म्य-वैधर्म्याभ्यां तत्त्वज्ञानात् निःश्रेयसाधिगमः” इति अस्य दर्शनस्य आदिमं सूत्रम्।

## २.३ वैशेषिक-दर्शनस्य प्रमुखाः ग्रन्थाः

**४७. वैशेषिक-दर्शनस्य मुख्याः ग्रन्थाः के सन्ति?**

वैशेषिक-दर्शनस्य मुख्य-ग्रन्थानां संक्षेपेण परिचयः अधः प्रस्तूयते –

| ग्रन्थस्य नाम | रचयिता | वैशिष्ट्यम् |
|---|---|---|
| वैशेषिक-सूत्रम् | महर्षिः कणादः | वैशेषिक-दर्शनस्य आधारभूतः सूत्रग्रन्थः |
| प्रशस्तपाद-भाष्यम् | प्रशस्तपादः | वैशेषिक-दर्शनस्य प्रसिद्धं भाष्यम् |
| किरणावली-टीका | उदयनाचार्यः | प्रशस्तपाद-भाष्यस्य व्याख्यारूपः ग्रन्थः |
| न्याय-कन्दली-टीका | श्रीधराचार्यः | प्रशस्तपादस्य ‘पदार्थधर्म-संग्रहः’ इति ग्रन्थस्य टीकारूपः ग्रन्थः |
| न्याय-लीलावती | वल्लभाचार्यः | वैशेषिक-दर्शनस्य सिद्धान्तानां प्रतिपादकः प्रकरण-ग्रन्थः |

**४८. वैशेषिक-सूत्रेषु किम् अस्ति?**

वैशेषिक-सूत्रेषु १० अध्यायाः प्रत्यध्यायम् आह्निक-द्वयम्, ३७० सूत्राणि च सन्ति।

## २.४ न्याय-वैशेषिक-दर्शनयोः प्रमुखाः सिद्धान्ताः

**४९. न्याय-दर्शनानुसारं मोक्ष-प्राप्तिः कथं भवति?**

न्याय-दर्शनानुसारं प्रमाण-प्रमेय-संशय-प्रयोजन-इत्यादीनां षोडश-पदार्थानां तत्त्वज्ञानात् मोक्षः प्राप्यते।

**५०. वैशेषिक-दर्शनानुसारं मोक्ष-प्राप्तिः कथं भवति?**

वैशेषिक-दर्शनानुसारं द्रव्य-गुण-कर्मादिपदार्थानां तत्त्वज्ञानात् मोक्षप्राप्तिः भवति।

## २.४.१ पदार्थ-विचारः

**५१. पदार्थः इति शब्दस्य कः अर्थः?**

पदस्य अर्थः पदार्थः। यस्य कस्यापि पुरुषस्य ईश्वरस्य वा यः ज्ञान-विषयः भवितुम् अर्हति सः पदार्थः इति उच्यते।

**५२. न्याय-दर्शने पदार्थाः कति सन्ति?**

न्याय-दर्शने पदार्थाः षोडश सन्ति।

**५३. षोडश पदार्थाः के सन्ति?**

(१) प्रमाणम् (२) प्रमेयम् (३) संशयः (४) प्रयोजनम् (५) दृष्टान्तः (६) सिद्धान्तः (७) अवयवः (८) तर्कः (९) निर्णयः (१०) वादः (११) जल्पः (१२) वितण्डा (१३) हेत्वाभासः (१४) छलम् (१५) जातिः (१६) निग्रहस्थानं च इति षोडश पदार्थाः सन्ति। एतेषां पदार्थानां तत्त्वज्ञानेन निःश्रेयसप्राप्तिः भवति।

**५४. वैशेषिक-दर्शने कति पदार्थाः स्वीक्रियन्ते?**

वैशेषिक-दर्शने सप्त पदार्थाः स्वीक्रियन्ते।

**५५. ते सप्त पदार्थाः के सन्ति?**

(१) द्रव्यम्, (२) गुणः, (३) कर्म, (४) सामान्यम्, (५) विशेषः, (६) समवायः, (७) अभावः इति सप्त पदार्थाः सन्ति।

**५६. न्याय-वैशेषिक-दर्शनयोः पदार्थ-भेदः अस्ति तर्हि कथम् अनयोः समान-तन्त्रम् अस्ति?**

प्राचीनन्याये ये षोडश पदार्थाः स्वीकृताः सन्ति तेषां पदार्थानां वैशेषिकैः स्वीकृतेषु सप्त-पदार्थेषु अन्तर्भावः कर्तुं शक्यते इति नवीन-नैयायिकानां मतम्। एवं अनयोः समानतन्त्रत्वं सिध्यति।

**५७. किं नाम द्रव्यम्?**

'समवायेन गुणवत्त्वं क्रियावत्त्वं वा द्रव्यत्वम्' इति द्रव्यस्य सामान्यं लक्षणम्। अर्थात् यः

समवाय-सम्बन्धेन गुणस्य कर्मणो वा आश्रयः, यच्च कस्यापि कार्यस्य समवायि-कारणं भवितुम् अर्हति तत् द्रव्यम् इति कथ्यते।

**५८. द्रव्याणि कति सन्ति?**

द्रव्याणि नव सन्ति - (१) पृथिवी, (२) जलम्, (३) तेजः, (४) वायुः, (५) आकाशम्, (६) कालः, (७) दिक्, (८) आत्मा, (९) मनः इति।

**५९. गुणः इति पदस्य कः अर्थः?**

'द्रव्य-कर्म-भिन्नत्वे सति सामान्यवत्त्वम्' अथवा 'गुणत्व-जातिमत्त्वम्' इति गुणस्य लक्षणम्।

**६०. गुणाः कति सन्ति?**

गुणाः चतुर्विंशतिः सन्ति - रूपम्, रसः, गन्धः, स्पर्शः, संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, परत्वम्, अपरत्वम्, गुरुत्वम्, द्रवत्वम्, स्नेहः, शब्दः, बुद्धिः, सुखं, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, धर्मः, अधर्मः, संस्कारः च।

**६१. कर्मणः लक्षणं किम् अस्ति?**

'संयोग-भिन्नत्वे सति संयोग-असमवायि-कारणं कर्म'। अर्थात् यत् संयोगात् तु भिन्नं भवति परं संयोगस्य असमवायिकारणं भवति तत् कर्म।

**६२. कर्माणि कतिविधानि?**

कर्माणि पञ्चविधानि - उत्क्षेपणम् (उपरि क्षेपणम्), अपक्षेपणम् (नीचैः क्षेपणम्), प्रसारणम् (विस्तारः), आकुञ्चनम् (सङ्कोचनम्), गमनम् (चलनम्) च।

**६३. किं नाम सामान्यम्?**

नित्यत्वे सति अनेक-समवेतत्वं सामान्यम्। समान-अवयव-संस्थासु अनेकासु व्यक्तिषु यत् समानाकार-प्रत्ययः भवति, तस्य यत् कारणं तदेव सामान्यम्।

**उदाहरणम् –** यथा सर्वासु गो-व्यक्तिषु "अयं गौः, अयं गौः" इत्याकारकः समानः प्रत्ययः (ज्ञानम्) भवति, तस्य हेतुभूतः यः धर्मः गोत्वम्, तदेव सामान्यं, जातिः वा इति उच्यते।

**६४. सामान्यं कतिविधम्?**

सामान्यं द्विविधम् – पर-सामान्यम्, अपर-सामान्यं च।

**६५. विशेषस्य लक्षणं किम्?**

नित्य-द्रव्य-वृत्तय: विशेषा:। अर्थात् आकाश-काल-दिग्-इत्यादि-नित्यद्रव्येषु येषां वृत्तिः भवति, ते विशेषा: इति कथ्यन्ते। "स्वत: व्यावर्तकत्वं विशेषत्वम्" इत्यपि विशेषस्य लक्षणं भवति।

**६६. क: नाम समवाय:?**

नित्य-सम्बन्ध: समवाय:। यथा अवयव-अवयविनो:, जाति-व्यक्त्यो:, गुण-गुणिनो:, क्रिया-क्रियावतो:, नित्य-द्रव्य-विशेषयो: च य: सम्बन्ध:, स समवाय: इति कथ्यते।

**६७. अभाव: इत्युक्ते किम्?**

"नञ्-शब्द-जन्य-प्रतीति-विषय: अभाव:"। यथा भूतलं दृष्ट्वा "अत्र घट: नास्ति" इति यत् ज्ञानं भवति, तत्र "घट: नास्ति = घटस्य स्थितिः भाव: वा नास्ति" इति ज्ञानस्य य: विषय: स: अभाव: इति उच्यते।

**६८. अभाव: कतिविध:?**

अभाव: चतुर्विध: – प्राग्-अभाव:, प्रध्वंस-अभाव:, अन्यन्त-अभाव:, अन्योन्य-अभाव: च।

**६९. न्याय-दर्शनस्य प्रवृत्तिः कतिविधा?**

न्याय-दर्शनस्य प्रवृत्तिः त्रिविधा – (१) उद्देश:, (२) लक्षणम्, (३) परीक्षा च।

**७०. को नाम उद्देश:?**

नाम-मात्रेण वस्तु-सङ्कीर्तनम् उद्देश:। अर्थात् कस्यापि वस्तुन: नाम-ग्रहणाय यत् अभिधानं क्रियते तद् उद्देश:। यथा मृत्तिका-निर्मितं कम्बुग्रीवादिमन्तं घटं दृष्ट्वा अयं "घट:" इति यत् अभिधानं क्रियते स: उद्देश:।

**७१. लक्षणस्य लक्षणं किम्?**

'असाधारण-धर्मवचनं लक्षणम्'। कस्यापि वस्तुन: य: असाधारण: धर्म: भवति स: तस्य लक्षणं भवति। यथा गो: ग्रीवाया: अधोभागे लम्बमान: मांसपिण्ड: "सास्ना" इति कथ्यते। सा च सास्ना गवि एव भवति, गो: इतर-पदार्थेषु न भवति। अत: "सास्नादिमत्त्वं गोत्वम्" इति गो: असाधारणं लक्षणं वर्तते।

**७२. का नाम परीक्षा?**

लक्षितस्य लक्षणं सम्भवति न वा इतिविचारः परीक्षा। अर्थात् यस्य वस्तुनः लक्षणं कृतं तस्य तत् लक्षणं सम्भवति अथवा न सम्भवति, तस्मिन् लक्षणे कश्चन दोषः अस्ति वा नास्ति वा इति यः विचारः क्रियते, सः विचारः एव परीक्षा इति कथ्यते।

## २.४.२ प्रमाण-विचारः

**७३. द्रव्यादि-पदार्थानां ज्ञानं केन भवति?**

द्रव्यादि-पदार्थानां ज्ञानं प्रमाणेन भवति। वस्तुतः न्याय-शास्त्रं पदार्थ-ज्ञानस्य उपस्थापकम् अस्ति। पदार्थ-ज्ञानात्पूर्वं ज्ञानस्य प्रक्रिया बोद्धव्या भवतीति विचार्य न्याय-शास्त्रे प्रथमं ज्ञानस्य स्वरूपं प्रतिपादितम्।"प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्व-ज्ञानात् मोक्षः" भवति इति न्याय-सूत्रकारस्य महर्षि-गौतमस्य प्रतिपादनमस्ति।

**७४. न्याय-मते ज्ञानं नाम किम्? तत् च कतिविधम्?**

न्याय-मते ज्ञानं प्रत्येकं वस्तुनः प्रकाशकम् भवति। तेनैव पदार्थस्य यथार्थ-बोधः (यथार्थ-ज्ञानं) भवति। तत् च ज्ञानं द्विविधं भवति- १) स्मृति-रूपम्, २) अनुभव-रूपं च। ज्ञात-विषयकं ज्ञानं स्मृतिः भवति किन्तु अनुभवः तु पदार्थ-साक्षात्कारेण संभवति। अनुभवः अपि द्विधा वर्तते- अयथार्थानुभवः यथार्थानुभवः च। अयथार्थानुभवः तुतर्क-संशय-विपर्यय-रूपः भवति। यथार्थानुभवः च यथार्थं ज्ञानमेव प्रामाणिकं मन्यते।

**७५. किं नाम प्रमाणम्?**

प्रमा-करणं प्रमाणम्।

**७६. का नाम प्रमा?**

प्रमा अर्थात् यथार्थ-अनुभवः। यथा रज्जुं दृष्ट्वा यदि "इयं रज्जुः" इति ज्ञानं भवति तर्हि सः अनुभवः यथार्थः, किन्तु रज्जुं दृष्ट्वा "अयं सर्पः" इति यदि ज्ञानं भवति तर्हि सः अनुभवः

अयथार्थः। यथार्थ-अनुभवः एव प्रमा इति कथ्यते। सः यथार्थ-अनुभवः येन साधनेन भवति तत् प्रमाणम् इति कथ्यते।

**७७. न्यायदर्शने प्रमाणानि कति सन्ति?**

न्यायदर्शने चत्वारि प्रमाणाणि सन्ति - (१) प्रत्यक्षम्, (२) अनुमानम्, (३) उपमानम्, (४) शब्दः च।

**७८. प्रत्यक्ष-प्रमाणं किम् अस्ति?**

इन्द्रियार्थ-सन्निकर्ष-जन्यं ज्ञानं प्रत्यक्षम्। अथवा ज्ञान-अकरणकं ज्ञानं प्रत्यक्षम्। चक्षुः-श्रोत्रादिकम् इन्द्रियम्, तस्य यदा घटादि-विषयैः सह सन्निकर्षः=सम्बन्धः भवति, तेन सम्बन्धेन यत् ज्ञानं उत्पद्यते, तत् प्रत्यक्षम्। प्रत्यक्षस्य यत् करणं भवति तत् इन्द्रियं प्रत्यक्ष-प्रमाणम्।

**७९. किं नाम अनुमान प्रमाणम्?**

अनुमिति-करणम् अनुमानम्। अर्थात् प्रत्यक्ष-प्रमाणेन कस्यचित् पदार्थस्य ज्ञानानन्तरं तत्-सम्बन्धिनः पदार्थान्तरस्य ज्ञानम् अनुमितिः इति उच्यते। यथा पर्वते धूमस्य प्रत्यक्षानन्तरं तस्मिन् एव पर्वते तद् धूम-सम्बन्धी धूम-व्यापकः वह्निः अस्ति इति यत् ज्ञानम् उपलभ्यते सा अनुमितिः।तस्याः अनुमितेः यत् करणं भवति तस्य नाम अनुमान-प्रमाणम्।

**८०. अनुमानं कतिविधम्?**

अनुमानं द्विविधम् – (१) स्वार्थानुमानम्, (२) परार्थानुमानं च।

**८१. किं नाम उपमान-प्रमाणम्?**

उपमिति-करणम् उपमानम्। उपमितेः करणम् अर्थात् उपमिति-ज्ञाने यद् असाधारणं कारणम् अस्ति तदेव उपमानम्।

**८२. उपमितिः का भवति?**

संज्ञा-संज्ञि-सम्बन्ध-ज्ञानम् उपमितिः। संज्ञा अर्थात् पदम्, संज्ञी अर्थात् पदस्य अर्थः, तयोः द्वयोः मध्ये शक्ति-रूपः सम्बन्धः। तस्य पद-पदार्थ-सम्बन्धस्य ज्ञानम् उपमितिः।

यथा कश्चन ग्राम्यः जनः गवय-पदार्थं न जानाति, परन्तु गवय-पदार्थविषये तेन श्रुतम् अस्ति यत् "गोसदृशः गवयः" इति। अत्र "गवयः" इति कस्यचन पशोः 'संज्ञा' अस्ति। इयं संज्ञा

यस्य पशोः अस्ति सः पशुः 'संज्ञी' इति उच्यते। ततः कदाचित् सः ग्राम्यः जनः वनं गच्छति। तत्र सः गोसदृशं पशुशरीरं पश्यति। तदा सः ग्राम्यः जनः पूर्व-श्रुतं वाक्यं स्मरति यत् "गोसदृशः गवयः" इति। अयं पशुः अपि गोसदृशः अस्ति। अतः अयं "गवयः" अस्ति इति तस्य यथार्थज्ञानं जायते। इत्थम् अत्र "गवयः" इति 'संज्ञा', गवयशरीर-धारी पशुः च 'संज्ञी' अस्ति। अतः अनयोः संज्ञा-संज्ञि-सम्बन्ध-ज्ञानम् उपमितिः।

**८३. शब्द-प्रमाणस्य लक्षणं किम् अस्ति?**

आप्त-वाक्यं शब्दः। आप्तः अर्थात् तत्त्व-दर्शी पुरुषः। आप्त-पुरुषस्य यत् वाक्यं भवति तदेव शब्द-प्रमाणम् इति कथ्यते। इत्थं वेद-वाक्यम् अपि प्रमाणत्वेन गृह्यते।

## २.४.३ मोक्ष-साधन-विचारः

**८४. न्याय-दर्शनानुसारम् आत्मा कः?**

न्याय-दर्शनानुसारम् "ज्ञानाधिकरणम्" आत्मा। अहं सुखी, अहं दुःखी इत्यादि ज्ञानं यस्मिन् समवाय-सम्बन्धेन भवति स आत्मा। समवायः कस्यचन नित्य-सम्बन्धस्य नाम।

**८५. आत्मा कतिविधः?**

आत्मा द्विविधः - एकः जीवात्मा अपरः परमात्मा इति।

**८६. परमात्मा कः अस्ति?**

समस्त-प्रपञ्चस्य शासकः, प्रपञ्चे भूतस्य भविष्यतः वर्तमानस्य च सर्व-पदार्थस्य उत्पत्ति-स्थिति-नाशादि-विषये यः ज्ञान-इच्छा-कृतिमान् सर्वज्ञः अस्ति सः एव परमात्मा। स एक एव।

**८७. जीवात्मा कः?**

परमात्मनः भिन्नः यः चेतनः अस्ति सः जीवात्मा। जीवात्मानः नाना सन्ति। प्रत्येकं शरीरे भिन्नः भिन्नः जीवात्मा भवति।

**८८. न्याय-मते मोक्ष-प्राप्तिः कथं भवति?**

न्याय-मतानुसारं प्रमाण-प्रमेयादि-षोडश-पदार्थानां यदा तत्त्व-ज्ञानं भवति, तेन तत्त्व-ज्ञानेन मोक्षः प्राप्यते।

## ३. सांख्य-दर्शनस्य परिचयः

**८९. सांख्यम् इति पदस्य कः अर्थः?**

'सांख्यम्'इति पदं सम्-उपसर्ग-पूर्वकं 'चक्षिङ् - ख्याञ्'इति धातोः 'अण्'प्रत्यये सति निष्पद्यते। यस्य अर्थः भवति 'सम्यक् ख्यानम्'अर्थात् 'सम्यक् ज्ञानम्'इति। एतद् एव'प्रकृति-पुरुष-विवेकः', 'विवेक-ख्यातिः', 'विवेकबुद्धिः', 'सत्त्व-पुरुषान्यता-ख्यातिः' इति अपि उच्यते।

**९०. सांख्यम् इति पदस्य विषये इतोऽपि कः अर्थः उपलभ्यते?**

'संख्यावान् पण्डितः कविः'इति पङ्क्तौ अमर-कोषकारेण 'संख्यावान्'इति पदं पण्डित-पद-पर्यायत्वेन स्वीकृतम्। अस्मिन् शास्त्रे पञ्चविंशतेः तत्त्वानां विवेक-ज्ञानेन कैवल्याख्य-मोक्ष-प्राप्तिः भवति इति प्रतिपादितम्। अतः केषाञ्चन विदुषाम् इदं कथनम् अस्ति यत् 'सांख्य'-शब्दस्य निष्पत्तिः 'संख्या'-शब्दात् भवति।'संख्यायन्ते गण्यन्ते तत्त्वानि यस्मिन् तत् सांख्यम्'इति।

**९१. सांख्य-दर्शनस्य प्रवर्तकः कः?**

अस्य दर्शनस्य प्रवर्तकः परमर्षिः महामुनिः भगवान् कपिलः अस्ति।

**९२. सांख्य-दर्शने कस्य विषयस्य विचारः क्रियते?**

सांख्य-दर्शने ऐकान्तिकात्यन्तिक-रूपेण दुःख-निवारणाय उपायाः, सत्कार्य-वादः, प्रकृति-पुरुषयोः विवेचनम्, सृष्टेः उत्पत्तिः, व्यक्त-अव्यक्त-तत्त्वानां विवेचनम्, मोक्ष-प्राप्तेः उपायाः इत्यादि-विषयाणां विवेचनं क्रियते।

## ३.१ सांख्य-दर्शनस्य प्राचीनत्वम्

**९३. सांख्य-दर्शनं कियत् प्राचीनम् अस्ति?**

सांख्य-दर्शनम् अत्यन्तं प्राचीनम् अस्ति। श्रीमद्-भागवते इदं दर्शनम् 'तत्त्व-संख्यानम्' इति नाम्ना अपि प्रसिद्धम् अस्ति। "कपिलस्तत्त्व-संख्याता भगवानात्ममायया"इति श्रीमद्-भागवते उक्तम् । श्रीमद्-भगवद्-गीतायां 'सम्यग् ज्ञानम्'इत्यर्थे पदमिदं प्रयुक्तम् - "एषा तेऽभिहिता सांख्ये बुद्धिर्योगेत्विमां शृणु" इति। मत्स्य-पुराणे सांख्य-शब्द-निर्वचनम् - "सांख्यं संख्यात्मकत्वाच्च कपिलादिभिरुच्यते" इति श्रूयते।वेदोपनिषत्सु, पुराणादिषु च सर्वत्र क्वचित् साक्षात् क्वचित् च

परम्परया सांख्य-शास्त्रीय-तत्त्वानाम् उल्लेखः प्राप्यते। तस्मात् इदं सांख्य-दर्शनम् अति-प्राचीनम् इति वक्तुं शक्यते।

## ३.२ सांख्य-दर्शनस्य प्रमुखाः ग्रन्थाः

**९४. सांख्य-दर्शनस्य आधार-ग्रन्थः कः?**

यथा न्याय-वैशेषिकादि-दर्शनानां मूलग्रन्थाः सूत्र-बद्धाः सन्ति तथैव सांख्य-दर्शनस्य मूलग्रन्थः सूत्रबद्धः अस्ति। तस्य ग्रन्थस्य नाम अस्ति - 'सांख्य-सूत्रम्'।

**९५. सांख्य-सूत्रस्य रचयिता कः?**

साख्य-सूत्रस्य रचयिता महर्षिः कपिलः।

**९६. सांख्य-सूत्रे कति सूत्राणि सन्ति?**

सांख्य-सूत्रे षट्सु अध्यायेषु विभक्तानि सप्तविंशत्युत्तरपञ्चशतम् (५२७) सूत्राणि सन्ति।

**९७. सांख्य-सूत्रेषु केषां विषयाणां वर्णनम् अस्ति?**

सांख्य-सूत्राणि षट्सु अध्यायेषु विभक्तानि सन्ति। तत्र प्रथमाध्यायात् तृतीयाध्याय-पर्यन्तं सांख्य-शास्त्रस्य प्रमुखाः सिद्धान्ताः वर्णिताः सन्ति। चतुर्थाध्याये दृष्टान्तानां निरूपणं प्राप्यते। पञ्चमाध्याये विभिन्न-दर्शनानां विचारं कृत्वा तेषां युक्ति-युक्तं खण्डनं च विधाय स्वसिद्धान्ताः प्रतिपादिताः सन्ति। अन्तिमाध्याये प्रकृति-पुरुष-मोक्षादि-विचाराः निरूपिताः सन्ति।

**९८. सांख्य-दर्शनस्य अन्ये प्रमुखाः ग्रन्थाः के सन्ति?**

सांख्य-दर्शनस्य परम्परायां लिखिताः प्रमुखाः ग्रन्थाः, तेषां लेखकाः, तेषां वैशिष्ट्यानि च अधः लिख्यन्ते -

| ग्रन्थः | लेखकः | वैशिष्ट्यम् |
|---|---|---|
| सांख्यप्रवचन-भाष्यम् | विज्ञानभिक्षुः | सांख्य-सूत्राणां प्रसिद्धं भाष्यम् |
| सांख्य-कारिका | ईश्वरकृष्णः | एषः ग्रन्थः ७२ कारिकाभिः निबद्धः। अति-संक्षिप्तः अपि समग्र-सांख्य-दर्शनस्य परिचयं कारयति, अतः अत्यन्तं प्रसिद्धः ग्रन्थः। |

| | | |
|---|---|---|
| सांख्य-कारिका-भाष्यम् | गौडपाद: | सांख्य-कारिकाया: प्राचीनतमा टीका |
| माठर-वृत्ति: | माठराचार्य: | सांख्य-कारिकाया: टीका-रूपेण प्रसिद्ध: ग्रन्थ: |
| जय-मङ्गला | शङ्कराचार्य: | सांख्य-कारिकाया: टीका |
| सांख्य-तत्त्व-कौमुदी | वाचस्पति-मिश्र: | सांख्य-कारिकाया: इयं टीका अत्यन्तं प्रसिद्धा अस्ति, अत्र सांख्य-सिद्धान्तानां सरलं सूक्ष्मं च विवेचनम् अस्ति। |

**९९. सांख्य-दर्शनस्य, योग-दर्शनस्य च समान-तन्त्रत्वं किमर्थं स्वीक्रियते?**

सांख्य-योग-दर्शनयो: बहुषु विषयेषु समानता अस्ति। यथा –

१. सांख्य-दर्शने पञ्चविंशति: तत्त्वानि स्वीक्रियन्ते, योग-दर्शने अपि इमानि पञ्चविंशति: तत्त्वानि स्वीक्रियन्ते, परन्तु तत्र एकम् अधिकं तत्त्वम् 'ईश्वर:' इत्यपि स्वीक्रियते।

२. उभयो: दर्शनयो: मध्ये प्रत्यक्षम् अनुमानम् आगमश्च इति त्रीणि प्रमाणानि स्वीक्रियन्ते।

३. प्रकृति-पुरुषयो: विवेक-ज्ञानेन दु:खस्य आत्यन्तिक: नाश: भवति इति उभयत्र स्वीक्रियते।

एवंरूपेण सांख्य-दर्शनस्य योग-दर्शनस्य च मध्ये बहुषु विषयेषु साम्य-कारणात् अनयो: समान-तन्त्रत्वम् अस्ति।

## ३.३ सांख्य-दर्शने वर्णिता: प्रमुखा: विषया:

**१००. सांख्य-दर्शने प्रमुख-रूपेण केषां विषयाणां चर्चा विद्यते?**


सांख्य-दर्शने प्रमुख-रूपेण दु:ख-त्रयम्, व्यक्त-तत्त्वानि, अव्यक्त-तत्त्वानि, पुरुष-तत्त्वम्, प्रमाणानि, सत्कार्य-वाद:, गुण-त्रयम्, पुरुषस्य बहुत्वम्, प्रकृति-पुरुषयो: संयोगात् सृष्टे: उत्पत्ति:, प्रत्यय-सर्ग:, सूक्ष्म-शरीरम्, कैवल्यम् इत्यादि-विषयाणां चर्चा विद्यते।

**१०१. दु:ख-त्रयं किम् अस्ति?**

दु:ख-त्रयम् अर्थात् दु:खं त्रिविधम् अस्ति।

**१०२. त्रिविधं दु:खं किं किम् अस्ति?**

दु:खं त्रिविधं भवति - १. आध्यात्मिकम्, २. आधिभौतिकम्, ३. आधिदैविकं च।




**१०३. आध्यात्मिकं दुःखं किम् अस्ति?**

आध्यात्मिकं दुःखं शारीरं मानसं चेति द्विविधम्। शरीरे वात-पित्त-श्लेष्मादिप्रकोपाद् व्यतिक्रमाद् वा जायमानं ज्वराङ्गपीडादिकं दुःखं शारीरिकम्। काम-क्रोध-लोभवशाद् मोह-ईर्ष्या-भय-विषादादिवशाद् वा जायमानम् अतृप्त्यात्मकं दुःखं मानसं भवति।

**१०४. आधिभौतिकं दुःखं किम्?**

मनुष्य-पशु-पक्षि-सर्प-वृक्षादि-निमित्तात् जायमानं दुःखं आधिभौतिकम्।

**१०५. आधिदैविकं दुःखं किम्?**

देव-दानव-यक्ष-राक्षस-भूत-प्रेत-पिशाचादिजन्यं दुःखम् आधिदैविकम्।

**१०६. दुःख-त्रयस्य नाशः लौकिकेन उपायेन किमर्थं न भवति?**

लौकिकेन उपायेन दुःखस्य कञ्चित् कालं यावत् नाशः कर्तुं शक्यते, लौकिकेन उपायेन नष्टम् अपि दुःखं पुनः जायते। अतः तस्य शाश्वतिकः नाशः सांख्य-शास्त्रस्य तत्त्व-ज्ञानेन एव भवितुम् अर्हति।

## ३.३.१ तत्त्व-विचारः

**१०७. सांख्य-शास्त्रे कति तत्त्वानि स्वीकृतानि सन्ति?**

सांख्य-शास्त्रे पञ्चविंशति-तत्त्वानि स्वीकृतानि सन्ति।

**१०८. सांख्य-शास्त्र-सम्मतानि पञ्चविंशति-तत्त्वानि कानि सन्ति?**

सांख्य-शास्त्र-सम्मतानां पञ्चविंशतेः तत्त्वानां चतुर्धा विभागः कर्तुं शक्यते।

(१) प्रथमः भागः - केवल-प्रकृति-रूपः। (२) द्वितीयः भागः - केवल-विकृति-रूपः। (३)

तृतीयः भागः - प्रकृति-विकृत्यात्मकः उभयात्मकः। (४) चतुर्थः भागः - न प्रकृतिरूपः नापि विकृतिरूपः।

**१०९. केवल-प्रकृतिरूपः भागः कः?**

प्रक्रियते उत्पद्यते कार्यादिकम् अनया इति 'प्रकृतिः' अथवा 'प्रधानम्'। सा सत्त्व-रजस्- तमसां साम्यावस्था-रूपेण मूल-प्रकृतिः अस्ति। अस्याः मूल-प्रकृतेः किमपि कारणं नास्ति।

**११०. केवल-विकृतिरूपः भागः कः?**

षोडश-तत्त्वानि केवल-विकृति-रूप-भागे आगच्छन्ति। कोष्ठकस्य साहाय्येन तानि जानीमः –

| | | | | | | |
|---|---|---|---|---|---|---|
| महाभूतानि | ५ → | पृथ्वी | जलम् | तेजः | वायुः | आकाशः |
| ज्ञानेन्द्रियाणि | ५ → | घ्राणम् | रसना | चक्षुः | त्वक् | श्रोत्रम् |
| कर्मेन्द्रियाणि | ५ → | वाक् | हस्तौ | पादौ | पायुः | उपस्थः |
| मनः | १ → | मनः | **(आहत्य १६ तत्त्वानि केवलं विकृतिरूपाणि)** | | | |

एतेभ्यः अन्यतत्त्वानि न जायन्ते अतः एतानि केवलं विकृतयः।

**१११. प्रकृति-विकृत्यात्मकः उभयात्मकः भागः कः अस्ति?**

महत्-तत्त्वं, अहङ्कार-तत्त्वं, शब्द-स्पर्श-रूप-रस-गन्धाः पञ्च-तन्मात्राणि चेति सप्त प्रकृतिविकृतयः सन्ति। तासां विषये कोष्ठकात् जानीमः -

| **कुतः जायते?** | **प्रकृति-विकृतयः** | **ततः किं जायते?** |
|---|---|---|
| मूल-प्रकृतितः | महत्-तत्त्वम् | अहङ्कारः |
| महत्तत्त्वात् | अहङ्कारः | तन्मात्राणि (५)<br>ज्ञानेन्द्रियाणि (५)<br>कर्मेन्द्रियाणि (५)<br>मनः (१) |

| | | |
|---|---|---|
| अहङ्कारात् → | शब्द-तन्मात्रम् → | आकाशम् |
| → | स्पर्श-तन्मात्रम् → | वायुः |
| → | रूप-तन्मात्रम् → | अग्निः |
| → | रस-तन्मात्रम् → | जलम् |
| → | गन्ध-तन्मात्रम् → | पृथ्वी |


इत्थं मूलप्रकृतितः महत्तत्त्वम् आविर्भवति।ततः अहङ्कारतत्त्वम्, ततः पञ्चतन्मात्राणि आविर्भवन्ति। एतानि कारण-कार्य-रूपात्मकत्वात् 'प्रकृतिविकृतयः' इति उच्यन्ते। मनसः, दशेन्द्रियाणां च उत्पत्तिः अहङ्कारात् जायते।पञ्चभ्यः तन्मात्रेभ्यः पञ्च महाभूतानि जायन्ते।

### ११२. न प्रकृति-रूपः नापि विकृति-रूपः भागः कः?

सांख्य-मते 'पुरुषः' न कस्माच्चित् अपि जायते, नापि किमपि तत्त्वम् उत्पादयति अतः पुरुष-तत्त्वम् 'अनुभयरूपम्' अस्ति। सांख्य-सम्मतानि पञ्चविंशतिः तत्त्वानि अधस्तन-चित्रेण स्पष्टीक्रियन्ते –

| **तत्त्वस्य वैशिष्ट्यम्** | **तत्त्वस्य नाम** | **तत्त्वस्य अपरं नाम** |
|---|---|---|
| अनुभयरूपः → | १ पुरुषः | १ ज्ञः |
| प्रकृतिः → | १ मूल-प्रकृतिः | १ अव्यक्तम् |
| प्रकृति-विकृतयः → | १ महान्, १ अहङ्कारः, ५ तन्मात्राः | २३ व्यक्तानि |
| विकृतयः → | १ मनः, ५ ज्ञानेन्द्रियाणि, ५ कर्मेन्द्रियाणि, ५ महाभूतानि | |
| | = २५ तत्त्वानि | **= २५ तत्त्वानि** |

सांख्य-सम्मत-तत्त्वानां सम्बन्धम् एकेन रेखाचित्रेण पश्यामः –



## ३.३.२ प्रमाण-विचारः

**११३. सांख्य-मतानुसारं प्रकृति-पुरुषादि-तत्त्वानां ज्ञानं कथं भवति?**

सांख्य-मतानुसारं प्रकृति-पुरुषादि-तत्त्वानां ज्ञानं प्रमाणात् भवति।

**११४. सांख्य-मतानुसारं प्रमाणानि कति सन्ति?**

सांख्य-मतानुसारं त्रीणि प्रमाणानि सन्ति - १. प्रत्यक्षम्, २. अनुमानम्, ३. आगमः/आप्त-प्रमाणम् च।

**११५. किं नाम प्रत्यक्ष-प्रमाणम्?**

शब्द-स्पर्श-रूप-रस-गन्ध-ग्राहकैः इन्द्रियैः साक्षात्कारानन्तरं जायमानं निश्चयात्मकं ज्ञानं प्रत्यक्ष-ज्ञानम् इति उच्यते। तदेव 'दृष्टं','प्रत्यक्ष'-प्रमाणं वा इति कथ्यते।

**११६. किं नाम अनुमानम्?**

लिङ्ग-ज्ञान-पूर्वकं लिङ्गिनः ज्ञानम् अनुमानम्।

**११७. लिङ्गम्, लिङ्गी च किं अस्ति?**

लीनम् अर्थं गमयति इति लिङ्गम्= व्याप्यम् = हेतुः इत्यर्थः। लिङ्गम् अस्य अस्ति इति लिङ्गी =व्यापकम् = साध्यम् इति। यथा पर्वते धूमं दृष्ट्वा अग्नेः अनुमानं क्रियते। तत्र धूमः लिङ्गम् (व्याप्यः) अग्निः च लिङ्गी (व्यापकः)। अतः लिङ्ग-लिङ्गि-पूर्वकं = व्याप्य-ज्ञान-पूर्वकं यस्य व्यापकस्य ज्ञानं भवति तस्य ज्ञानस्य कारणम् अनुमानम्।

**११८. सांख्यमते अनुमानं कतिविधम्?**

सांख्यमते अनुमानं त्रिविधम् - पूर्ववत्, शेषवत्, सामान्यतोदृष्टं चेति।

**११९. किं नाम आप्त-प्रमाणम्?**


आप्त-श्रुतिः आप्त-प्रमाणं भवति।

**१२०. आप्त-श्रुतिः का?**

आप्ता अर्थात् प्राप्ता=युक्ता इत्यर्थः। आप्ता च असौ श्रुतिः चेति आप्त-श्रुतिः। श्रुतिः नाम वाक्य-जनितं वाक्यार्थ-ज्ञानम्। अतः आप्त-वचनं शब्द-प्रमाणम् आगम-प्रमाणं वा भवति। आप्तः अर्थात्

यथानुभूतार्थ-वक्ता।

सांख्य-शास्त्रोक्त-प्रमाणानां रेखा-चित्रेण इत्थं वर्णनं कर्तुं शक्यते -




## ३.३.३ सांख्य-दर्शनस्य प्रमुखाः सिद्धान्ताः

**१२१. सांख्य-दर्शने सत्-कार्यवादः कः?**

'कारणात् कार्यस्य उत्पत्तेः प्राग् अपि कार्यं स्व-कारणे सत्/वर्तमानं भवति' इति एतत् सांख्य-दर्शने युक्तिभिः साध्यते। अयम् एव 'सत्-कार्यवादः' इति उच्यते।

**१२२. कार्यम् उत्पत्तेः पूर्वम् अपि स्व-कारणे अस्ति इति साधयितुं सांख्य-दर्शने काः युक्तयः प्रदर्श्यन्ते?**

कार्यम् उत्पत्तेः पूर्वम् अपि स्व-कारणे अस्ति इति साधयितुं सांख्य-दर्शने पञ्च युक्तयः प्रदर्शयन्ते। यथा –

(१) **असदकरणात्** - यदि कार्यं कारण-व्यापरात् प्राक् कस्याम् अपि अवस्थायां कुत्र अपि विद्यमानं न स्यात् तर्हि तदुत्पत्तिः तथैव कर्तुं न शक्यते। यथा सहस्रं शिल्पिनः मिलित्वा अपि गगनारविन्दम् उत शश-शृङ्गं कर्तुं समर्थाः न भवन्ति। अतः अत्यन्तासतः नृ-शृङ्गस्य उत्पत्तिः न भवति।

(२) **उपादान-ग्रहणात्** - उपादानं नाम समवायि-कारणम्। प्रत्येकं कार्यं स्वोपादानेन अर्थात् समवायि-कारणेन सह सम्बद्धम् एव भवति। यथा पटं निर्मातुम् इच्छन् तन्तुवायः तन्तुम्


एव गृह्णाति न अन्यत्। घटं निर्मास्यन् कुलालः मृत्तिकाम् एव गृह्णाति इति नियमः।

अत्र यदि कश्चित् एवं तर्कं कुर्यात् यत् कारणेन सह सम्बन्धं विना एव कार्योत्पत्तिः स्यात् तर्हि तत्र कः दोषः इति चेत् श्रूयताम् तृतीया युक्तिः –

(३) **सर्व-सम्भवाभावात्** - यदि सम्बन्धं विना कार्योत्पत्तिः स्यात् तर्हि कस्मात् अपि कारणात् कस्य अपि कार्यस्य उत्पत्तिः जायेत। अर्थात् सर्वस्मात् सर्वेषाम् उत्पत्तिः भवेत्।किन्तु नैवं भवति।

(४) **शक्तस्य शक्य-करणात्** - येन कारणेन यस्य कार्योत्पत्तिः शक्या तस्मात् एव कारणात् तस्य कार्यस्य उत्पत्तिः कर्तुं शक्यते, न अन्यस्मात्। अतः शक्ते कारणे विद्यमाने सति शक्यस्य कार्यस्य उत्पत्तिः भवति।शक्ताऽभावे शक्याऽभावः स्वयम् एव सिद्ध्यति।

( ५) **कारण-भावात्** - कार्यं कारणात्मकम् एव भवति अर्थात् कार्यं कारणात् न भिद्यते। यदि कारणं सत् अस्ति तर्हि कार्यम् अपि तदभिन्नं सद्रूपम् एव अस्ति। कारणस्य यादृशः स्वभावः भवति तादृशः स्वभावः कार्यस्य अपि भवति एव। यथा तिलेषु यत् चिक्कणं तत् तैले अपि भवति।



कारणात् कार्यस्य उत्पत्तेः प्राग् अपि कार्यं स्वकारणे सत् भवति, एतत् सांख्यदर्शने युक्तिभिः साध्यते। अयमेव सत्कार्यवादः उच्यते।

**१२३. सांख्यदर्शने त्रयः गुणाः के स्वीकृताः?**

सत्त्वम्, रजः, तमः चेति सांख्य-दर्शने त्रयः गुणाः स्वीकृताः सन्ति।

**१२४. कः नाम सत्त्व-गुणः?**


सत्त्व-गुणः अतीव लघुः (= अल्प-भारः), प्रकाशकः चभवति। प्रीत्यात्मकः सत्त्व-गुणः। प्रीतिः अर्थात् सुखम्।

**१२५. कः नाम रजोगुणः?**

रजोगुणः उपष्टम्भकः अर्थात् संश्लेष-जनकः, चञ्चलः चभवति। अप्रीत्यात्मकः रजोगुणः।अप्रीतिः अर्थात् दुःखम्।

**१२६. कः नाम तमोगुणः?**

तमोगुणः गुरुः अर्थात् भारयुक्तः, अवरोधकः चभवति।विषादः अर्थात् मोहः, विषादात्मकः तमोगुणः इति एतेषां गुणानां स्वरूपं वर्तते।




**१२७. सांख्य-दर्शने पुरुष-तत्त्वं किम् अस्ति?**

सांख्य-मतानुसारं त्रयोविंशतेः व्यक्त-तत्त्वेभ्यः, मूल-प्रकृतेः च भिन्नं किञ्चित् चेतनं तत्त्वम् अस्ति,

तस्य तत्त्वस्य नाम अस्ति पुरुष-तत्त्वम् अर्थात् आत्मतत्त्वम्।

**१२८. सांख्य-दर्शने पुरुषः एकः अस्ति उत अनेकः?**

सांख्य-दर्शने पुरुषः अनेकः अस्ति।

**१२९. सांख्य-दर्शने पुरुष-बहुत्वं कथं सिध्यति?**

सांख्य-कारिकायां पुरुषस्य बहुत्व-साधनाय एका कारिका पठिता। यथा –

जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव॥ (सांख्यकारिका, १८)

अस्य अर्थः -

(१) यदि पुरुषः एक एव स्यात् तर्हि एकस्य जन्मनि सति सर्वे जायेरन् तथा एकस्य मरणे सति सर्वे म्रियेरन्। एके अन्धे सति सर्वे अन्धाः भवेयुः। परं न तथा लोके भवति। अतः युक्ति-युक्तम् इदमेव भाति यत् 'जनन-मरण-करणानां प्रतिनियमाद्'प्रत्येकं शरीरे पुरुषाः भिन्नाः एव अवतिष्ठन्ते।

(२) सर्वेषां प्राणिनां कार्येषु प्रवृत्तिः अर्थात् चेष्टा अयुगपत् भवति। यद्यपि चेष्टा अन्तःकरण-निष्ठा भवति तथापि उपचारतः पुरुष-सन्निधानात् सा पुरुषस्य स्वीक्रियते। यदि एकः एव पुरुषः स्यात् तर्हि एकस्य उत्थाने सर्वे उत्थिताः स्युः, एकस्य गमने सर्वेः गच्छेयुः इति। परं लोके दृश्यते यत् प्रत्येकं शरीरे एकस्मिन् एव समये भिन्नाः भिन्नाः क्रियाः भवन्ति। एतत् सर्वं पुरुषस्य बहुत्वस्वीकारे एव सम्भवति।

(३) लोके बहु-प्रकारकाः जनाः दृश्यन्ते। यथा केचन सत्त्व-प्रधानाः, केचन रजःप्रधाना, केचन च तमःप्रधानाः च भवन्ति। अतः यदि एतेषां सर्वेषाम् अधिष्ठाता एकः एव पुरुषः स्यात् तर्हि तत्र गुण-त्रयस्य वैषम्यं न स्यात्। इत्थम् एताभिः युक्तिभिः पुरुष-बहुत्वं सिध्यति।

## ३.३.४ सांख्य-दर्शनानुसारं सृष्टि-विचारः

**१३०. सांख्य-दर्शनानुसारं सृष्टेः उत्पत्तिः कथं भवति?**

सांख्य-दर्शनानुसारंप्रकृति-पुरुषयोः संयोगात् सृष्टेः उत्पत्तिः भवति।

### १३१. प्रकृति-पुरुषयोः संयोगः किमर्थं भवति?

प्रकृति-पुरुषयोः सम्बन्धस्य प्रयोजनं दर्शनं कैवल्यं चास्ति। प्रकृतिः पुरुषस्य दर्शनम् इच्छति तथा पुरुषः कैवल्यम् अभीप्सति। सुख-दुःख-मोहात्मिका प्रकृतिः अचेतनत्वात् सुख-दुःखानुभूतिं न करोति। अतः सा सुख-दुःखानुभवाय चेतनं पुरुषम् अपेक्षते। एतदेव पुरुषेण तस्याः दर्शनम् इत्युच्यते। पुरुषः अपि एतं सम्बन्धम् अपेक्षते। प्रधानेन संयुक्तः पुरुषः प्रधान-गत-दुःख-त्रयम् आत्मनः अवगच्छति। दुःख-त्रयस्य आत्यन्तिक-निवृत्तिः एव कैवल्यम् उच्यते।


इदं कैवल्यं प्रकृति-पुरुषयोः सत्त्व-पुरुषान्यता-प्रत्ययेन=विवेक-ज्ञानेन एव भवितुम् अर्हति। अतः पुरुषः कैवल्यार्थं प्रकृतिम् अपेक्षते। वस्तुतः पुरुषे दर्शन-शक्तिः विद्यते परं क्रिया-शक्तिः नास्ति। प्रकृतौ च क्रिया-शक्तिः वर्तते परं दर्शन-शक्तिः नास्ति। अतः पङ्ग्वन्धवत् उभयोः संयोगः भवति।

यथा कश्चन पङ्गुः गमने असमर्थः, अन्धः च द्रष्टुम् असमर्थः। तथापि अन्धः पङ्गोः स्कन्धयोः उपविशति। शरीरे आरूढेन पङ्गुना दर्शितेन मार्गेण अन्धः याति। अतः पङ्गुः अन्धः च परस्परं सम्मिल्य स्वकार्यं कर्तुं शक्नुतः। एवं प्रकृति-पुरुषयोः अपि संयोगः भवति। तस्मात् संयोगात् एव इदं निखिलं जगत् जायते।

कारणात् कार्यस्य उत्पत्तेः प्राग् अपि कार्यं स्वकारणे सत् भवति, एतत् सांख्यदर्शने युक्तभिः साध्यते। अयमेव 'सत्कार्यवादः' इति उच्यते।


### १३२. सांख्य-दर्शने प्रकृति-पुरुषयोः संयोगात् सृष्टिः कथं भवति?

सांख्य-शास्त्रे 'प्रकृतिः, प्रधानम्, कारणम्, अव्यक्तम्, गुण-साम्यम्, तमोबहुलम्, अव्याकृतम्' चैते सर्वे प्रकृति-पर्यायाः सन्ति। अतः प्रकृति-पुरुषयोः संयोगेन या सृष्टिः जायते तत्र आदौ मूल-प्रकृतितः महत्तत्त्वं जायते। ततः अभिमानात्मकः अहङ्कारः, तस्मात् षोडशकः गणः उत्पद्यते। तस्मिन् गणे पञ्च तन्मात्राणि, पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, एकं च मनः अन्तर्भवति। किञ्च तस्मिन् षोडशक-गणे यानि पञ्च तन्मात्राणि सन्ति, तेभ्यः पञ्च महाभूतानि जायन्ते। एतत् वयम् अधः चित्रेण पश्यामः-




**१३३. सांख्य-दर्शनानुसारं सृष्टिः कतिविधा?**

सांख्य-दर्शनानुसारंसृष्टिः द्विविधा - भूत-सृष्टिः, भाव-सृष्टिः च। भूत-सृष्टिः महत्तत्वात् आरभ्य पृथिवीपर्यन्ता सृष्टिः, भाव-सृष्टिः च विपर्यय-अशक्ति-तुष्टि-सिद्ध-भेदात् चर्तुविधा। भाव-सृष्टेः अपरं नाम प्रत्ययसर्गः अपि अस्ति।




## ३.३.५ सांख्य-दर्शनानुसारं मोक्षोपाय-विचारः

**१३४. सांख्य-दर्शनानुसारं मोक्षः कः?**

सांख्य-दर्शनानुसारंदुःख-त्रयस्य ऐकान्तिकरूपेण आत्यन्तिकरूपेण च निवृत्तिः एव मोक्षः। ऐकान्तिकरूपेण = नियमरूपेण, आत्यन्तिकरूपेण = पुनः उत्पत्तिः यथा न भवेत् तथा।

**१३५. सांख्य-दर्शनानुसारं मोक्ष-प्राप्तिः कथं भवति?**

सांख्य-दर्शनानुसारं प्रकृति-पुरुषयोः विवेक-ज्ञानेन मोक्ष-प्राप्तिः भवति।

**१३६. प्रकृति-पुरुषयोः विवेक-ज्ञानं कथं भवति?**

व्यक्त-तत्त्वानां ज्ञान-पूर्वकम् अव्यक्तस्य ज्ञानं भवति। अव्यक्तस्य ज्ञानेन इदं ज्ञायते यत् पुरुषः अव्यक्तात् भिन्नः अस्ति। पुरुषः 'पुष्कर-पलाशवत् निर्लेपः' अस्ति। इत्थं प्रकृति-पुरुषयोः विवेक-ज्ञानेन दुःख-त्रयस्य ऐकान्तिकरूपेण आत्यन्तिकरूपेण च निवृत्तिः भवति।

# ४. योग-दर्शनस्य परिचयः

**१३७. योग-शब्दस्य कः अर्थः?**

योग-शब्दः युज्-समाधौ इति धातोः घञ्-प्रत्यये कृते निष्पन्नः भवति। पाणिनीय-व्याकरण-शास्त्रानुसारं (१) युजिर्-योगे, (२) युज्-संयमने, (३) युज्-समाधौ इति त्रिभिः धातुभिः योग-शब्दः निष्पद्यते। परन्तु अत्र योग-दर्शने युज्-समाधौ इति धातोः निष्पन्नः एव योग-शब्दः अभीष्टः। अतः एवं योगसूत्रकारः वदति - "योगश्चित्तवृत्तिनिरोधः" इति।

**१३८. संस्कृत-वाङ्मये योग-शब्दः केषु अर्थेषु प्रसिद्धः?**

संस्कृत-वाङ्मये योग-शब्दस्य बहुविधाः अर्थाः प्राप्यन्ते, यथा -

१. प्राणापानयोः संयोगः "योगः" इति हठ-योग-प्रक्रियायाम्।

२. सूर्य-चन्द्रमसोः संयोगः "योगः" इति नाडी-शास्त्रे।

३. जीव-परमात्मनोः ऐक्यं "योगः" इति वेदान्ते।

४. शिव-शक्त्योः सामरस्यं "योगः" इति शैवागमे।

५. प्रकृति-प्रत्यययोः संयोगः "योगः" इति व्यवहारे..

इत्थम् अयं योग-शब्दः सामान्यतः बहुषु अर्थेषु प्रसिद्धः।

**१३९. प्राचीन-ग्रन्थेषु योग-शब्दः कुत्र प्राप्यते?**

उपनिषत्साहित्ये, श्रीमद्भगवद्गीतायां, महाभारते, पुराणेषु अन्यत्र च विभिन्नार्थेषु प्रयुक्तः योग-शब्दः प्राप्यते।

**१४०. योग-दर्शनस्य प्रवर्तकः कः?**

योग-दर्शनस्य प्रवर्तकः महर्षिः पतञ्जलिः। यद्यपि पतञ्जलेः पूर्वाचार्याः हिरण्यगर्भ-याज्ञवल्क्यादयः अनेके आचार्याः योग-शास्त्रस्य प्रवक्तारः आसन्, तथापि जन-साधारणानां कृते पतञ्जलिः एतत् योग-शास्त्रं सूत्र-रूपेण ग्रन्थीकृत्य सरल-रीत्या प्रतिष्ठापितवान्। अतः अस्य दर्शनस्य प्रवर्तकः महर्षिः पतञ्जलिः इति कथनं युक्ति-युक्तम् अस्ति।

**१४१. योग-दर्शनस्य अपरं नाम किम्?**

योग-दर्शनस्य "पातञ्जल-दर्शनम्" इति।

**१४२. योग-सूत्रेषु किम् अस्ति?**

योग-सूत्रेषु चत्वारः पादाः सन्ति - (१) समाधि-पादः, (२) साधन-पादः, (३) विभूति-पादः, (४) कैवल्य-पादः। एतेषु चतुर्षु पादेषु आहत्य १९५ सूत्राणि सन्ति।

## ४.१ योग-दर्शनस्य महत्त्वम्

**१४३. योग-दर्शनस्य किं महत्त्वम्?**

योग-दर्शनम् एकम् अद्वितीय-रत्नम् अस्ति। एतस्य अभ्यासः न केवलं भारते अपि तु सम्पूर्णे जगति सर्वैः धर्मैः समाद्रियते अनुष्ठीयते च। एतस्य अभ्यासेन अलौकिकी मानसिकी शारीरिकी च शक्तिः उत्पद्यते। योगस्य अभ्यासेन दिव्य-शक्ति-सम्पन्नाः मानवाः अद्वितीयं कार्यं कर्तुं शक्नुवन्ति। योगाभ्यास-द्वारा योगिनः अनेकाः विद्याः सिद्धीः च प्राप्नुवन्ति, येन तेषां जीवनम् उन्नतं भवति।

**१४४. योग-दर्शनं कथं वर्तमानसमये अत्यन्तम् उपादेयम् अस्ति?**

योग-द्वारा न केवलं शारीरिकं, मानसिकं च स्वास्थ्यं प्राप्यते, परं योग-दर्शने निरूपितस्य अष्टाङ्ग-योगस्य साधनेन मानवः समाधौ उच्चतमां स्थितिं प्राप्नोति, सा एव मोक्षः उच्यते।

**१४५. योग-दर्शनस्य स्वरूपं किम् अस्ति?**

योग-दर्शनं चतुर्व्यूहात्मकम् अस्ति। यथा चिकित्साशास्त्रे रोगः, रोग-हेतुः, आरोग्यम्, भैषजम् इति चत्वारः व्यूहाः प्रतिपादिताः तथैव योगशास्त्रे अपि चत्वारः व्यूहाः प्रतिपादिताः। ते यथा - (१) संसारः, (२) संसारस्य कारणम्, (३) मोक्षः, (४) मोक्ष-हेतुः च। यथा रोगी दुःख-बाहुल्यात् रोगात् विमुक्तः भवितुम् इच्छति, तथैव दुःखबाहुल्यात् (१) **संसारः** हेयः, (२) हेयस्य **संसारस्य कारणं** द्रष्टृ-दृश्ययोः पुरुष-प्रधानयोः संयोगः, (३) पुरुष-प्रधानयोः संयोगस्य आत्यन्तिकी निवृत्तिः एव **मोक्षः**, (४) सम्यग् दर्शनम् एव **मोक्ष-हेतुः** इति।

## ४.२ योग-दर्शनस्य प्रमुखाः ग्रन्थाः

**१४६. योग-दर्शनस्य प्रमुखाः ग्रन्थाः के सन्ति?**

योग-दर्शनस्य प्रमुखाः ग्रन्थाः अधः तालिकायां प्रस्तूयन्ते-

| ग्रन्थः | कर्ता | वैशिष्ट्यम् |
|---|---|---|
| योग-सूत्रम् | पतञ्जलिः | समग्र-योगदर्शनस्य आधारभूतः सूत्रात्मकः ग्रन्थः |
| व्यास-भाष्यम् | व्यासः | योग-सूत्राणां प्रामाणिकं प्रसिद्धं च भाष्यम् |
| योग-वार्त्तिकम् | विज्ञान-भिक्षुः | योग-सूत्राणां प्रसिद्धः वार्तिक-ग्रन्थः |
| भोज-वृत्तिः (योग-सूत्रवृत्तिः) | भोज-राजः | योग-सूत्राणाम् उपरि प्रसिद्धः वृत्ति-ग्रन्थः |
| तत्त्व-वैशारदी | वाचस्पति-मिश्रः | योग-सूत्राणाम् उपरि प्रसिद्धा टीका |
| हठ-योग-प्रदीपिका | योगी स्वात्मारामः | आसन-प्राणायामादिविषये प्रायोगिकः पक्षः वर्णितः |
| घेरण्ड-संहिता | घेरण्ड-मुनिः | योग-दर्शनस्य आसन-प्राणायामादि-रूपेण प्रायोगिकः पक्षः अत्र निरूपितः |

## ४.३ योगदर्शने वर्णिताः प्रमुखाः विषयाः

**१४७. योग-दर्शनस्य प्रमुखाः विषयाः के सन्ति?**

योग-दर्शने दुःख-त्रयम्, समाधिनिरूपणम्, चित्तस्य वृत्तयः, समापत्तयः, चित्तस्य विविधाः परिणामाः, ईश्वर-रूपम्, अष्टाङ्ग-योगः, कर्मणां फलम्, सिद्धयः, कैवल्यम् इत्यादि-विषयाणां सैद्धान्तिक-रूपेण वर्णनम् अस्ति।

**१४८. योग-दर्शनस्य स्वरूपं किम् अस्ति?**

शास्त्रमिदं पाद-चतुष्टय-युक्तं वर्तते। ते चत्वारः पादाः यथा -१. समाधि-पादः,२. साधन-पादः, ३. विभूति-पादः, ४. कैवल्य-पादः चेति।

**१४९. प्रथमे समाधि-पाद-नामके पादे किं प्रतिपादितम् अस्ति?**

प्रथमे समाधि-पाद-नामके पादे 'अथ योगानुशासनम्', 'योगश्चित्तवृत्तिनिरोधः' चेतिद्वाभ्यां सूत्राभ्यां च योग-लक्षणम् उक्तम्। तदेव अभिलक्ष्य चित्त-वृत्ति-निरोध-काले चित्तस्य

स्वरूपावस्थानं, व्युत्त्थान-काले च वृत्ति-सारूप्यं निरूपितम्। ततः 'वृत्तयः पञ्चतय्यः 'इति वृत्तीनां पञ्च-संख्याकत्वं प्रतिपादितम्। पुनः पञ्चवृत्तीनां क्लिष्टाऽक्लिष्ट-भेदेन द्वैविध्य-पूर्वकम् उद्देश-प्रमाण-विभाग-लक्षणानि विवृतानि। वृत्तीनां निरोधोपायेन अभ्यासवैराग्ययोः स्वरूपकथनं कृतम्। तयोः अवान्तरभेद-लक्षण-प्रतिपादन-पुरस्सरं सम्प्रज्ञात-असम्प्रज्ञात-समाध्योः स्वरूपं, तदधिकारी, अधिकारानुगुण-फल-लाभः, समय-तारतम्यादिकं, सवितर्क-निर्वितर्क-सविचार-निर्विचार-समापत्तीनां स्वरूपं च प्रतिपादितम्। ईदृशाः अतिगम्भीराः विषयाः समाधि-पाद-नामके प्रथम-पादे एकपञ्चाशता सूत्रैः महर्षि-पतञ्जलिना निर्दिष्टाः।

**१५०. योग-दर्शनस्य द्वितीये साधन-पाद-नामके पादे किं प्रतिपादितम्?**

द्वितीये साधन-पाद-नामके पादे 'नातपस्विनो योगः सिद्ध्यति' इति आर्योक्तिम् अनुसृत्य 'तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोग' इति क्रिया-योगस्य स्वरूपं प्रयोजनं च प्रतिपादितम्। ततः पञ्चानां क्लेशानाम् उद्देश-लक्षण-विभागान् सम्परीक्ष्य तेषां निरासोपायाः च निरूपिताः। ततः हेयादि व्यूहचतुष्टयं सम्यक् अवबोध्य अष्टाङ्गयोगे बहिरङ्ग-साधनीभूतं यमनियमादि पञ्चकं फलसहितं सुस्पष्टं प्रतिपादितम्। अस्मिन् पादे पञ्चपञ्चाशत् सूत्राणि सन्ति।

**१५१. योगदर्शनस्य विभूति-पाद-नामके तृतीये पादे किं प्रतिपादितम्?**

तृतीयः विभूति-पाद-नामकःपादः'देशबन्धश्चित्तस्य धारणा' इति सूत्रात् आरभ्यते। ततः ध्यान-धारणा-समाधीनां लक्षण-प्रयोजनानि अभिलक्षितानि । पश्चात् संयमस्य लक्षणं निरूप्य परिणाम-भेदाः तत्फलरूपाः अतीतानागत-भुवनज्ञानं, काय-व्यूह-ज्ञानादिरूपाः च विभूतीः परिलक्षिताः। ततः पादेऽस्मिन् इन्द्रिय-जयादि-रूप-सिद्धीः, योग-फल-भूताः तारक-संज्ञित-विवेक-ज्ञान-सिध्द्यादीन्च निरूपितवान् महर्षिः पतञ्जलिः। पादे अस्मिन् पञ्चपञ्चाशत् सूत्राणि सन्ति।

**१५२. योग-दर्शनस्य चतुर्थे कैवल्य-पाद-नामके पादे किं प्रतिपादितम्?**

चतुर्थे कैवल्य-नामके पादे 'जन्मौषधि-मन्त्र-तप-समाधिजाः सिद्धयः' इति सूत्रात् आरभ्य सिद्धि-पञ्चकं सप्रपञ्चं निरूपितम्। योग-शास्त्रस्य मुख्योद्देश्यं सर्व-प्राणिभिः अभिलषितः परम-पुरुषार्थः 'कैवल्यम्' अस्ति इति निरूपितम्। अस्मिन् अन्तिमे पादे चतुस्त्रिंशत् सूत्राणि सन्ति। इत्थं इदं पातञ्जलयोगशास्त्रं समग्रयोगस्वरूपं प्रतिपादयति।

**१५३. साधन-रूपः योगः व्यवहारे कतिविधः द्रष्टुं शक्यते?**

साधकानां सामर्थ्येन अभिरुच्या वा साधन-रूपः योगः बहुधा द्रष्टुं शक्यते,यथा - १. क्रिया-योगः, २. समाधि-योगः, ३. जप-योगः, ४. मन्त्र-योगः, ५. हठ-योगः, ६. लय-योगः, ७. राज-योगः, ८. कुण्डलिनी-योगः, ९. वाग्-योगः, १०. शब्द-योगः, ११. श्रद्धा-योगः, १२. कर्म-योगः, १३. अभ्यास-योगः, १४. पाशुपत-योगः इत्यादि। तथा श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन नैकेषां योगानां प्रकाराः प्रदर्शिताः ते यथा -

समत्व-योगः (अध्यायः २), २. ज्ञान-योगः(अध्यायः ४) ३. भक्ति-योगः (अध्यायः १२), ४. कर्म-योगः (अध्यायः ३), कर्म-सन्न्यास-योगः (अध्यायः ५) इत्यादि।

## ४.४.१ योग-दर्शने वृत्तयः

**१५४. योग-दर्शने चित्तस्य वृत्तयः कतिविधाः स्वीकृताः?**

योग-दर्शने चित्तस्य पञ्च वृत्तयः स्वीकृताः सन्ति।

**१५५. एताः पञ्च वृत्तयः काः सन्ति?**

एताः पञ्च वृत्तयः (१) प्रमाणम्, (२) विपर्ययः, (३) विकल्पः, (४) निद्रा, (५) स्मृतिः चेति सन्ति।

**१५६. एतासां वृत्तीनां निरोधः किम् उच्यते?**

एतासां वृत्तीनां निरोधः 'योगः' इति उच्यते।

**१५७. एतासां वृत्तीनां निरोधस्य उपायः कः?**

एतासां वृत्तीनां निरोधस्य उपाय-द्वयम् अस्ति - १. अभ्यासः २. वैराग्यं च।

## ४.४.२ योग-दर्शने ईश्वर-स्वरूपम्

**१५८. योग-दर्शनानुसारम् ईश्वरः कः?**

योग-दर्शनानुसारम् 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुष-विशेष ईश्वरः' इति। अर्थात् क्लेशानां, कर्मणां विपाकाशयानां संसर्गेण रहितः यः पुरुष-विशेषः भवति, सः ईश्वरः इति उच्यते।

**१५९. क्लेशाः के सन्ति?**

क्लेशाः पञ्च सन्ति - अविद्या, अस्मिता, रागः द्वेषः, अभिनिवेशः च इति पञ्च क्लेशाः सन्ति।

**१६०. कर्माणि कतिविधानि ?**

कर्माणि त्रिविधानि - शुक्ल-कर्माणि (पुण्य-कर्माणि), अशुक्ल-कर्माणि (पाप-कर्माणि), शुक्लाशुक्लकर्माणि (पुण्यपाप-मिश्रित-कर्माणि) च।

**१६१. विपाकः इति शब्दस्य कः अर्थः?**

यदा मनुष्यः कर्म करोति तदा तस्य कर्मणः संस्काररूपेण स्थितिः विपाकः इति उच्यते। अतः कृतस्य कर्मणः फलं विपाकः।

**१६२. ईश्वरः एकः उत अनेकः?**

ईश्वरः एकः एव।

## ४.४.३ अष्टाङ्ग-योगस्य स्वरूपम्

**१६३. योग-दर्शनानुसारम् ईश्वर-प्राप्तेः उपायः कः?**

योग-दर्शनानुसारं चित्त-वृत्तीनां निरोधेन समाधिः प्राप्यते, तस्मिन् समाधौ ईश्वरस्य साक्षात्कारः भवति।

**१६४. ईश्वरस्य साक्षात्काराय योग-दर्शने कः प्रधानः मार्गः?**

अष्टाङ्ग-योगः ईश्वरस्य साक्षात्काराय योगदर्शने प्रधानः मार्गः।

**१६५. अष्टाङ्ग-योगः अर्थात् किम्?**

यस्मिन् योगस्य अष्टानाम् अङ्गानां निरूपणम् अस्ति, तादृशः योगः अष्टाङ्ग-योगः उच्यते।

**१६६. योगस्य अष्टौ अङ्गानि कानि सन्ति?**

योगस्य अष्टौ अङ्गानि इमानि सन्ति - (१) यमः, (२) नियमः, (३) आसनम्, (४) प्राणायामः, (५) प्रत्याहारः, (६) धारणा, (७) ध्यानम्, (८) समाधिः च।

**१६७. कःनाम यमः?**

मनसः, वाण्याः, कर्मणः च संयमनम् एव यमः। यमः पञ्चविधः अस्ति। अहिंसा, सत्यम्, अस्तेयम्, ब्रह्मचर्यम्, अपरिग्रहः च।

**१६८. कः नाम नियमः?**

मनुष्येण स्वजीवने आरोपणीयाः श्रेष्ठाः आचाराः एव नियमाः। नियमाः पञ्च सन्ति - शौचम्, सन्तोषः, तपः, स्वाध्यायः, ईश्वरप्रणिधानंच।

**१६९. किं नाम आसनम्?**

योग-सूत्रेषु उक्तं यत् "स्थिरं सुखम् आसनम्"। दीर्घ-कालं यावत् यस्याम् अवस्थायां सुखेन स्थित्वा योगस्य अभ्यासः कर्तुं शक्यते, सा सुखावहा स्थितिः 'आसनम्' इति उच्यते। यथा पद्मासनं, भद्रासनं, स्वस्तिकासनं, दण्डासनम् इत्यादिकम्।

**१७०. प्राणायामः कः?**

योग-सूत्रेषु उक्तं, "तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः" इति। श्वास-प्रश्वासयोः या सामान्या गतिः भवति तस्याः विच्छेदः = विशिष्ट-प्रकारकं परिवर्तनम् एव 'प्राणायामः'।

**१७१. प्रत्याहारः कः?**

योग-सूत्रेषु उक्तं, "स्वविषयासम्प्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः" इति। यदा इन्द्रियाणि स्व-स्वविषयैः सह संयुक्तानि न भवन्ति, चित्त-स्वरूपम् एव अनुकुर्वन्ति, सा अवस्था 'प्रत्याहारः' इति कथ्यते।

**१७२. धारणा का भवति?**

"देशबन्धश्चित्तस्य धारणा"। नाभि-चक्रं, हृदय-पुण्डरीकम् इत्यादिषु स्थानेषु चित्तस्यवृत्तिमात्रेण यः बन्धः भवति, सा 'धारणा' इति उच्यते।

**१७३. ध्यानं किं भवति?**

"तत्र प्रत्ययैकतानता ध्यानम्" इति योग-सूत्रं वर्तते। सूत्रस्य अयम् आशयः - यस्मिन् स्थाने धारणा दृढा भवति, तस्मिन् एव स्थाने यदा चित्तस्य ध्येयालम्बनस्य प्रत्ययस्य एकतानता सदृशः इतर-प्रत्ययेन अपरामृष्टः प्रवाहः भवति तदा सः'ध्यानम्' इति उच्यते।

**१७४. समाधिः कः उच्यते?**

"तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः" इति योग-सूत्रं वर्तते। अस्य अयम् आशयः -यत्र विक्षेपान् परिहृत्य मनः सम्यगाधीयते एकाग्रीक्रियते स समाधिः। ध्यानावस्थायां ध्यान-कर्तुः ध्येयाकाररूपेण परिणामकारणात् तस्य शून्यावस्था भवति, सा अवस्था 'समाधिः' इति कथ्यते।

## ५. पूर्व-मीमांसा-दर्शनस्य परिचयः

**१७५. मीमांसा-शब्दस्य अर्थः कः?**

मीमांसा शब्दः 'मन्'-धातोः निष्पन्नः। अयं शब्दः पूज्यविचार-यथार्थवस्तुरूप-अनुसन्धानादिषु अर्थेषु गृह्यते।

**१७६. मीमांसा-दर्शनस्य प्रधानं लक्ष्यं किम् अस्ति?**

वेदस्य कर्म-सिद्धान्तानुगत-व्याख्या मीमांसा-दर्शनस्य प्रधान-लक्ष्यम् अस्ति।

**१७७. मीमांसा-दर्शनं "पूर्व-मीमांसा" इति किमर्थं कथ्यते?**

दर्शन-शास्त्रे वेदस्य रूपद्वयं प्रसिद्धम् अस्ति- कर्म-काण्डः, ज्ञान-काण्डः चेति। ज्ञान-काण्डः उत्तर-मीमांसायाः विषयः भवति।उत्तर-मीमांसायां वेदस्य ज्ञान-परकं विश्लेषणं कृतम्। किन्तु कर्म-काण्डः पूर्व-मीमांसायाः विषयः वर्तते।अतः पूर्व-मीमांसा एव 'कर्म-मीमांसा' इत्यपि कथ्यते।

**१७८. मीमांसा-दर्शनानुसारं कर्म किम् भवति?**

मीमांसा-दर्शने वेदविहितं कर्म एव धर्म-रूपेण प्रतिपादितम्।अयं धर्मः इहलौकिकानां पारलौकिकानां च सुखानां साधनम् अस्ति।

**१७९. मीमांसा-दर्शनं कियत् प्राचीनम् अस्ति?**

मीमांसा-दर्शनम् अतिप्राचीनम् अस्ति। ब्राह्मण-ग्रन्थैः उपनिषद्ग्रन्थैश्च सूचितं भवति यत् प्राक्तनैः ऋषिभिः अनेकेषु अस्पष्ट-विषयेषु युक्ति-युक्ताः विचाराः प्रस्तुताः। ते कर्म-मीमांसाया आधार-तत्त्वरूपाः सन्ति।

**१८०. मीमांसा-दर्शनस्य सर्वाधिकं महत्त्वपूर्णं तत्त्वं किम् अस्ति?**

मीमांसा-दर्शनस्य सर्वाधिकं महत्त्वपूर्णं तत्त्वं धर्म-विचारः अस्ति। धर्मस्य आधार-शिला कर्म-

काण्डम् आधारीकृत्य तिष्ठति। अतः मीमांसादर्शनं धर्मप्रतिपादकं शास्त्रम् इत्यपि उच्यते।

**१८१. मीमांसा-दर्शनस्य प्रवर्तकः कः?**

मीमांसा-दर्शनस्य प्रवर्तकः महर्षिः जैमिनिः अस्ति।

**१८२. महर्षिः जैमिनिः कं ग्रन्थं लिखितवान्?**

महर्षिः जैमिनिः 'मीमांसा-सूत्रम्' इत्याख्यं ग्रन्थं लिखितवान्।

**१८३. 'मीमांसा-सूत्र'-ग्रन्थे किम् अस्ति?**

मीमांसा-सूत्र-ग्रन्थे द्वादश अध्यायाः सन्ति। तत्र प्रथमाध्याये धर्म-लक्षणं, प्रमाण-निरूपणं च प्रतिपादितम् अस्ति। द्वितीयाध्याये धर्म-भेदः निरूपितः। तृतीयाध्याये अङ्गत्वं, चतुर्थाध्याये प्रयोज्य-प्रयोजक-भाव-निरूपणं, पञ्चमाध्याये क्रम-निरूपणम्, यज्ञाधिकारिणः वर्णनं च, षष्ठाध्याये अपि अधिकारिवर्णनम्, सप्तमाष्टमयोः अध्याययोः अतिदेश-निरूपणं, नवमाध्याये ऊह-निरूपणम्, एकादशाध्याये तन्त्र-निरूपणं, द्वादशाध्यायेप्रसङ्ग-निरूपणं च वर्तते।

**१८४. मीमांसा-सूत्रस्य अपरं नाम किम्?**

मीमांसा-सूत्रस्य अपरं नाम 'द्वादश-लक्षणी' अस्ति। यतो हि मीमांसा-सूत्र-ग्रन्थे द्वादश अध्यायाः सन्ति।

## ५.१ पूर्व-मीमांसा-दर्शनस्य प्रमुखाः ग्रन्थाः

**१८५. मीमांसा-दर्शनस्य प्रमुखाः ग्रन्थाः के सन्ति?**

मीमांसा-दर्शनस्य प्रमुखाः ग्रन्थाः अधः तालिकायां प्रस्तूयन्ते-

| ग्रन्थः | कर्ता | वैशिष्ट्यम् |
|---|---|---|
| मीमांसा-सूत्रम् | जैमिनिः | मीमांसा-दर्शनस्य आधारभूतः सूत्रात्मकः ग्रन्थः |
| शाबर-भाष्यम् | शबरस्वामी | मीमांसा-सूत्राणाम् उपरि अतिप्राचीनं प्रसिद्धं च भाष्यम्। |
| श्लोक-वार्त्तिकम् | कुमारिल-भट्टः | मीमांसा-सूत्रस्य प्रथमाध्यायम् अधिकृत्य लिखितः ग्रन्थः। |

| | | |
|---|---|---|
| तन्त्र-वार्तिकम् | कुमारिल-भट्टः | मीमांसा-भाष्यस्य व्याख्यापरकः ग्रन्थः |
| बृहती-टीका | प्रभाकर-मिश्रः | मीमांसा-सूत्रम् अधिकृत्य स्वतन्त्रा टीका। मीमांसा-शास्त्रे गुरुमतस्य बीजभूता टीका। |
| जैमिनीय-न्याय-माला | माधवाचार्यः | श्लोकात्मकः ग्रन्थः। प्रायः २००० श्लोकैः समग्रं मीमांसा-दर्शनं सरलतया वर्णितम्। |
| मीमांसा-न्याय-प्रकाशः | आपदेवः | मीमांसा-दर्शनस्य महत्त्वपूर्णः प्रकरण-ग्रन्थः |
| अर्थ-संग्रहः | लौगाक्षि-भास्करः | मीमांसा-दर्शनस्य प्रायः सर्वेषां सिद्धान्तानां सरलरीत्या प्रदर्शनम् |
| मीमांसा-परिभाषा | कृष्ण-यज्वा | मीमांसा-दर्शने प्रवेशाय प्रकरणग्रन्थः |

## ५.२ पूर्व-मीमांसा-दर्शनस्य प्रमुखाः सिद्धान्ताः

### १८६. मीमांसा-दर्शनस्य प्रमुखाः सिद्धान्ताः के सन्ति?

मीमांसा-दर्शने श्रुत्यादीनां प्रामाण्य-विचारः, भावना-विचारः, अपूर्वः, वेदानाम् अपौरुषेयत्वम्, विधि-विचारः इत्यादि-विषयाः प्रमुख-रूपेण वर्णिताः सन्ति।

### १८७. मीमांसा-दर्शने वेदस्य अर्थ-निर्णयाय लिङ्गानि कानि?

मीमांसा-दर्शने वेदस्य अर्थ-निर्णयाय षट् लिङ्गानि स्वीकृतानि – (१) श्रुतिः, (२) लिङ्गम्, (३) वाक्यम्, (४) प्रकरणम्, (५) स्थानम्, (६) समाख्या च।

### १८८. एतेषु षड्-लिङ्गेषु प्रबलं किम्?

एतेषु षड्-लिङ्गेषु प्रबलं श्रुतिः अस्ति। यत्र इमानि षट् लिङ्गानि एकस्मिन् काले अथवा सर्वदा एकत्र सन्निपतन्ति तत्र पूर्वापेक्षया अपरं प्रमाणं दुर्बलम् इति उच्यते। एतत्क्रमानुसारं सर्वेषां प्रमाणानां निर्णायकत्वेन मुख्यत्वेन च श्रुतिः एव अन्तिमत्वेन तिष्ठति। अस्याः अपेक्षया अन्ये लिङ्गादयः सर्वे दुर्बलाः सन्ति।

**१८९. मीमांसा-दर्शने वेद-प्रतिपादित-धर्मस्य विचारः अस्ति, तर्हि धर्मः अर्थात् कः?**

मीमांसा-दर्शनानुसारं यागादि कर्म एव धर्मः।

**१९०. धर्मस्य प्रतिपादकः वेदः पौरुषेयः उत अपौरुषेयः?**

मीमासा-दर्शने वेदः अपौरुषेयः इति स्वीक्रियते।

**१९१. पौरुषेयः अपौरुषेयः चेति अनयोः कः अर्थः?**

पौरुषेयत्वं नाम प्रमाणान्तरेण अर्थम् उपलभ्य रचितत्वम्। यथा रघुवंशम् इत्यादि-ग्रन्थाः। अपौरुषेयत्वं नाम प्रमाणान्तरस्य अपेक्षां विना रचितत्वम्। यथा वेदः।

वेदे प्रमाणान्तरेण अर्थम् उपलभ्य रचितत्वं नास्ति। अतः अयं वेदः अपौरुषेयः इति। अनेनैव कारणेन वेदस्य स्वतः प्रामाण्यम् अपि सिध्यति।

**१९२. वेदः नित्यः उत अनित्यः?**

मीमांसोक्तमतेन वेदः नित्यः अस्ति। नित्यत्वात् एव सः अपौरुषेयः अस्ति, अर्थात् वेदः कस्यापि पुरुषस्य कृतिः नास्ति। ऋषिभिः ऋचां दर्शनं कृतम्, अतः ते वेदानां रचयितारः न वर्तन्ते, ते केवलं मन्त्रद्रष्टारः सन्ति। मीमांसा-मते वेदानां कर्त्ता ईश्वरः नास्ति। वेदे लोके च आप्तत्वात् शब्द-प्रामाण्यम् अस्ति। शब्दः नित्यः वर्तते। कण्ठताल्वादि-स्थानेभ्यः शब्दोच्चारणं शब्दोत्पत्तिः वा नास्ति। यतोहि उच्चारणात् पूर्वं शब्दः विद्यमानः आसीत्। यदि शब्दः अनित्यः स्यात् तदा उच्चारणभेदेन तस्य अनेकानि रूपाणि स्युः, किन्तु एकस्य शब्दस्य एकमेव कारणं भवति। शब्दस्य अर्थेन सह सम्बन्धः अपि स्वाभाविकः एव अस्ति।कृत्रिमः नास्ति। अयमेव अपौरुषेयः वेदः धर्मे प्रमाणम् अस्ति।

**१९३. मीमांसा-मते वेदस्य विषयः कतिविधः?**

मीमांसकानाम् अवधारणा वर्तते यत् वेदस्य विषयः पञ्चधा वर्तते - १. विधि-वाक्यानि, २. मन्त्र-वाक्यानि, ३. फल-वाक्यानि, ४. अर्थवाद-वाक्यानि, ५. निषेध-वाक्यानि चेति। तत्र –

- क्रिया-प्रवर्तकानि वाक्यानि 'विधि-वाक्यानि' सन्ति,
- 'मन्त्र-वाक्यानि' यज्ञानुष्ठाने अर्थ-स्मरण-कारीणि भवन्ति,
- यज्ञानां नामानि फल-वाक्यानि 'नामधेयानि' सन्ति,

- निषिद्ध-कर्मभ्यो निवर्तकानि 'निषेध-वाक्यानि' जायन्ते,
- पदार्थानां गुण-दोष-विवेचन-पूर्वकं स्तुति-निन्दा-परकाणि वाक्यानि 'अर्थवाद-वाक्यानि' कथ्यन्ते।

**१९४. मीमांसायाः मुख्य-विषयः कः अस्ति?**

विधि-विचारः मीमांसायाः मुख्यविषयः अस्ति।

**१९५. विधिः अर्थात् किम्?**

अपूर्वस्य अर्थस्य ज्ञापकः वेद-भागः 'विधिः' इति उच्यते। अयं विधिः चतुर्विधः।

**१९६. चतुर्विधः विधिः कः?**

(१) उत्पत्ति-विधिः, (२) विनियोग-विधिः, (३) अधिकार-विधिः, (४) प्रयोग-विधिः च। तत्र कर्मणः स्वरूपस्य प्रतिपादयिता विधिः 'उत्पत्ति-विधिः'। अङ्ग-भूतानां प्रधान-भूतानां च यज्ञानां सम्बन्ध-बोधकानि वाक्यानि 'विनियोग-विधिः'। कर्मोत्पन्न-फलस्य स्वामित्वं यः प्रतिपादयति सः'अधिकार-विधिः'। प्रयोगस्य अविलम्बेन अनुष्ठानं यः व्यनक्ति सः 'प्रयोगविधिः' इति कथ्यते।

**१९७. आत्मविषये मीमांसायाः मतं किम् अस्ति?**

मीमांसा-दर्शनानुसारम् आत्मा कर्त्ता भोक्ता च अस्ति। ज्ञान-इच्छा-सुख-दुःख-प्रयत्नादिविशेष-गुणानाम् अधिकरणम् आत्मा अस्ति। अयं आत्मा व्यापकः अपि प्रतिशरीरं भिन्नः अस्ति। मीमांसकाः आत्मनि परिमाण-रूपिणं कर्म स्वीकुर्वन्ति। अस्मिन् मते आत्मा जडो बोधात्मकः च अस्ति।

**१९८. मोक्ष-विषये मीमांसायाः सिद्धान्तः कः?**

मीमांसा-दर्शने जगता सह आत्मनः सम्बन्धस्य नाशः एव मोक्षः इति अभिमतः। अस्य मतस्यानुसारेण आत्मा शरीरेण युक्तः भूत्वा एव बाह्य-विषयाणाम् उपभोगं करोति। अनेन सम्बन्धेन आत्मा संसार-समुद्रे निमग्नः अस्ति। अत एव भोगायतनं शरीरं भोग-साधनम् इन्द्रियं भोग-विषयाः पदार्थाः च अभिमताः। एभिः त्रिभिः आत्मनः आत्यन्तिकः एकान्तिकः वा सम्बन्ध-विच्छेदः एव मोक्षः अस्ति।

## ६. वेदान्त-दर्शनस्य परिचयः

**१९९. वेदान्त-शब्दस्य अर्थः कः?**

वेदानाम् अन्तिमः भागः वेदान्तः। चत्वारः अपि वेदाः विषय-दृष्ट्या (१) संहिता, (२) ब्राह्मणम्, (३) आरण्यकम्, (४) उपनिषत् इति भागेषु विभक्ताः सन्ति। तत्र अन्तिमः उपनिषद्-भागः एव वेदान्तः इति कथ्यते। 'वेदान्तो नाम उपनिषत्प्रमाणम्' इति उच्यते अभियुक्तैः।

**२००. उपनिषदः कति सन्ति?**

यद्यपि उपनिषदां संख्या द्विशताधिका अस्ति तथापि प्रमुख-रूपेण दश उपनिषदः अत्यन्तं प्रसिद्धाः सन्ति –

ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरिः।
ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा॥ (मुक्तिकोपनिषत्, १.३०)

**२०१. वेदान्त-दर्शनस्य अपरं नाम किम्?**

वेदान्त-दर्शनस्य अपरं नाम "उत्तर-मीमांसा" अस्ति।

**२०२. उत्तर-मीमांसा-शब्दस्य कः अर्थः?**

मीमांसा अर्थात् पूजितः विचारः। यथा वेदे यज्ञ-यागादि-धर्मस्य निरूपणम् अस्ति, तथैव वेदे 'सत्यं ज्ञानम् अनन्तं ब्रह्म' इत्यादिभिः वाक्यैः ब्रह्मणः वर्णनम् अपि अस्ति। धर्मस्य विचारः यत्र अस्ति, सा पूर्व-मीमांसा, ब्रह्मणः विचारः यत्र वर्तते सा उत्तर-मीमांसा इति।

**२०३. वेदान्त-दर्शनस्य प्रयोजनं किम् अस्ति?**

वेदान्त-मतानुसारं मोक्षः परं प्रयोजनम् अस्ति। मोक्षस्य तात्पर्यं वर्तते संसारात् अविद्यातः वा पृथग्भूय ब्रह्म-सामीप्यस्य लाभः । एतत्कृते आत्मज्ञानं परमावश्यकम् अस्ति।

**२०४. वेदान्त-दर्शनस्य अध्ययनेन कः लाभः?**

वेदान्त-दर्शनस्य अध्ययनेन द्विविधः लाभः भवति - १. इहलौकिकः, २. पारमार्थिकः च।

इहलौकिकः लाभः यथा –

१. नित्य-नैमित्तिक-उपासनादि-कर्मणाम् अनुष्ठानेन शरीरस्य आन्तरिकी बाह्या च शुद्धिः भवति।

२. आसन-प्राणायाम-ध्यानादीनाम् अभ्यासेन मनः स्थिरं भवति। यस्य मनः स्थिरं भवति, सः नरः एव सुखी इति उच्यते।

३. काम-क्रोध-राग-मोह-भय-इत्यादि-दुर्गुणानां शनैः शनैः ह्रासः भवति, तेन जनः सर्वदा आनन्दस्य अवस्थां प्राप्नोति।

पारलौकिकः लाभः यथा –

४. जीवनस्य चरम-लक्ष्यस्य शाश्वत-सुखस्य अर्थात् मोक्षस्य प्राप्तिः भवति।

## ६.१ वेदान्त-दर्शनस्य प्रमुखाः ग्रन्थाः

### २०५. वेदान्त-दर्शनस्य प्रमुखाः ग्रन्थाः के सन्ति?

वेदान्त-दर्शने प्रस्थान-त्रयं प्रसिद्धम् अस्ति। प्रस्थानं नाम "प्रस्थीयते अनेन इति प्रस्थानम्" अर्थात् राजमार्गः। प्रस्थान-त्रये एतत् अन्तर्भवति -

(१) उपनिषदः (श्रुति-प्रस्थानम्)

(२) भगवद्-गीता (स्मृति-प्रस्थानम्)

(३) ब्रह्मसूत्राणि (न्याय-प्रस्थानम्)

### २०६. उपनिषद्-भागे किं विचार्यते?

उपनिषत् पराविद्या इति पदेन व्यपदिश्यते। उपनिषच्छब्दस्यअर्थः'रहस्यम्' इति।अध्यात्म-विद्या-रहस्य-प्रतिपादकाः वेद-भागाः उपनिषदः कथ्यन्ते ।

### २०७. भगवद्-गीतायां किम् अस्ति?

भगवद्-गीतायाम् अष्टादश अध्यायाः सन्ति यत्र ज्ञान-भक्ति-कर्मणां विचारः अस्ति।

### २०८. ब्रह्मसूत्रेषु किम् अस्ति?

उपनिषत्सु भगवद्-गीतायां च प्रतिपादित-विषयाणाम् अधिकरण-शैल्या युक्ति-पूर्वकं विवेचनं ब्रह्मसूत्रेषु अस्ति। ब्रह्मसूत्रेषु प्रथमं सूत्रम् अस्ति - 'अथातो ब्रह्मजिज्ञासा' (१.१.१) इति। ब्रह्मसूत्रेषु चत्वारः अध्यायाः सन्ति। प्रत्येकम् अध्याये चत्वारः पादाः सन्ति, प्रत्येकं पादेषु सूत्राणि सन्ति।

**२०९. ब्रह्मसूत्रेषु कति सूत्राणि सन्ति?**

ब्रह्मसूत्रेषु ५५५ सूत्राणि[१] सन्ति।

**२१०. सूत्रस्य लक्षणं किम्?**

सूत्रस्य लक्षणं यथा –

'अल्पाक्षमसन्दिग्धं सारवद्-विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥' इति।

अर्थात् सूत्रं स्वल्पैः अक्षरैः युक्तं भवति, असन्दिग्धं भवति, सारयुक्तं भवति, बहुमुख-व्याख्यान-योग्यं भवति, अर्थज्ञान-बाध-रहितं भवति अनिन्द्यं भवति तादृशं वाक्यं सूत्रम् उच्यते।

## ६.२ वेदान्त-दर्शनस्य प्रमुखाः आचार्याः

**२११. वेदान्त-दर्शनस्य प्रवर्तकः कः अस्ति?**

यद्यपि वेदान्त-दर्शनम् अत्यन्तं प्राचीनम् अस्ति तथापि वेदान्त-दर्शनं सूत्र-ग्रन्थमाध्यमेन भगवान् बादरायणः (वेदव्यासः) प्रस्तुतवान्, अतः भगवान् बादरायणः वेदान्त-दर्शनस्य प्रवर्तकः इति वक्तुं शक्यते।

**२१२. वेदान्त-दर्शनस्य प्रमुखाः आचार्याः के सन्ति?**

वेदान्त-दर्शनस्य केचन प्रमुखाः आचार्याः इमे सन्ति - आत्रेयः, आश्मरथ्यः, औडुलोमिः, कार्ष्णाजिनिः, काशकृत्स्नः, जैमिनिः, बादरिः, भर्तृप्रपञ्चः, भर्तृमित्रः, भर्तृहरिः, उपवर्षः, बोधायनः, टङ्कः, ब्रह्मनन्दी, ब्रह्मदत्तः, भारुचिः, द्रविडाचार्यः, गौडपादाचार्यः, गोविन्द-भगवत्पादः, शङ्कराचार्यः च।

**२१३. एतेषु आचार्येषु सर्वाधिकः प्रसिद्धः आचार्यः कः?**

एतेषु आचार्येषु सर्वाधिकः प्रसिद्धः शङ्कराचार्यः अस्ति।

**२१४. शङ्कराचार्यः किमर्थं प्रसिद्धः अस्ति?**

शङ्कराचार्यः प्रस्थान-त्रयस्य भाष्यं कृतवान्, अद्वैतवेदान्त-दर्शनस्य च प्रवर्तनं कृतवान्, तस्मात्

---

[१] इतराचार्याणां मते सूत्रसंख्या भिन्ना अपि भवितुम् अर्हति। यथा रामानुजाचार्यमते ५४५ सूत्राणि सन्ति।

सः वेदान्तस्य अतिप्रसिद्धः आचार्यः जातः।

**२१५. शङ्कराचार्येण के ग्रन्थाः लिखिताः?**

शङ्कराचार्येण लिखिताः ग्रन्थाः अनेके वर्तन्ते। तत्र प्रमुखाः यथा- १. ब्रह्मसूत्र-भाष्यम्, २. एकादश उपनिषद्भाष्यम्, ३. भगवद्-गीताभाष्यम्, ४. विष्णुसहस्रनाम-भाष्यम्, उपदेश-साहस्त्री, विवेक-चूडामणिः, पञ्चीकरणम्, सौन्दर्य-लहरी, अपरोक्षानुभूतिः इत्यादयः।

## ६.३ वेदान्त-दर्शनस्य प्रमुखाः भेदाः

**२१६. वेदान्त-दर्शनस्य प्रमुखाः भेदाः के सन्ति?**

प्रस्थान-त्रयस्य विभिन्नैः आचार्यैः स्व-सम्प्रदायानुसारं भाष्याणि रचितानि। एतदाधारेण वेदान्त-दर्शनस्य अनेके भेदाः सन्ति। तेषु प्रमुखाः भेदाः अधः तालिकायां प्रस्तूयन्ते-

| आचार्यः | मतम् | ब्रह्मसूत्र-भाष्यस्य नाम |
|---|---|---|
| शङ्कराचार्यः | अद्वैत-वादः | शारीरक-मीमांसा-भाष्यम् |
| भास्कराचार्यः | भेदाभेद-वादः | भास्कर-भाष्यम् |
| रामानुजाचार्यः | विशिष्टाद्वैत-वादः | श्रीभाष्यम् |
| वल्लभाचार्यः | शुद्धाद्वैत-वादः | अणु-भाष्यम् |
| मध्वाचार्यः | द्वैत-वादः | पूर्ण-प्रज्ञ-भाष्यम् |
| निम्बार्काचार्यः | द्वैताद्वैत-वादः | वेदान्त-पारिजात-सौरभ-भाष्यम् |

## ६.४ अद्वैत-वेदान्तस्य परिचयः

**२१७. अद्वैत-वेदान्तस्य प्रधानः आचार्यः कः?**

अद्वैत-वेदान्तस्य प्रधानः आचार्यः शङ्करः अस्ति।

**२१८. अद्वैत-वेदान्तस्य सारः कः?**

ब्रह्मैव केवलं नित्यं सत्यं वस्तु, ब्रह्मभिन्नं सर्वं मिथ्या। ब्रह्मणः रूप-द्वयम् अस्ति - (१) निर्गुणं

रूपम्, (२) सगुणं रूपं च। तत्र ब्रह्मणः निर्गुणं रूपं पारमार्थिकम् अस्ति।

**२१९. अद्वैत-वेदान्त-दर्शनस्य प्रमुखाः ग्रन्थाः के सन्ति?**

अद्वैत-वेदान्त-दर्शनस्य प्रमुखाः ग्रन्थाः अधः तालिकायां प्रस्तूयन्ते –

| ग्रन्थः | कर्ता | वैशिष्ट्यम् |
|---|---|---|
| ब्रह्मसूत्रम् | बादरायणः | वेदान्त-दर्शनस्य आधारभूतः सूत्रग्रन्थः |
| शारीरकमीमांसा-भाष्यम् | शङ्कराचार्यः | ब्रह्मसूत्राणाम् उपरि प्रसिद्धं भाष्यम् |
| पञ्च-पादिका | पद्मपादाचार्यः | ब्रह्मसूत्रेषु चतुःसूत्री-पर्यन्ता प्रसिद्धाः टीका |
| भामती-टीका | वाचस्पति-मिश्रः | शाङ्कर-भाष्यस्य प्रसिद्धा टीका, भामती-प्रस्थानस्य मूलम् |
| पञ्चपादिका-विवरणम् | प्रकाशात्मयतिः | पञ्च-पादिकायाः टीका, विवरण-प्रस्थानस्य मूलम् |
| विवेक-चूडामणिः | शङ्कराचार्यः | वेदान्त-दर्शनस्य अनुभवात्मकः श्लोकात्मकः ग्रन्थः |
| पञ्चदशी | विद्यारण्य-मुनिः | वेदान्त-दर्शनस्य सर्वेषां विषयाणां परिचायकः श्लोकात्मकः ग्रन्थः |
| अद्वैत-सिद्धिः | मधुसूदन-सरस्वती | अद्वैत-वेदान्त-दर्शनस्य प्रधानः वाद-ग्रन्थः |
| सिद्धान्त-लेश-संग्रहः | अप्पय-दीक्षितः | वेदान्त-दर्शनस्य विभिन्न-वादानां सङ्ग्रहात्मकः ग्रन्थः |
| वेदान्त-परिभाषा | धर्मराज-अध्वरीन्द्रः | वेदान्त-दर्शनस्य प्रमाण-निरूपण-परः प्रकरण-ग्रन्थः |
| वेदान्त-सारः | सदानन्द-यतिः | वेदान्त-दर्शने प्रवेशाय अत्यन्तं सरलः ग्रन्थः |

## ६.५ अद्वैत-वेदान्तस्य प्रमुखाः विषयाः

**२२०. अद्वैत-वेदान्तस्य प्रमुखाः विषयाः के सन्ति?**

ब्रह्मणः लक्षणम्, माया, सत्ता-त्रैविध्यम्, अध्यासः, अध्यारोप-अपवादौ, परिणाम-विवर्त-वादौ, सृष्टेः उत्पत्तिः, जगतः मिथ्यात्वम्, कोश-पञ्चकम्, पञ्चीकरणम्, महावाक्य-विचारः, मोक्ष-स्वरूपम्, मोक्ष-साधनानि, जीवन्मुक्तिः, विदेह-मुक्तिः इत्यादिविषयाः प्रधानतया वर्ण्यन्ते।

**२२१. ब्रह्मणः लक्षणं किम् अस्ति?**

'सत्यं ज्ञानम् अनन्तं ब्रह्म' इति ब्रह्मणः लक्षणम् अस्ति।

**२२२. माया का अस्ति?**

माया ब्रह्मणः अनिर्वाच्या शक्तिः अस्ति। यया शक्त्या ब्रह्म एतत् जगत् सृजति सा माया।

**२२३. अद्वैत-वेदान्ते सत्ता कतिविधा अस्ति?**

अद्वैत-वेदान्ते सत्ता त्रिविधा अस्ति - (१) पारमार्थिकी सत्ता, यथा ब्रह्मणः, (२) व्यावहारिकी सत्ता यथा घट-पटादीनाम्, (३) प्रातिभासिकी सत्ता यथा शुक्ति-रजतादीनाम्।

**२२४. अध्यास-पदस्य कः अर्थः?**

अध्यासः अर्थात् भ्रमः। 'अतस्मिन् तद्-बुद्धिः' इति अध्यासस्य लक्षणम्। यथा शुक्तिकायां रजतस्य प्रतीतिः अध्यासः। अध्यासस्य अपरं लक्षणमपि अस्ति 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इति।

**२२५. अध्यारोपः कः?**

वस्तूनि अवस्तुनः आरोपः अध्यारोपः। यथा रज्जौ सर्पस्य आरोपः।

**२२६. अपवादः कः?**

रज्जु-विवर्तस्य सर्पस्य पुनः रज्जुमात्रत्व-रूपेण स्थितिः अपवादः।

**२२७. परिणाम-विवर्तयोः कः अर्थः?**

स्वरूपेण अवस्थितस्य वस्तुनः अन्यथा-भावः द्विधा भवितुम् अर्हति- परिणाम-भावः, विवर्त-भावः च। तत्र –

(१) तत्र सतत्त्वतोऽन्यथाप्रथा परिणामः। यदा किञ्चन कारण-भूतं वस्तु वास्तविकतया कार्य-रूप-वस्त्वन्तरं प्राप्नोति, तदा प्राथमिकस्य वस्तुनः द्वितीय-वस्तु-रूपेण परिणामः इति उच्यते। यथा दुग्धं स्वरूपं परित्यज्य दध्याकारेण परिणमते, मृत्तिका च वास्तविकतया घटरूपेण परिणमते। परिणामे कार्य-कारणयोः सत्ता तुल्या भवति।


(२) अतत्त्वतोऽन्यथाप्रथा विवर्तः। वस्तुनः स्व-स्वरूपापरित्यागेन स्व-रूपान्तरेण मिथ्या-प्रतीतिः विवर्तः इत्यर्थः। यदा किञ्चन कारण-भूतं वस्तु अवास्तविकतया कार्य-रूप-वस्त्वन्तरं प्राप्नोति, तदा प्राथमिक-वस्तुनः द्वितीय-वस्तु-रूपेण विवर्त इत्युच्यते। यथा रज्जुः स्व-स्वरूपापरित्यागेन सर्पाकारेण मिथ्या प्रतिभासते। विवर्ते च कार्य-कारणयोः विषमा सत्ता भवति।

## २२८. वेदान्त-दर्शनानुसारं सृष्टेः उत्पत्तिः कस्मात् भवति?

वेदान्त-दर्शनानुसारं सृष्टेः उत्पत्तिः ब्रह्मणः भवति। इयं सृष्टिः परमात्मनः कृते लीलारूपा अस्ति।

## २२९. पञ्चीकरणं किम् अस्ति?

पञ्चभ्यः तन्त्रेभ्यः उत्पन्नानां पञ्च-महाभूतानां परस्परं मिश्रणं पञ्चीकरणम् उच्यते। तत्र पञ्चीकरण-प्रकारः इत्थम् - आकाशम् आदौ द्विधा विभज्य तयोः आकाशार्धयोः एकं भागं पुनः चतुर्धा विभज्य तेषां चतुर्णाम् अंशानाम् आकाश-व्यतिरिक्तानां चतुर्णां भूतानाम् अर्धभागेषु योजनं भवति। एवमेव इतर-भूतेषु अपि इयं प्रक्रिया भवति। इयं प्रक्रिया "पञ्चीकरणम्" इति उच्यते। एतत् वयम् अधस्तन-चित्र-द्वारा पश्यामः –



**२३०. अद्वैत-वेदान्तमते इदं जगत् किमर्थं मिथ्या स्वीक्रियते?**

यद् वस्तु वास्तविक-रूपेण न भवति तथापि प्रतीयते, तत् मिथ्या इति उच्यते। यथा शुक्त्यां वास्तविक-रूपेण रजतं नास्ति तथापि प्रतीयते, अतः तत्र रजतं मिथ्या। एवमेव ब्रह्मणि वास्तविक-रूपेण सृष्टिः नास्ति, तथापि ब्रह्मणः माया-कारणात् इयं सृष्टिः प्रतीयते, अतः मिथ्या।

**२३१. महावाक्यं किं भवति?**

जीव-ब्रह्मणोः ऐक्य-बोधकं वाक्यं वेदान्त-दर्शने महावाक्यम् इति कथ्यते।

**२३२. महावाक्यानि कति सन्ति?**

यद्यपि महावाक्यानि बहूनि सन्ति तथापि चतुर्णां वेदानां प्रतिनिधि-भूतानि चत्वारि महावाक्यानि इमानि सन्ति -

| **महावाक्यम्** | **प्रकारः** | **वेदः उपनिषत् च** |
|---|---|---|
| प्रज्ञानं ब्रह्म | लक्षण-वाक्यम् | ऋग्वेदः – ऐतरेयोपनिषत्, १.२ |
| तत्त्वमसि | उपदेश-वाक्यम् | सामवेदः – छान्दोग्योपनिषत् ६.८.७ |
| अयमात्मा ब्रह्म | साक्षात्कार-वाक्यम् | अथर्ववेदः – माण्डूक्योपनिषत्, १.२ |
| अहं ब्रह्मास्मि | अनुभव-वाक्यम् | यजुर्वेदः - बृहदारण्यकोपनिषत्, १.४.१० |

**२३३. वेदान्त-दर्शने मोक्ष-स्वरूपं किम् अस्ति?**

वेदान्त-दर्शने शोक-निवृत्तिः निरतिशय-सुख-प्राप्तिः च मोक्षः।

**२३४. वेदान्त-दर्शने मोक्ष-प्राप्तेः उपायः कः?**

वेदान्त-दर्शने ज्ञानम् एव मोक्ष-प्राप्तेः उपायः अस्ति। "ऋते ज्ञानात् न मुक्तिः", "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इत्यादि-श्रुतयः तत्र प्रमाणम्।

* * *

# षष्ठं प्रकरणम्

# साहित्य-विवरणम्

## १. साहित्य-परिचयः

१. **विश्वस्य प्राचीनतम-ग्रन्थः कः?**

विश्वस्य सर्वेषु ग्रन्थेषु वेदः प्राचीनतमः इति सर्वैः स्वीक्रियते।

२. **साहित्यं 'शास्त्रं' वर्तते। अतः किं नाम शास्त्रम् इति आदौ पश्यामः -**

'शास्' धातोः 'ष्ट्रन्'-प्रत्यये शास्त्रम् इति शब्दः निष्पन्नः भवति। शिष्यते उपदिश्यते अनेन इति शास्त्रम्। शास्त्रं शासनं / उपदेशं करोति। विविधानि शास्त्राणि प्रसिद्धानि सन्ति यथा – वेदाः वेदाङ्गानि मीमांसा धर्मशास्त्रम् इत्यादि।

३. **साहित्य-शास्त्रस्य एव 'अलङ्कार-शास्त्रम्' इति अपरं नाम वर्तते। शास्त्रेषु अस्य शास्त्रस्य स्थानं किम् इति पश्यामः -**

अस्मिन् सन्दर्भे राजशेखरः काव्यमीमांसायां कथयति ''उपकारकत्वाद् अलङ्कारः सप्तमम् अङ्गम्'' इति। अर्थात् षड् वेदाङ्गानि व्याकरणादीनि प्रसिद्धानि। अलङ्कारः वेदस्य सप्तमम् अङ्गम् अस्ति।अलङ्कार-शास्त्रम्, काव्य-शास्त्रम् इत्यादीनि साहित्य-शास्त्रस्य अपराणि नामानि सन्ति।

## १.१. साहित्य-शास्त्रस्य विविधानां नाम्नां सार्थकता

४. **साहित्य-शास्त्रम् 'अलङ्कार-शास्त्रम्' इति किमर्थम् उच्यते?**

'अलम्' इति अव्ययं 'भूषणे' अर्थे वर्तते। 'अलङ्करोति = भूषयति इति 'अलङ्कारः'। काव्येषु ये शब्दान् अलङ्कुर्वन्ति ते 'शब्दालङ्काराः', ये च अर्थान् अलङ्कुर्वन्ति ते 'अर्थालङ्काराः' इति उच्यन्ते। 'का ते अस्त्यरङ्कृतिः सूक्तैः कदा नूनं ते........॥' (ऋग्वेदः – ७/२/२९/०३) इत्यत्र ऋग्वेदे 'अरङ्कृतिः' इति शब्दः प्रयुक्तः दृश्यते। स्वीये वेद-भाष्ये आचार्यः सायणः 'अरङ्कृतिः'

इत्यस्य अर्थम् 'अलङ्कृतिः' इति करोति। वेदेषु अपि उपमाऽलङ्कारस्य रूपकाऽलङ्कारस्य च प्राचूर्येण प्रयोगः कृतः अस्ति। इत्थम् अलङ्कारस्य बीजं वेदेषु दृश्यते। काल-क्रमेण रामायणादयः काव्य-ग्रन्थाः रचिताः।

एतेषु ग्रन्थेषु अलङ्काराणां सहजः स्वाभाविकः च प्रयोगः उपलभ्यते। काव्येषु नाटकेषु चापि कविभिः सहजतया एव अलङ्काराणां प्रयोगः कृतः। 'एतेषाम् अलङ्काराणां लक्षणम् एतादृशं भवेत्', 'अत्र एषः अलङ्कारः प्रयुक्तः' इत्यादिः विचारः यत्र भवति तत् 'अलङ्कार-शास्त्रम्' इति वक्तुं शक्यते। 'अलङ्काराणां प्राधान्यं काव्ये भवति' इति ये आचार्याः प्रतिपादितवन्तः तेषां ग्रन्थानां नाम अपि प्रायः अलङ्कार-शब्दयुक्तं भवति। तस्मादेव इदं शास्त्रम् 'अलङ्कार-शास्त्रम्' इति व्यवहारः आरब्धः।

आचार्य-भामहस्य ग्रन्थः'काव्यालङ्कारः', रुद्रटस्य ग्रन्थः 'काव्यालङ्कारः', वामनाचार्यस्य ग्रन्थः ''काव्यालङ्कार-सूत्रवृत्तिः'' इत्येवं ग्रन्थेषु अलङ्कार-शब्द-प्रयोगात् अपि इदम् अलङ्कार-शास्त्रम् इति उच्यते। काव्यालङ्कार-सूत्रवृत्तेः कामधेनु-टीकायां लिखितम् अस्ति यथा - ''योऽयम् अलङ्कारः काव्यग्रहणे हेतुत्वेन उपन्यस्यते.......इति शास्त्रस्य अलङ्कारत्वेन प्रसिद्धिः प्रतिष्ठिता स्यादिति सूचयितुम् अयं विन्यासः कृतः'' इति। अत्र अलङ्कारस्य शास्त्रत्वेन ग्रहणं कर्तुम् उपक्रमः कृतः अस्ति। संक्षेपतः उच्यते चेत् काव्यस्य शोभाकराणां धर्माणाम् अलङ्काराणां निरूपणम् अस्मिन् शास्त्रे भवति अतः इदम् अलङ्कार-शास्त्रम् इति उच्यते।

**५. साहित्य-शास्त्रं 'काव्य-शास्त्रम्' इति किमर्थम् उच्यते?**

कवेः कर्म अथवा कवेः भावः काव्यम् उच्यते। 'काव्यं कीदृशं भवति ?' इति चर्चा यत्र भवति तत् काव्य-शास्त्रं कथ्यते। काव्य-शब्दस्य प्रयोगः अथर्ववेदे अस्ति यथा - ''पश्य देवस्य काव्यं न ममार न जीर्यति।'' (अथर्ववेदः – १०/८/३२) अत्र काव्य-शब्दः चातुर्य-वाचकः वेद-वाचकः वा अस्ति।

वेदः प्रथमं काव्यम् उच्यते। लौकिक-काव्येषु रामायणम् आदिकाव्यं कथ्यते। तदनन्तरं विविध-आविष्काराणां कृते 'काव्य'-शब्दस्य प्रयोगः आरब्धः। काव्यस्य विविधाः दृश्य-श्रव्यादयः भेदाः उच्यन्ते। दृश्यं नाटकादि तथा श्रव्यं गद्य-पद्यादि। एतेषां निरूपकंशास्त्रं काव्य-शास्त्रम् उच्यते। काव्यस्य लक्षणं तु प्रायः सर्वैः आलङ्कारिकैः निरूपितम्। काव्यस्य अन्येषामपि

तत्त्वानां यत्र चर्चा भवति तत् काव्य-शास्त्रम्। राजशेखरः काव्य-मीमांसायां चतुर्दश विद्यास्थानानि निरूप्य उक्तवान् यत् - ''सकल-विद्या-स्थानैकायतनं पञ्चदशं काव्यं विद्या-स्थानम्'' तन्नाम सर्वासां विद्यानां यस्मिन् समाने स्थाने मेलनं भवति तत् स्थानं काव्यमेव। काव्ये सर्वाः अपि विद्याः समाविष्टाः भवन्ति इति तात्पर्यम्। किमर्थं काव्यं सकलविद्यानां समागम-स्थानम् उच्यते ? अस्य उत्तरं राजशेखरः ददाति यत् - ''काव्यं गद्य-पद्यमयं भवति तथा हितोपदेशकं भवति। सर्वाणि शास्त्राणि प्रति काव्यं धावति, काव्ये सकल-शास्त्राणां निरूपणं भवति'' अतः काव्यं सर्वविद्याभिः पूर्णम् इति भावः। एतादृशस्य काव्यस्य निरूपकं शास्त्रं काव्य-शास्त्रं कथ्यते।

**६. साहित्यशास्त्रं किमर्थं 'क्रियाकल्पः' इति नाम्ना प्रसिद्धम् अभवत्?**

एवं प्रकारेण इदं शास्त्रं १ अलङ्कारशास्त्रम्, २ काव्यशास्त्रम्, ३ काव्यालङ्कारः इति अभिधानैः प्रचलितं जातम् । एतेभ्यः नामभ्यः भिन्नम् एकं नाम वर्तते 'क्रियाकल्पः' इति । कदाचिद् इदं नाम सर्वाधिकं प्राचीनम् अस्ति । अस्य निर्देशः वात्स्यायनस्य कामसूत्रे चतुष्षष्ठिकलासु वर्तते । तस्य पूर्णं नाम 'काव्यक्रियाकल्पः' इति । ललितविस्तरनामके बौद्धग्रन्थेऽपि अस्य शब्दस्य प्रयोगः वर्तते । टीकाकार-जयमङ्गलार्कस्य मतानुसारं 'क्रियाकल्प इति काव्यकरणविधिः काव्यालङ्कार' इत्यर्थः । एतेन ज्ञायते यत् क्रियाकल्पशब्दः अपि काव्यालङ्कारार्थे अथवा अलङ्कारशास्त्रार्थे प्रयुक्तः । रामायणेऽपि 'क्रियाकल्पविद्' शब्दः प्रयुक्तः ।

"**क्रियाकल्पविदश्चैव तथा काव्यविदो जनाः ।** -उत्तरकाण्ड:-९४/७

**७. एतेन शास्त्रेण 'साहित्य-शास्त्रम्' इति नाम कथं प्राप्तम्?**

'सहित'-शब्दात् एव 'साहित्य'-शब्दः निष्पन्नः भवति। हितेन सह = 'सहितम्'। सहितस्य भावः= 'साहित्यम्'। अस्मिन् शास्त्रे लोकस्य हितं निहितम् अतः एतत् 'साहित्यम्' इति। साहित्य-शब्दस्य प्रयोगः भामहाचार्यस्य काव्य-लक्षणे प्राप्यते। सः लिखति, ''शब्दार्थौ सहितौ काव्यम्'' इति। इत्थं शब्दार्थयोः सहितत्वम् एव 'साहित्यम्' इति। भर्तृहरिः नीति-शतके लिखति-

"साहित्य-सङ्गीत-कलाविहीनः साक्षात् पशुः पुच्छ-विषाण-हीनः।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम्॥" - (नीतिशतकम् – १३)

अत्र कथितम् यत् यः मनुष्यः साहित्य-हीनः सङ्गीत-हीनः अथवा कला-हीनः भवति सः पशु-तुल्यः एव। अत्र साहित्य-शब्दस्य अर्थः काव्यम् इत्येव कृतः वर्तते। बिल्हणः विक्रमाङ्क-देव-

चरिते लिखति यत् -

"साहित्य-पाथोनिधि-मन्थनोत्थं कर्णामृतं रक्षत हे कवीन्द्राः।
यदस्य दैत्या इव लुण्ठनाय काव्यार्थचौराः प्रगुणीभवन्ति।।"

- (विक्रमाङ्क-देव-चरितम्– १/१३)

अत्र अपि साहित्य-शब्दस्य अर्थः काव्यम् एव अस्ति। राजशेखरः तु लिखति यत् - ''पञ्चमी साहित्य-विद्या'' इति। अर्थात् आन्वीक्षिकी, त्रयी, वार्ता, दण्डनीतिः इति चतस्रः विद्याः यथा सन्ति तथा साहित्यं पञ्चमी विद्या वर्तते इति। साहित्य-विद्या चतसृणाम् अपि विद्यानां निःष्यन्दः = सारः अस्ति इति राजशेखरः कथयति। साहित्य-शब्दस्य सुन्दरं स्पष्टं च अभिप्रायं कुन्तकः प्रदर्शयति यथा -

''साहित्यमनयोः शोभाशालितां प्रति काप्यसौ।
अन्यूनानतिरिक्तत्त्व-मनोहारिण्यवस्थितिः।।'' - (वक्रोक्ति-जीवितम्)

इत्युक्ते शब्दः अर्थं प्रति तथा अर्थः शब्दं प्रति तौ द्वौ च मनोहरतया पूरकौ स्याताम्, अन्यूनौ तथा अनतिरिक्तौ स्याताम्, तादृशी एव अवस्थितिः साहित्यम् उच्यते। संक्षेपतः कथ्यते चेत् काव्यस्य शोभायाः कृते पूर्णः समर्थः शब्दः अर्थश्च यत्र मनोहरतया स्थाप्यते तत् साहित्यम्। आचार्यः विश्वनाथः तु स्वग्रन्थस्य नाम एव 'साहित्य-दर्पणम्' इति कृतवान्। साहित्य-दर्पणस्य रचनायाः अनन्तर-काले अस्य शास्त्रस्य 'साहित्य-शास्त्रम्' इति नाम एव अधिकं प्रसिद्धं जातम्। इत्थं शब्दार्थयोः रमणीयं मनोहरं च सहितत्त्वं साहित्यं कथ्यते। एवम् अत्र विविध ग्रन्थानुसारम् अस्माभिः दृष्टं यत् अस्य शास्त्रस्य विविधानि नामानि सन्ति यथा अलङ्कार-शास्त्रम्, काव्य-शास्त्रम्, साहित्य-विद्या, साहित्य-शास्त्रम् इत्यादि।

## १.२ साहित्यशास्त्रस्य उद्भवः विकासः च

**८. साहित्य-शास्त्रस्य उद्भवः कथं जातः?**

साहित्य-शास्त्रं काव्यानां लक्षणानि करोति, समीक्षां च करोति। येषां तत्त्वानां काव्ये भाव-दृष्ट्या सौन्दर्य-दृष्ट्या रचना-दृष्ट्या च महत्त्वं भवति तेषां सर्वेषां तत्त्वानां निरूपणं साहित्य-शास्त्रे भवति। अनेन ज्ञायते यत् काव्य-शास्त्रस्य प्रेरकाणि काव्यानि एव सन्ति।

काव्य-शास्त्रस्य बीजानि वेदेषु एव निहितानि। वेदेषु उपमा-रूपक-आदि-अलङ्काराणां प्रयोगः प्राचूर्येण दृश्यते। वेद-भाष्येषु आचार्यैः काव्य-शास्त्रीय-प्रयोगाणां स्पष्टीकरणम् अपि कृतम्। वेदानां तात्पर्यं ज्ञातुम् उत्पन्नानि वेदाङ्गानि अपि क्वचित् काव्य-शास्त्रीय-तत्त्वानि निरूपयन्ति। निरुक्ते उपमा-वाचकानां द्वादशानां पदानां निर्वचनम् उपलभ्यते। एवम् अस्य शास्त्रस्य उद्भवः वैदिक-साहित्यात् जातः इति वक्तुं शक्यते। यथा –

''द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति।।''

अस्मिन् मन्त्रे दर्शन-शास्त्रीय-तत्त्वस्य निरूपणं रूपकालङ्कारेण कृतं दृश्यते। अस्मिन् मन्त्रे अनुप्रास-विभावना-विशेषोक्त्यादयः अन्ये अपि अलङ्काराः वर्तन्ते। एवमेव वेदाङ्ग-साहित्ये अपि उपमादि-अलङ्काराणां निरूपणं शास्त्रकारैः कृतम्। वैदिक-कालाद् अलङ्कार-शास्त्रस्य तत्त्वानां सामान्यं निरूपणम् आरब्धम्।अलङ्कार-शास्त्रस्य मौलिक-तत्त्वानां शास्त्रीयं निरूपणं तुसर्वादौ भरतमुनिना प्रस्तुतम्। भरताद् आरभ्य आधुनिककालपर्यन्तम् अस्य शास्त्रस्य धारा निरन्तरं प्रवहति। एतस्मिन् कालावधौ साहित्य-शास्त्रस्य नैके महत्त्वपूर्णाः ग्रन्थाः विरचिताः। तत्र सर्वादौ भरतमुनेः नाट्य-शास्त्रं वर्तते। नाट्य-शास्त्रे मुख्यतया रसनिरूपणं तथा नाट्य-शास्त्रीय-तत्त्वानां निरूपणंवर्तते। नाट्य-शास्त्रे चत्वारः अलङ्काराः, दश गुणाः, दश दोषाश्च निरूपिताः सन्ति। एतस्य एव सर्वस्य महान् विस्तारः परवर्तिभिः साहित्याचार्यैः कृतः।

९. **साहित्य-शास्त्रस्यविकासक्रमम् अधुना पश्यामः** -

भरतमुनेः अनन्तरं प्रसिद्धः आचार्यः भामहः जातः। तस्य ग्रन्थः अस्ति काव्यालङ्कारः। नाम्ना एव ज्ञायते यत् अस्मिन् ग्रन्थे अलङ्काराणां प्राधान्येन निरूपणं कृतं वर्तते। भरतेन ये चत्वारः अलङ्काराः उक्ताः ते, तदतिरिच्य अन्ये अपि अलङ्काराः भामहेन प्रदर्शिताः सन्ति।अस्याम् एव परम्परायां भामहस्य अनन्तरम् आचार्यः उद्भटः, दण्डी, रूद्रटः च सञ्जाताः। उद्भटेन 'भामह-विवरणम्' इति नाम्ना काव्यालङ्कारस्य टीका विरचिता। दण्डिनः ग्रन्थः अस्ति काव्यादर्शः। काव्यादर्शे अलङ्काराणां, गुण-दोषाणां, काव्यभेदानां च चर्चा प्रधानतया कृता वर्तते। रुद्रटेन 'काव्यालङ्कार'-नामके ग्रन्थे चतुर्षु वर्गेषु अलङ्काराणां वैज्ञानिकं विभाजनं प्रस्तुतम्। एतस्माद् अनन्तरं वामनाचार्यः अभवत्। तस्य महत्त्वपूर्णः ग्रन्थः 'काव्यालङ्कार-सूत्र-वृत्तिः'इति। अस्मिन् ग्रन्थे काव्य-भेदानाम्, अलङ्काराणां, रीतीनां, कवेः नियमानां च चर्चा विस्तरेण वर्तते।

वामनानन्तरं साहित्य-शास्त्रस्य अतीव प्रसिद्धः आचार्यः आनन्दवर्धनः जातः। आनन्दवर्धनस्य ग्रन्थः 'ध्वन्यालोकः' अस्ति। साहित्य-शास्त्रे अस्य ग्रन्थस्य प्रधानं स्थानं वर्तते। अस्मिन् ग्रन्थे ध्वनेः स्वरूपं ध्वनेः भेदाः च मुख्यतया प्रतिपादिताः सन्ति।ततः परं काव्य-शास्त्रीय-तत्त्वानां सुन्दरं निरूपणं करोति राजशेखरः। तस्य ग्रन्थः 'काव्य-मीमांसा' अस्ति। अत्र विभिन्नदृष्ट्या काव्यस्य शास्त्रीया मीमांसा कृता अस्ति। राजशेखरानुसारं काव्यशास्त्रं सकल-शास्त्राणां साररूपम् अस्ति।आचार्यः कुन्तकः अपि काव्य-शास्त्र-परम्परायां प्रसिद्धः अस्ति। तस्य ग्रन्थः वक्रोक्ति-जीवितम् अस्ति। ग्रन्थेऽस्मिन् काव्य-स्वरूपं तथा वक्रोक्तेः भेदानां विस्तृतं निरूपणं वर्तते। कुन्तकानन्तरं धनञ्जयः जातः यस्य ग्रन्थः अस्ति दशरूपकम्। दशरूपके नाटकादीनां दशानां रूपकाणां नायक-नायिकादीनां रसाणां तथा च नाटकीय-तत्त्वानां सङ्ग्रहात्मकं निरूपणम् अस्ति। धनञ्जयस्य अनन्तरं क्षेमेन्द्रः जातः। तस्य ग्रन्थः औचित्य-विचार-चर्चा अस्ति। क्षेमेन्द्रः अस्मिन् ग्रन्थे 'काव्ये किम् उचितं किं च अनुचितम्' इति विवेचनं करोति।काव्य-शास्त्रस्य एषा परम्परा दशम-शताब्दीं यावत् इत्थं प्रवृत्ता। एकादश-शताब्द्यां व्यक्ति-विवेकस्य रचयिता महिमभट्टः जातः। तेन व्यक्ति-विवेके ध्वनेः खण्डनं कृत्वा व्यङ्ग्यस्य प्रतीतौ अनुमानस्य प्राधान्यं प्रतिपादितम् अस्ति।साहित्य-शास्त्रे अस्यां परम्परायां प्रायः एकादश-शताब्द्याम् आचार्यः मम्मटः जातः। मम्मटाचार्यः वाग्देवतायाः सरस्वत्याः अवताररूपः मन्यते। तस्य ग्रन्थः काव्य-प्रकाशः वास्तविकतया काव्यं काव्य-शास्त्रं च प्रकाशयति।काव्य-प्रकाशे काव्यस्य भेदाः, शब्द-शक्तयः, ध्वनेः विस्तारपूर्वकं वर्णनं, काव्य-दोषाः, अलङ्काराः चेति विषयाः प्रधानतया चर्चिताः सन्ति। काव्य-प्रकाशस्य स्थानं काव्य-शास्त्रे अत्यन्तम् आदरणीयं वर्तते। काव्य-प्रकाशानन्तरं प्रसिद्धः आचार्यः विश्वनाथः अस्ति। तस्य ग्रन्थः साहित्य-दर्पणः। साहित्य-दर्पणे काव्य-भेदानां, शब्द-शक्तीनां, रसाणां, नायकादीनाम्, अलङ्काराणां च विस्तृतं निरूपणं वर्तते। विश्वनाथेन अत्र नाट्य-तत्त्वानां रूपकाणां तथा काव्यस्य अन्येषां प्रकाराणां निरूपणम् अपि कृतमस्ति। एते साहित्य-शास्त्रस्य प्रसिद्धाः आचार्याः तथा तेषां ग्रन्थाः सन्ति। इतः अन्ये अपि केचित् आचार्याः स्वाभिः कृतिभिः साहित्य-शास्त्रं समृद्धं कृतवन्तः। तेषु केषाञ्चित् नामानि तत्कृत-ग्रन्थानां नामानि च इत्थं सन्ति –

| **आचार्यः** | **ग्रन्थः** |
|---|---|
| हेमचन्द्राचार्यः | काव्यानुशासनम् |
| रामचन्द्र-गुणचन्द्रौ | नाट्य-दर्पणम् |
| रूय्यकः | अलङ्कार-सर्वस्वम् |
| जयदेवः | चन्द्रालोकः |
| अप्पयदीक्षितः | कुवलयानन्दः |
| जगन्नाथः | रसगङ्गाधरः |

**१०. किम् आधुनिककाले अपि साहित्यशास्त्रस्य ग्रन्थानां रचना भवति?**

आधुनिके काले अपि काव्य-शास्त्रीयानां ग्रन्थानां प्रणयनम् अनुवर्तते। आधुनिकेषु साहित्याचार्येषु केचित् यथा –

| **आधुनिकः आचार्यः** | **ग्रन्थः** |
|---|---|
| गिरिधरलालः व्यासः | अभिनव-काव्य-प्रकाशः |
| रेवाप्रसादः द्विवेदी | काव्यालङ्कार-कारिका |
| ब्रह्मानन्दः शर्मा | काव्य-सत्यालोकः |
| शिवजी उपाध्यायः | साहित्य-सन्दर्भः |
| शङ्करदेव-अवतरे | अभिनव-काव्य-शास्त्रम् |
| राधावल्लभ-त्रिपाठी | अभिनव-काव्यालङ्कार-सूत्रम् |
| अभिराज-राजेन्द्र-मिश्र | अभिराज-यशोभूषणम् |
| कृष्णमाधव-झा | अलङ्कार-विद्योतनम् |

एवंप्रकारेण भरतमुनेः आरभ्य आधुनिक-काल-पर्यन्तम् एषा साहित्य-शास्त्र-परम्परा वैविध्यं विकासं च प्राप्य अद्यापि नित्य-नूतनतया विलसति। अनेन अस्य शास्त्रस्य विपुलता विशालता चापि ज्ञायते।

# २. साहित्यशास्त्रस्य विचारपरम्परा:

**११. साहित्यशास्त्रस्य विचारपरम्पराम् अधुना अवलोकयामः -**

साहित्य-शास्त्रं मुख्यतया काव्येन सह सम्बद्धम् अस्ति। काव्यस्य कानिचित् तत्त्वानि रचना-दृष्ट्या, भाव-दृष्ट्या, चमत्कार-दृष्ट्या च महत्त्वपूर्णानि भवन्ति। 'काव्ये किं प्रमुखं तत्त्वम्?' इति प्रश्नस्य उत्तरं दातुं विविधैः आचार्यैः विविधाः ग्रन्थाः विरचिताः। तेषु ग्रन्थेषु 'काव्यस्य प्रधानम् आत्मभूतं तत्त्वम् किम्?' इति विचाराः प्रस्तुताः सन्ति। तदनुरोधेन साहित्य-शास्त्रस्य अधः लिखिताः विचार-परम्पराः प्रवृत्ताः -

१. रस-विचार-परम्परा
२. अलङ्कार-विचार-परम्परा
३. रीति-विचार-परम्परा-
४. वक्रोक्ति-विचार-परम्परा
५. ध्वनि-विचार-परम्परा
६. औचित्य-विचार-परम्परा

**१२. का नाम रस-विचार-परम्परा?**

रस-विचार-परम्परायां प्रथमः आचार्यः भरतः अस्ति। भरतेन नाट्य-शास्त्रे षष्ठे अध्याये रससूत्रं प्रदत्तम् - ''विभावानुभाव-व्यभिचारि-संयोगाद् रसनिष्पतिः'' इति। रसस्य विषये भरतेन सर्वादौ विचारः कृतः, अतः सः रस-परम्परायाः प्रवर्तकः आचार्यः मन्यते। भरतस्य रस-सूत्रस्य १. भट्टलोल्लटः, २. श्रीशङ्कुकः, ३. भट्ट-नायकः ४. अभिनवगुप्तः चेति चत्वारः प्रमुखाः व्याख्याकाराः गण्यन्ते। भरत-प्रमुखैः आचार्यैः प्रवर्तिता एषा परम्परा एव रस-विचार-परम्परा इति उच्यते।

**१३. का नाम अलङ्कार-विचार-परम्परा?**

रस-सम्प्रदायानन्तरम् अलङ्कार-सम्प्रदायस्य स्थानं वर्तते। काव्यस्य आत्मा अलङ्कारः इति अस्य सम्प्रदायस्य सिद्धान्तः अस्ति। अलङ्काराणां काव्ये प्राधान्यं सर्वादौ भामहाचार्यः प्रतिपादितवान्। तदनन्तरं भामहस्य मतानुयायिनः आचार्याः अस्याः विचार-परम्परायाः विकासं कृतवन्तः। एतेषु

प्रधानाः सन्ति उद्भटः, दण्डी, रुद्रटः, जयदेवः च। जयदेवः तु अलङ्कार-युक्तमेव काव्यं मन्यते। तस्य मते अलङ्कार-रहितं काव्यं तु उष्णरहितः अग्निः इव भवति। एतेषाम् आचार्याणां मतं वर्तते यत् काव्यं सर्वथा अलङ्कार-सहितं भवेत् इति। अलङ्काराणां निरूपणं मम्मटादिभिः अपि कृतं, किन्तु मम्मटः काव्ये अलङ्काराणां प्राधान्यं न स्वीकरोति। ये काव्ये अलङ्कारं प्रधानं मन्यन्ते तेषां परम्परा एव अलङ्कार-विचार-परम्परा इति उच्यते।

**१४. का नामरीति-विचार-परम्परा?**

रीतिः काव्यस्य आत्मा अस्ति इति आचार्यः वामनः स्वग्रन्थे काव्यालङ्कार-सूत्रवृत्तौ प्रतिपादितवान्। एषः आचार्यः रीतेः गुणस्य च सम्बन्धम् अपि स्थापयति। रीतेः विवेचनं तु भामहेन, दण्डिना चापि कृतं किन्तु वामनः रीतेः व्यवस्थितं स्वरूपं प्रतिपाद्य तस्याः प्राधान्यं काव्ये स्वीकरोति। वामनादीनां परम्परा एव रीति-विचार-परम्परा इति उच्यते।

**१५. का नाम वक्रोक्ति-विचार-परम्परा ?**

आचार्येण कुन्तकेन 'वक्रोक्ति-जीवितम्' इति ग्रन्थः प्रणीतः। ग्रन्थे अस्मिन् काव्यस्य आत्म-तत्त्व-रूपेण वक्रोक्तिः प्रतिपादिता वर्तते। भामहादयः आचार्याः अलङ्कारेषु वक्रोक्तेः परिगणनं कृतवन्तः किन्तु कुन्तकः वक्रोक्तेः विशदं स्वरूपं निरूप्य तस्याः एव काव्ये प्राधान्यम् अङ्गीकृतवान्। कुन्तक-मतानुयायिनाम् आचार्याणां परम्परा एव वक्रोक्ति-विचार-परम्परा इति उच्यते।

**१६. का नाम ध्वनि-विचार-परम्परा?**

काव्य-शास्त्रीय-तत्त्वेषु प्रायः सर्वैः अपि भावकैः स्वीकृतं प्रधानं काव्य-तत्त्वं 'ध्वनिः' अस्ति। ध्वनि-सिद्धान्तस्य प्रवर्तकः आचार्यः आनन्दवर्धनः अस्ति। आनन्दवर्धनः ध्वन्यालोक-नामकं ग्रन्थं रचितवान्। तस्मिन् ग्रन्थे सः ध्वनि–विरोधिनां खण्डनं कृत्वा काव्यस्य आत्म-तत्त्व-रूपेण ध्वनेः स्थापनां कृतवान्। आनन्दवर्धनात् प्राक् अलङ्कार-रीत्यादीनां प्राधान्यं काव्ये आचार्यैः स्वीकृतं किन्तु आनन्दवर्धनः ध्वन्यालोके सर्वे षुकाव्य-तत्त्वेषु प्रधानं ध्वनिं प्रदर्शितवान्। गच्छता कालेन महिमभट्टः ध्वनेः खण्डनं कृतवान् किन्तु काव्य-प्रकाशे आचार्यः मम्मटः ध्वनेः पुनःस्थापनम् अकरोत् अतः मम्मटः ध्वनि-प्रस्थापन-परमाचार्यः कथ्यते। विश्वनाथः अपि काव्ये रस-ध्वनेः प्राधान्यं स्वीकरोति। एतेषाम् आचार्याणां परम्परा एव 'ध्वनि-विचार-परम्परा' इति।

**१७. का नाम औचित्य-विचार-परम्परा?**

औचित्य-सिद्धान्तः विशिष्टः वर्तते। अस्य प्रवर्तकः आचार्यः क्षेमेन्द्रः अस्ति। औचित्य-विचारचर्चा इति ग्रन्थे काव्यस्य आत्मरूपेण औचित्यं निरूपितम् अस्ति। काव्यस्य प्रत्येकम् अङ्गम् औचित्य-युक्तं स्यात् इति क्षेमेन्द्रस्य मतम् अस्ति। भामहादिभिः आचार्यैः अपि औचित्य-विषये कथितं किन्तु क्षेमेन्द्रः शब्दादीनाम् औचित्यं प्रतिपाद्य तस्य महत्त्वं प्रदर्शितवान्। क्षेमेन्द्र–मतानुयायिनां परम्परा एव 'औचित्य-विचार-परम्परा' इति उच्यते।

इत्थं विविधैःआचार्यैः काव्यस्य आत्मत्वेन परिगणितानि आहत्य षट् काव्य-तत्त्वानि सन्ति। एतानि एव आश्रित्य साहित्य-शास्त्रे षड्विचार परम्पराःअथवा सम्प्रदायाः प्रसिद्धाः। एतानि मुख्यतत्त्वानि किं स्वरूपाणि इति विचारः अधुना आरभ्यते।

## २.१ साहित्य-शास्त्रस्य मुख्य-तत्त्वानि

**१८. साहित्यशास्त्रे केषां तत्त्वानां निरूपणं भवति?**

साहित्यशास्त्रं मुख्यतया काव्येन सह सम्बद्धम् अस्ति। काव्यस्य कानिचित् तत्त्वानि रचना-दृष्ट्या भाव-दृष्ट्या चमत्कार-दृष्ट्या च महत्त्वपूर्णानि भवन्ति।तानि तत्त्वानि एतानि सन्ति -

१. रसः
२. अलङ्कारः
३. रीतिः
४. वक्रोक्तिः
५. ध्वनिः
६. औचित्यम्

**१९. कः नाम रसः?**

रस-विचार-परम्परायां प्रमुखं तत्त्वं रसः।एषः रसः कः? इति जिज्ञासायां नाट्य-शास्त्रे भरतमुनिनारस-स्वरूप-प्रदर्शकं प्रदत्तं यत् 'विभावानुभाव-व्यभिचारि-संयोगाद् रसनिष्पत्तिः' इति। तन्नाम विभावेन, अनुभावेन, व्यभिचारि-भावेन च संयुक्तरीत्या रसस्य निष्पत्तिः क्रियते इति। अस्य सूत्रस्य तात्पर्यं स्पष्टीकृतवन्तः चत्वारः प्रमुखाः आचार्याः, तेषां मतानि च सङ्क्षेपेण अत्र

उल्लिख्यन्ते -

१. भट्टलोल्लटस्य - उत्पत्तिवाद:

२. श्रीशङ्कुकस्य - अनुमितिवाद:

३. भट्टनायकस्य - भुक्तिवाद:

४.अभिनवगुप्तस्य - अभिव्यक्तिवाद:

एतेषु सर्वेषु अपि मतेषु अभिनवगुप्तस्य 'अभिव्यक्तिवाद:' मम्मट-विश्वनाथ-जगन्नाथादिभि: परवर्तिभि: आचार्यै: सिद्धान्तत्वेन स्वीकृत: वर्तते।

## २०. के विभावादय:?

रससूत्रे 'विभाव:', 'अनुभाव:','व्यभिचारि-भाव:' चेति शब्दा: प्रयुक्ता:। एतेषां शब्दानाम् अर्थम् आचार्य: मम्मट: स्पष्टं करोति यत्- लोके यानि कारणानि भवन्ति तानि काव्ये 'विभावा:' इति कथ्यन्ते। लोके यानि कार्याणि भवन्ति तानि काव्ये 'अनुभावा:' इति कथ्यन्ते। लोके यानिसहकारीणि भवन्ति तानि काव्ये 'व्यभिचारि-भावा:'इति कथ्यन्ते। तै: विभावादिभि: मिलित्वारत्यादि: स्थायी भाव: आस्वाद-योग्य: क्रियते। स: एव रस: इति।

## २१. क: विभाव: ?

विभाव: द्विविध: - १. आलम्बन-विभाव:,२. उद्दीपन-विभाव: च। आलम्बन-विभाव: नाम काव्य-नाटकादिषु वर्तमानानि नायक-नायिकादि-'पात्राणि'। उद्दीपन-विभाव: अर्थात् पात्राणि परित: वर्तमान: चन्द्र:, उद्यानं, चन्दनादि-लेपनं, वातावरणं च। आलम्बन-विभाव-योग्यं वातावरणम् 'उद्दीपन-विभाव:' इति कथ्यते।

## २२. क: अनुभाव:?

नायकादीनां चेष्टा: कार्याणि च 'अनुभाव:' इति कथ्यते। लोके य: कार्यरूप: भवति स: काव्ये नाट्ये च 'अनुभाव:' इति कथ्यते।

## २३. के व्यभिचारिभावा:?

कार्यानुसारं लज्जा, हर्ष, उत्सुकता इत्यादय:ये क्षणिका: भावा: उत्पद्यन्ते ते 'व्यभिचारि-भावा:' इति कथ्यन्ते। तेषां संख्या त्रयस्त्रिंशत् अस्ति।

## २४. कः स्थायि-भावः? तेषां सङ्ख्या का ?

'स्थायि-भावः' सहृदयानां प्रेक्षकाणां/पाठकानां मनसि आदौ एव स्थिरः वर्तते। विभावानुभाव-व्यभिचारिभावाःसम्मिल्यसहृदयस्य मनसि वर्तमानम् एतम् एव'स्थायि-भावम्' आस्वाद-योग्यं कुर्वन्ति।स्थायिभावाः नव सन्ति। ते यदा योग्यं विभावादिकं कारणं प्राप्नुवन्ति तदा आस्वादयोग्याः सन्तः'रसः' इति सञ्ज्ञां लभन्ते। अत्र स्थायि-भावानां, तत्सम्बन्धिनांरसानां च नामानि लिख्यन्ते-

| **स्थायिभावः** | **रसः** |
| --- | --- |
| १. रतिः | शृङ्गार-रसः |
| २. हासः | हास्य-रसः |
| ३. शोकः | करुण-रसः |
| ४.क्रोधः | रौद्र-रसः |
| ५.उत्साहः | वीर-रसः |
| ६.भयम् | भयानक-रसः |
| ७.जुगुप्सा | बीभत्स-रसः |
| ८.विस्मयः | अद्भुत-रसः |
| ९. शमः | शान्त-रसः |

इदम् अवश्यं बोद्धव्यं यत् स्वतन्त्रः विभावः, स्वतन्त्रः व्यभिचारिभावः वा रसः नास्ति। पानक-रसन्यायेन विभावादयः मिलित्वा एव रसस्य निष्पत्तिं कुर्वन्ति। शर्करा, लवणं, मरीचिका,जबीरं च मिश्रितावस्थायां'पेयम्' इति कथ्यन्ते। तथैव विभावानुभाव-व्यभिचारिभावानां मिलितावस्था एव 'रसः' इति उच्यते। यः पेयं पिबति सः पान-समये पेयस्य एव स्वादम् अनुभवति, न तु एकैकशः तत्र वर्तमानायाः शर्करायाः, लवणस्य, जम्बीरस्य वा। तथैव रसानुभवे अपि विभावादीनां पृथक् पृथक् भानं न भवति।

## २५. कः नामअलङ्कारः?

अलं करोति इति अलङ्कारः अथवा अलं क्रियते अनेन इति अलङ्कारः। अलम् इति शब्दःभूषण-वाचकः अथवा पर्याप्ति-वाचकः वर्तते। काव्ये येन सौन्दर्यं वर्धते सः अलङ्कारः तथा काव्ये येन

पर्याप्ति: = पूर्णता सम्पाद्यते स: अलङ्कार:। भरतमुनिना नाट्य-शास्त्रे चत्वार: अलङ्कारा: निरूपिता:। भामहाचार्य:काव्ये अलङ्काराणां प्राधान्यं प्रतिप्राद्य अष्टात्रिंशत: अलङ्काराणां निरूपणं कृतवान्। भामह:कथयति,''यथा अलङ्कारं विना सुन्दर्या: मुखं न शोभते तथैव अलङ्कारं विना काव्यं न शोभते'' इति। आचार्य: दण्डी, ''काव्ये शोभाकरा: धर्मा: अलङ्कारा:'' इति लिखति। वामन: अपि, ''सौन्दर्यम् अलङ्कार:'' इति लिखितवान्। अत: अलङ्कारा: काव्ये सौन्दर्यं शोभां च वर्धयन्ति इति तात्पर्यं वर्तते।

**२६. अलङ्कारा: काव्ये केषां शोभां वर्धयन्ति?**

अलङ्कारा: काव्ये शब्दानाम् अर्थानां च शोभां वर्धयन्ति। अत: शब्दस्य शोभाकरा: अलङ्कारा:'शब्दालङ्कारा:' इति कथ्यन्ते। अर्थस्य शोभाकरा: अलङ्कारा: 'अर्थालङ्कारा:' इति कथ्यन्ते। अनुप्रास:, यमकम्, इत्यादय: शब्दालङ्कारा: सन्ति। उपमा, रूपकम्, उत्प्रेक्षा इत्यादय: अर्थालङ्कारा: सन्ति। एतै: अलङ्कारै: काव्यस्य शोभा वर्धते।

**२७. अलङ्काराणां महत्त्वं किम्?**

अलङ्काराणां महत्त्वं काव्ये भवत्येव इति प्रतिप्रादयन् जयदेव: लिखति यत् –

''अङ्गीकरोति य: काव्यं शब्दार्थावनलङ्कृती।
असौ न मन्यते कस्मादनुष्णमनलं कृती।।''

अर्थात् "य: अलङ्काररहितं काव्यं स्वीकरोति स: उष्णतारहितम् अग्निं किमर्थं न स्वीकरोति"? तात्पर्यम् अस्ति यत् अग्नौ यथा उष्णता नित्यं भवति तथैव काव्ये अलङ्कारा: नित्यं भवन्ति। केचन आचार्या: अलङ्काराणां प्राधान्यं न स्वीकुर्वन्ति किन्तु ते गौणरूपेणापि काव्ये अलङ्काराणां स्थानं मन्यन्ते तेन ज्ञायते यत् काव्यशास्त्रीयतत्त्वेषु अलङ्कारा: महत्त्वपूर्णा: सन्ति।

**२८. रीति: अर्थात् किम् ?**

रीति: अर्थात् पद्धति:। पदानां विन्यासपद्धति: रीति:। ऱीतिसम्प्रदायस्य प्रवर्तक: आचार्य: वामन: रीतिं लक्षयति यत् ''विशिष्टा पदरचना रीति:''। पदानां या विशिष्टा ऱचना भवति सा रीति:। विशेष: क:? गुणात्मा। गुण: यत्र आत्मरुपेण वर्तते तादृशी पदरचना रीति: कथ्यते। रीते: नामान्तरं मार्ग: अपि अस्ति। कवय: विविधप्रदेशानां प्रभावेण काव्ये पदानि योजयन्ति, तेषां

पद्धतिः एव रीतिः कथ्यते। यथा विदर्भदेशस्य पद्धतिः असमासा अथवा अल्पसमासा भवति अतः सा वैदर्भी रीतिः कथ्यते। दण्डी अस्मिन् सन्दर्भे मार्गशब्दं प्रयुङ्क्ते। "अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम्" इति विलिख्य सः अनेकमार्गान् निरूपितवान्।

**२९. कति रीतयःसन्ति इति पश्यामः** -

वामनस्य मतानुसारं तिस्रः रीतयः सन्ति – वैदर्भी, गौडी, पाञ्चाली च। वामनः गुणानां रीत्या सह नित्यं सम्बन्धं प्रदर्श्य रीत्यामेव गुणानां समावेशम् अकरोत्। रुद्रटः रीतित्रयम् अतिरिच्य चतुर्थीं रीतिं प्रयुक्तवान्, तस्याः नाम लाटी। रुद्रटः समासानुसारं रीतिभेदान् कृतवान्, यथा समासरहिता वैदर्भी, द्वित्रिपदानां समासयुक्ता पाञ्चाली, पञ्च-सप्तपदानां समासयुक्ता लाटी तथा समासबहुला गौडी रीतिः भवति। रुद्रटः रसानामपि रीतेः अनुकूलत्वं प्रतिपादितवान् यथा सुकुमाररसानां निवेशः वैदर्भ्यां पाञ्चाल्यां च भवति, कठोररसानां निवेशः गौड्यां लाट्यां च भवति।राजशेखरः रीतीनां भौगोलिकं वर्णनं कृतवान्। साहित्यशास्त्रे काव्यपुरुषस्य कल्पना राजशेखरेण कृता अस्ति। सः काव्यपुरुषः यत्र यत्र भ्रमणं कृतवान् तत्र तत्र रीतेः वृत्तेः प्रवृत्तेः च उद्भवः जातः। अत्र कोष्ठकमाध्यमेन प्रदर्श्यते यत् काव्यपुरुषः कस्मिन् देशे गतः ? तत्र कः व्यवहारः कृतः ? तेन च का रीतिः वृत्तिः प्रवृत्तिश्च सञ्जाता ? इति।

| **देशः** | **रीतिः** | **वृत्तिः** | **प्रवृत्तिः** |
|---|---|---|---|
| गौडदेशः | गौडी | भारती | औड्रमागधी |
| पाञ्चालदेशः | पाञ्चाली | सात्वती, आरभटी | पाञ्चालमध्यमा |
| अवन्तीदेशः | पाञ्चाली | सात्वती, कैशिकी | आवन्ती |
| विदर्भदेशः | वैदर्भी | कैशिकी | दाक्षिणात्या |

कुन्तकः रीतेः स्थाने मार्गशब्दं प्रयुङ्क्ते। तेन त्रयः मार्गाः प्रदर्शिताः- सुकुमारमार्गः, मध्यममार्गः, विचित्रमार्गः इति। शारदातनयः वैदर्भी-गौडी-पाञ्चालीनां प्रतिपादनं कृत्वा सौराष्ट्रीं

द्राविडीं च रीतिं प्रतिपादयति। रीतिः पदविन्यासपद्धतिः, सा च प्रदेशाणां विशेषतां दधाति अतः काव्ये तासां स्थानम् अपि महत्त्वपूर्णम् अस्ति।

### ३०. का नाम वक्रोक्तिः ?

वक्रोक्तिः काव्यस्य आत्मा वर्तते इति आचार्यः कुन्तकः प्रतिपादितवान्। वक्रोक्तिः अर्थात् वक्रा उक्तिः। सामान्यलोकव्यवहारात् भिन्नतया वक्रतया यद्वचनम् उच्यते सा वक्रोक्तिः। वक्रोक्तेः महत्त्वं तु भामहेन अपि प्रतिपादितं यथा –

''सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना।।''

कविः वक्रोक्तेः प्रयोगे प्रयत्नवान् स्यात् यतोहि तया काव्ये चमत्कृतिः उत्पद्यते। दण्डी अपि वक्रोक्तेः महत्त्वं काव्यादर्शे प्रदर्शितवान्। कुन्तकः वक्रोक्तेः लक्षणं ददाति यत् –''वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते।''अस्य कथनस्य आशयं स्पष्टयति कुन्तकः यथा - ''वैदग्ध्यम् अर्थात् विदग्धभावः। कविकर्मकौशलं वैदग्ध्यम् उच्यते। तस्य भणितिः अर्थात् विच्छित्तिः चमत्कारः येन वचनेन उत्पद्यते तत् विचित्रं वचनं वक्रोक्तिः कथ्यते।'' प्रसिद्धात् मार्गात् भिन्नः विशिष्टश्च प्रयोगः वक्रोक्तिः। वर्णनस्य पद्धतिः द्विविधा भवति – लोकप्रसिद्धा अलौकिकी च। अलौकिकी वर्णनपद्धतिः वक्रोक्तिः कथ्यते। वक्रोक्तिः एव काव्यस्य आत्मा। कुन्तकः षड्विधां वक्रोक्तिं प्रदर्शितवान् यथा –

१. वर्णविन्यासवक्रता
२. पदपूर्वार्धवक्रता
३. प्रत्ययवक्रता
४. वाक्यवक्रता
५. प्रकरणवक्रता
६. प्रबन्धवक्रता

इत्थं वक्रोक्तेः सामान्यः परिचयः अत्र प्रस्तुतः। कुन्तकेन स्वग्रन्थे विस्तरेण वक्रोक्तेः वर्णनं कृतम् अस्ति।

### ३१. कः ध्वनिः ?

काव्यशास्त्रस्य परम्परायाम् अतीव महत्त्वपूर्णः अयं ध्वनिः वर्तते। आनन्दवर्धनाचार्यः ''काव्यस्यात्मा ध्वनिः'' इति महत्त्वपूर्णां घोषणां कृतवान्। ध्वन्यालोके ध्वनेः विस्तृतं स्वरूपं वर्णितम् अस्ति। ध्वनेः मूलं व्याकरणशास्त्रस्य स्फोटसिद्धान्तः अस्ति। वैयाकरणानां शब्दः ध्वनिः कथ्यते तथा काव्यशास्त्रे अर्थः ध्वनिः कथ्यते। आनन्दवर्धनः ध्वनेः लक्षणं ददाति यथा–

''यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।।''

अर्थात् यत्र वाच्यः अर्थः आत्मानं गौणं कृत्वा, वाचकः शब्दः स्वं स्वस्य अर्थं च गौणं कृत्वा यं विशेषम् अर्थम् अभिव्यङ्क्तः सः ध्वनिः कथ्यते। अत्र सूरिभिः पदस्य अर्थः वैयाकरणैः इति भवति। आनन्दवर्धनः ध्वनेः प्रपञ्चं विस्तरेण वर्णयित्वा तस्य काव्यात्मकत्वं साधयति। कालक्रमेण महिमभट्टः ध्वनेः ख़ण्डनं कृत्वा तस्य अनुमाने समावेशं कृतवान्। आचार्यः मम्मटः काव्यप्रकाशे ध्वनेः पुनः स्थापनाम् अकरोत्। प्रायः सर्वेऽपि सहृदयाः काव्ये ध्वनेः एव प्राधान्यं स्वीकुर्वन्ति।

## ३२. औचित्यम् अर्थात् किम् ?

क्षेमेन्द्रः काव्यस्य आत्मतत्त्वरूपेण औचित्यं स्वीकरोति। तत् औचित्यं किम् ? उचितस्य भावः औचित्यम्। काव्यस्य सर्वेषु तत्त्वेषु औचित्यं स्यात्। औचित्यं विना अलङ्काराणाम् अलङ्कारत्वं तथा गुणानां गुणत्वं न भवति। उक्तं च - ''औचित्येन विना रुचिं प्रतनुते नालङ्कृतिर्नो गुणः।'' आनन्दवर्धनः अपि कथयति यत् –

अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्।
औचित्योपनिबन्धस्तु रसस्योपनिषत्परा।।

अर्थात् अनौचित्येन काव्ये रसभङ्गः भवति। उचितप्रयोगयुक्तं काव्यम् उत्तमं भवति इति भावः। क्षेमेन्द्रः औचित्यस्य लक्षणं ददाति यथा-

उचितं प्राहुराचार्याः सदृशं किल तस्य तत्।
उचितस्य च यो भावस्तदौचित्यं प्रचक्षते।।

अर्थात् उचितेन वस्तुना सह तेन सदृशमेव वर्णनं क्रियते तत् काव्ये उचितं कथ्यते। मुखं चन्द्र इव अथवा कमलमिव सुन्दरं भवति तत्र चन्द्रं कमलं च त्यक्त्वा अनुचितेन सह मुखस्य तुलना

भवति तत् अनुचितम्। उचितस्य व्यवहारस्य औचित्यम् इति संज्ञा भवति तदेव काव्यस्य आत्मा इति क्षेमेन्द्रस्य मतम्।

## ३.काव्यस्य विभावना:

### ३३. किं नाम काव्यम् ?

विविधै: आचार्यै: विविधानि लक्षणानि लिखितानि। तत्र कवनीयं काव्यम् इति लोचनकार:। कवयति कवि: तस्य कर्म काव्यम् इति विद्याधर:। लोकोत्तरवर्णनानिपुणकविकर्म काव्यम् इति मम्मटाचार्य:। मानवजीवने नैतिकताया: आश्रयस्थानं काव्यं भवति। आनन्दाय आदिकालात् काव्यं महत्त्वपूर्णं साधनम् अस्ति। काव्येन सह काव्यतत्त्वानामपि ज्ञानम् उपकारकं भवति। अनेके आचार्या: काव्यस्य लक्षणं, प्रयोजनं, हेतुं, भेदान् च निरूपितवन्त:। तेषां विषये अत्र संक्षेपेण प्रस्तूयते।

## ३.१ काव्यस्य लक्षणम्

### ३४. काव्यस्य किं लक्षणम् इति पश्याम: -

कस्यापि पदार्थस्य दोषरहितं लक्षणं कठिनमेव भवति। काव्यस्य लक्षणविषये विविधा: आचार्या: स्वमतानि दत्तवन्त:। भामहाचार्येण उक्तं ''शब्दार्थौ सहितौ काव्यम्।'' शब्दार्थौ मिलित्वा काव्यं भवति। वामन: अपि शब्दार्थौ काव्यम् इति स्वीकरोति तथा काव्ये अलङ्कारस्य गुणस्य च स्थानमपि स्वीकरोति। तेन कथितं यत् ''काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयो: शब्दार्थयो: वर्तते।'' कुन्तक: वक्रोक्तिसहितौ शब्दार्थौ काव्यमिति स्वीकरोति। मम्मटाचार्य: काव्यस्य लक्षणं दत्तवान् यत् ''तद् अदोषौ शब्दार्थौ सगुणौ अनलङ्कृती पुन: क्वापि।'' तत्र कीदृशौ शब्दार्थौ? दोषरहितौ गुणसहितौ अलङ्कारसहितौ क्वचित् अलङ्काररहितौ शब्दार्थौ काव्यमिति। अस्य लक्षणस्य खण्डनं कुर्वन् विश्वनाथ: रसमेव काव्यात्मरूपेण स्वीकुर्वन् काव्यं लक्षयति यत् – ''वाक्यं रसात्मकं काव्यम्'' इति। रमणीयस्य सुन्दरस्य अर्थस्य वाच्यलक्ष्यव्यङ्ग्येभ्य: अन्यतमस्य प्रतिपादक: बोधक: य: शब्द: स: काव्यम् इति जगन्नाथ:। रमणीयस्य अर्थस्य

प्रतिपादने अपि शब्दत्वं काव्यमिति तस्य अभिप्रायः। सः लक्षयति यत् - ''रमणीयार्थप्रतिपादकः शब्दः काव्यम्।''

## ३.२ काव्यस्य प्रयोजनम्

**३५. काव्यस्य प्रयोजनं किम् ? कविः किमर्थं काव्यं रचयति ?**

मनुष्यः यत्किमपि कार्यं कर्तुं प्रयोजनेन उद्देश्येन वा प्रवृत्तः भवति। प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति धिया काव्यरचनायाः अपि कानिचन प्रयोजनानि भवन्ति। आचार्यभरतात् आरभ्य प्रायः सर्वैः आचार्यैः काव्यप्रयोजनानि उक्तानि सन्ति। भरतानुसारं नाट्यं नराणां कर्मणः आश्रयं हितोपदेशजननं च भवति। तत् जनेभ्यः मनोविनोदं, सुखं, विश्रान्तिं च ददाति। तेन धर्मः, अर्थः, यशः, आयुः च वर्धते। भामहानुसारं मनुष्यः काव्यरचनया धर्म-अर्थ-काम-मोक्षेषु, कलासु च नैपुण्यं प्राप्नोति, पुनश्च कीर्तिं, प्रीतिं च लभते। उक्तं च –

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिबन्धनम्॥

वामनाचार्यः काव्यस्य द्वे प्रयोजने मनुते – यशः, आनन्दः च। आनन्दवर्धनानुसारं सहृदयमनःप्रीतये काव्यं भवति। आचार्यमम्मटानुसारं काव्येन यशप्राप्तिः, धनप्राप्तिः, व्यवहारज्ञानम्, अनिष्टनिवारणं, सद्यः परमानन्दप्राप्तिः, कान्तावत् उपदेशः च भवति। उक्तं च –

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥

विश्वनाथदिशा काव्यात् चतुर्वर्गफलप्राप्तिः सुखात् मन्दबुद्धीनामपि भवति। एवं प्रकारेण काव्यस्य यशः, आनन्दः, परमाह्लादः, गुरु-राजादीनां कृपा, आचारज्ञानम् इत्यादीनि प्रयोजनानि सन्ति।

## ३.३ काव्य-निर्माणे हेतुः

**३६. काव्यस्य निर्माणे केषां साधनानाम् आवश्यकता भवति ? इति पश्यामः -**

काव्यकर्मणि के हेतवः सन्ति इत्यस्मिन् विषये अनेके आचार्याः चिन्तनं कृतवन्तः। तत्र पक्षद्वयं वर्तते। काव्यरचनायां त्रयः हेतवः भवन्ति – प्रतिभा, व्युत्पत्तिः, अभ्यासः च इति एकः पक्षः। प्रतिभा वा शक्तिः एव काव्यनिर्माणे हेतुः इति द्वितीयः पक्षः। काव्यस्य रचनां प्रतिभावान् जनः एव कर्तुं प्रभवति। शास्त्राणां कलानाम् च अध्ययनं कृत्वा काव्यज्ञानां सेवां विधाय प्रतिभाशाली कश्चित् काव्यं कर्तुं शक्नोति इति भामहः। शक्तिः एव काव्यहेतुः इति राजशेखरः। मम्मटानुसारं शक्तिः, निपुणता, अभ्यासः च इति त्रयः मिलित्वा दण्डचक्रचीवरन्यायेन काव्यनिर्माणं प्रति हेतुः, न हेतवः। उक्तं च –


शक्तिर्निपुणतालोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यास इति हेतस्तदुद्भवे॥

अनेन प्रकारेण काव्यस्य लक्षणानि, प्रयोजनानि, कारणानि च अस्माभिः दृष्टानि। प्रयोजनसहितं कारणैः उत्पादितं काव्यं कतिविधं भवति इति प्रतिपाद्यते।

## ३.४ काव्यस्य भेदाः

३७. **कतिविधं काव्यम्** ?

यथा काव्यलक्षणे आचार्येषु मतभेदाः सन्ति तथैव काव्यस्य प्रकारविषये अपि आचार्येषु मतान्तराणि सन्ति। काव्यस्य विभागः द्विविधः भवति – बाह्यदृष्ट्या अर्थदृष्ट्या च। तत्र बाह्यदृष्ट्या काव्यस्य भेदाः एते सन्ति-




अर्थदृष्ट्या काव्यं कतिविधम् इति विषये आचार्याणां मतान्तराणि सन्ति। केषाञ्चित् मतानुसारं काव्यं त्रिविधं, केषाञ्चित् मतानुसारं काव्यं द्विविधं, केषाञ्चित् मतानुसारं पुन: काव्यं चतुर्विधं भवति। अत्र सर्वेषां मतानि संक्षेपत: पश्याम:।

आनन्दवर्धनस्य मतानुसारं काव्ये द्विविध: अर्थ: भवति, वाच्य: प्रतीयमानश्च। अनयो: अर्थयो: प्रधानतां गौणतां च दृष्ट्वा ध्वनिवादिभि: आचार्यै: काव्यस्य भेदा: प्रदर्शिता: सन्ति। ध्वनि: यत्र प्रधान: भवति तत् ध्वनिकाव्यं तथा यत्र गौण: भवति तत् गुणीभूत-व्यङ्ग्यकाव्यम् उच्यते। मम्मटानुसारं काव्यं त्रिविधम्– उत्तम-काव्यम् अथवा ध्वनि-काव्यम्, मध्यम-काव्यम् अथवा गुणीभूतव्यङ्ग्य-काव्यम्, अधमकाव्यम् अथवा चित्रकाव्यम्। चित्रकाव्यम् अपि द्विविधम्– शब्दचित्रं वाच्यचित्रंच। विश्वनाथ: द्विविधमेव काव्यं मन्यते। तस्य मतानुसारं काव्यम् अधमं न भवति। पण्डितराज: जगन्नाथ: चतुर्विधं काव्यं करोति - उत्तमोत्तमम्, उत्तमम्, मध्यमम्, अधमं च। मम्मटस्य वाच्यचित्रं शब्दचित्रं च क्रमेण जगन्नाथस्य मध्यमम्, अधमं च काव्यम् अस्ति। एवं द्विविधं त्रिविधं चतुर्विधं वा काव्यम् अर्थदृष्ट्या भवति।

## ४. काव्यस्य उत्कर्षकाः अपकर्षकाः च धर्माः

शब्दार्थौ यदि काव्यस्य शरीरम् अस्ति तर्हि काव्यस्य आत्मा रसादिः अस्ति इति वयं दृष्टवन्तः। यथा शरीरस्य आत्मनः च शोभाकराः हानिकराः च केचन धर्माः भवन्ति तथैव काव्यस्य अपि शोभाकराः हानिकराः च केचन धर्माः भवन्ति। तस्मिन् विषये विश्वनाथस्य एषा कारिका दृष्टव्या-

वाक्यं रसात्मकं काव्यं दोषास्तस्यापकर्षकाः।
उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः।। (३.१.द.सा)

अर्थात् काव्यस्य आत्मा रसादिः अस्ति, तस्य उत्कर्षकाः =शोभाकराः शोभावर्धकाः च धर्माः गुणाः अलङ्काराः रीतयः च सन्ति तथा अपकर्षकाः =हानिकारकाः ,दोषाः सन्ति। एतेषु रीतेः विषये अलङ्कारविषये च वयं पूर्वं चर्चां कृतवन्तः। अत्र अवशिष्टानां गुण-दोषाणां विषये चर्चां कुर्मः।

### ४.१ गुणाः

**३८. के गुणाः ? कति गुणाः च ? इति पश्यामः**

गुणानां विषये वामनाचार्यः उक्तवान् यत् ''काव्यशोभायाः कर्त्तारो धर्माः गुणाः।'' (का.सू.वृ.३.१.१)''पूर्वे नित्याः।'' (का.सू.वृ.३.१. ३) अर्थात् काव्यशोभायाः कर्तारः गुणाः। पूर्वे – गुणाः नित्याःअपरिहार्याः अनिवार्याः च भवन्ति। आनन्दवर्धनः मम्मटः विश्वनाथः च गुणानां लक्षणविषये वदन्ति यत् ''प्रधानभूतस्य अर्थस्य आश्रिताः, अङ्गिना (आत्मना) सह सम्बद्धाः च गुणाः भवन्ति। यथा मनुष्याणां दया-करुणादयः धर्माः आत्मनः भवन्ति तथैव काव्ये आत्मनः रसादिध्वनेः धर्माः गुणाः कथ्यन्ते।''

वामनस्य मतानुसारं दश शब्दगुणाः, दश अर्थगुणाः च सन्ति। ते यथा ''ओजः, प्रसादः, श्लेषः, समता, समाधिः, माधुर्यम्, सौकुमार्यम्, उदारता, अर्थव्यक्तिः, कान्तिः'' इति। मम्मटः वामनस्य मतं खण्डयित्वा दशगुणानां त्रिषु गुणेषु समावेशं कृत्वा त्रीन् गुणान् स्थापयति।

- वामनोक्ताः श्लेषः, समाधिः, औदार्यम्, प्रसादश्च ओजसि अन्तर्भवन्ति।
- वामनोक्तं माधुर्यं मम्मटस्य अपि अनुमतमेव।

- वामनोक्ता अर्थव्यक्तिः मम्मटस्य प्रसादे अन्तर्भवति।
- वामनोक्ता समता क्वचिद् दोषरूपातस्याः गुणत्वं नास्ति।,
- कष्टत्वदोषस्य अभावे वामनोक्तं सौकुमार्यम्।
- ग्राम्यत्वदोषस्य अभावे वामनोक्ता कान्तिः।

मम्मटाभिमताः – त्रयः एव गुणाः (थस्य अपिविश्वना) माधुर्यं,प्रसादः, ओजः च।

**३९. माधुर्यम् अर्थात् किम् ?**

मधुरस्य भावः माधुर्यम्। यत्र काव्ये मधुरतायाः अनुभवः भवति तत्र माधुर्यं भवति। माधुर्य-गुणः संयोगशृङ्गार-करुण-विप्रलम्भशृङ्गार-शान्तरसेषु क्रमेण आधिक्येन भवति। ट-ठ-ड-ढ इत्यादीन् कठोरवर्णान् त्यक्त्वा मधुर-कोमलवर्णाः माधुर्यगुणस्य अभिव्यञ्जकाः भवन्ति। असमासा, अल्पसमासा रचना माधुर्यगुणस्य अभिव्यञ्जिका अस्ति।

**४०. ओजः अर्थात् किम् ?**

यत्र काव्ये उद्धतता कठोरता च अनुभूयते तत्र ओजः गुणः भवति। ओजः गुणः वीर-बीभत्स-रौद्र-रसेषु क्रमेण आधिक्येन भवति।कठोरवर्णाः उपरि अधः च रेफयुक्ताः वर्णाः ओजोगुणस्य अभिव्यञ्जकाः सन्ति। उद्धता अतिसमासयुक्ता रचना ओजोगुणस्य अभिव्यञ्जिका भवति।

**४१. प्रसादः गुणः कीदृशः ?**

यत्र श्रुतिमात्रेण अर्थबोधकाः शब्दाः भवन्ति सः प्रसादः गुणः। एषः सर्वरसेषु सर्वरचनासु च भवितुं शक्नोति।

## ४.२ दोषाः

**४२. के दोषाः ? कतिविधाः च ? इति पश्यामः -**

मम्मटः कथयति यत् मुख्यार्थहतिः दोषः, अर्थात् मुख्यार्थस्य अपकर्षः दोषः। काव्ये आत्मतत्त्वरूपेण रसः तिष्ठति, तस्य रसस्य अपकर्षहेतवः (हानिकर्तारः) दोषाः भवन्ति। रसः अर्थस्य आश्रयेण प्रवर्तते अतः अर्थस्य अपकर्षः अपि रसस्य एव हानिकरः। अर्थः शब्दस्य

आधारेण प्रवर्तते अतः शब्दस्य अपकर्षः अपि रसस्य एव अपकर्षः। एवं येन केनापि प्रकारेण रसस्य हानिः भवति तत्र हानिकरः दोषः कथ्यते। दोषः मुख्यतया पञ्चविधः भवति –

१. पददोषाः

२. पदांशदोषाः

३. वाक्यदोषाः

४.अर्थदोषाः

५.रसदोषाः

उपरि दोषाणां मुख्यप्रकाराः उक्ताः। एतेषां भेदानाम् उपभेदाः अपि भवन्ति, अर्थात् प्रकाराः भवन्ति। पददोषाः प्रायः १६ भवन्ति, पदांशदोषाः ६, वाक्यदोषाः २१, अर्थदोषाः २३ तथा रसदोषाः प्रायः १३ भवन्ति। एते सर्वेऽपि कथञ्चिद् रसमेव दूषयन्ति अतः सर्वेषां दोषाणां रसदूषकत्वम् अस्ति। सुकविः यावत् शक्यं काव्यं दोषरहितं रचयेत् , दोषरहितं काव्यं तथा तेन काव्येन कविः अपि चिरकालपर्यन्तं लोके कीर्तिं यशः च प्राप्नोति।

## ५.नाट्यतत्त्वविचारः

### ४३. नाट्यस्य उत्पत्तिः

नाट्योत्पत्तिरपि वेदात् मन्यते। वेदस्थ-संवादसूक्तानि नाट्योत्पत्तेः बीजम्। नाट्यतत्त्वानां ग्रहणमपि वेदेभ्यः कृतम्। उक्तं च भरतमुनिना–

जग्राह पाठ्यम् ऋग्वेदात् सामभ्यो गीतमेव च।
यजुर्वेदादभिनयान् रसानाथर्वणादपि॥

अतः नाट्यवेदो हि पञ्चमः इति उच्यते। नाट्ये हि सर्वभावानां सर्वावस्थानां सन्निवेशो भवति। तेन हि नाट्यं कवित्त्वनिकषः। उक्तं च – नाटकान्तं कवित्त्वम् इति। काव्येषु नाटकं रम्यम् इति सूक्तिरपि नाट्यस्य महत्त्वं प्रतिपादयति। नाट्योत्पत्ति-कथनानुसारं ग्राम्यधर्मत्वात् देवतानुनयपूर्वकं ब्रह्मणा वेदेभ्यः सारमुद्धृत्य नाट्यवेदः रचितः। नाट्यशास्त्रस्य प्रथमः प्रवक्ता भरतमुनिः। तेन रचितः ग्रन्थः नाट्यशास्त्रम्। तदनन्तरं धनञ्जयस्य दशरूपकं, रामचन्द्र-गुणचन्द्रयोः नाट्यदर्पणः,

शारदातनयस्य भावप्रकाशनं, शिङ्गभुपालस्य नाटकपरिभाषा इत्यादयः नैके ग्रन्थाः प्रसिद्धाः सन्ति।

**४४. नाट्यम् अर्थात् किम् ?**

अवस्थानुकृतिर्नाट्यम् इति उच्यते। धीरोदात्तादि-अवस्थायाः आङ्गिकादि-चतुर्विधेन अभिनयेन एकरूपताप्रतीति-जनकम् अनुकरणं नाट्यम्।

**४५. रूपम् अर्थात् किम् ?**

एतत् नाट्यमेव दृश्यतया रूपं कथ्यते। रङ्गपीठे अभिनयत्वात् नाट्यं श्रव्येण सह दृश्यमपि भवति। दृश्यत्वात् चक्षुर्मात्रग्राह्यो गुणो रूपम् इति न्यायात् नाट्यं रूपम् अपि कथ्यते।

**४६. रूपकम् अर्थात् किम् ?**

इदमेव रूपं नटे रामदुष्यन्तादिरूपस्य आरोपणं करोति अतः नाट्यं रूपकम् अपि उच्यते।

**४७. नृत्यम् अर्थात् किम् ?**

नृत्यं भावाश्रितं भवति तत्र भावानुकरणात्मकम् आङ्गिकाभिनयस्य बाहुल्यं वर्तते।

**४८. नृत्तम् अर्थात् किम् ?**

नृत्तंताललयाश्रयं भवति तत्र तालानुसारेण मात्रानुसरणं लयानुसारेण गतिः भवति। न तत्र अभिनयः।

## ५.१ रूपकाणां भेदक-तत्त्वानि

**४९. रूपकाणां परस्परं भेदकानि कानि ?**

वस्तु, नेता, रसः च रूपकभेदक-तत्त्वानि सन्ति। तत्रादौ रूपकस्य कथावस्तुविषये चिन्तनं कुर्मः।

**५०. कथावस्तु अर्थात् किम् ?**

आधिकारिकं प्रासङ्गिकं चेति द्विविधं भवति कथावस्तु। तत्र मुख्यम् आधिकारिकं गौणं च प्रासङ्गिकम्। प्रासङ्गिकमपि द्विविधं पताका प्रकरी च। तत्र सानुबन्धं पताका भवति प्रदेशभाक् च प्रकरी। यथा रामायणे रामकथा आधिकारिकं, सुग्रीवकथा पताका, शबरीकथा प्रकरी च।

**५१. का अर्थप्रकृतिः** ?

रूपकस्य कथावस्तु-विस्तृतिः आदौ बीजरूपेण भवति। अनुकूलपरिस्थतौ तत् बीजं बिन्दुवत् विस्तृतिं याति। ततः तत्प्रासङ्गिकसाहाय्येन कार्यरूपेण परिणमति। एवं कथावस्तुनः बीजं, बिन्दुः, पताका, प्रकरी, कार्यम् इति पञ्च अर्थप्रकृतयः भवन्ति।

**५२. का अवस्था** ?

फलेप्सुभिः प्रारब्धस्य तस्य कार्यस्य आरम्भः, प्रयत्नः, प्राप्त्याशा, नियताप्तिः, फलागमः चेति पञ्च-अवस्थाः भवन्ति। कार्यं प्रति उत्सुकता आरम्भः। कार्यप्राप्त्यर्थम् उपायः प्रयत्नः। प्रयत्ने विघ्नसम्भावनायां सत्याम् अधिकतरं फलप्राप्तेः आशा प्राप्त्याशा। विघ्नविनाशात् फलप्राप्तेः निश्चितता नियताप्तिः।

**५३. के सन्धयः** ?

पूर्वोक्ताभिः पञ्च-अर्थप्रकृतिभिः सह पञ्च-अवस्थानां मिश्रणेन मुखाद्याः पञ्च-सन्धयः भवन्ति। तद्यथा –

| **अर्थप्रकृतयः** | **अवस्थाः** | **सन्धिः** | **सन्ध्यङ्गानि** |
|---|---|---|---|
| बीजम् | आरम्भः | मुखम् | १२ |
| बिन्दुः | यत्नः | प्रतिमुखम् | १३ |
| पताका | प्राप्त्याशा | गर्भः | १२ |
| प्रकरी | नियताप्तिः | विमर्शः | १३ |
| कार्यम् | फलागमः | उपसंहृतिः | १४ |

एतत् कथावस्तु दृश्यं श्रव्यं च भवति। नीरसम् अनुचितं कथावस्तु सूच्यम्। उदात्तं सरसं कथावस्तु दृश्यं भवति। दृश्यं तु अङ्कैः वर्णितं भवति किन्तु सूच्यं कथावस्तु विष्कम्भकः, चूलिका, अङ्कास्यम्, अङ्कावतारः, प्रवेशकः चेति पञ्च-अर्थोपक्षेपकैः प्रेक्षकेभ्यः संसूच्यते। पुनश्च सर्वेषां श्रवणयोग्यं वस्तु सर्वश्राव्यं कथ्यते। तत् प्रकाशम् इति उक्त्वा कथ्यते। अन्यस्य

श्रवणयोग्यं कथावस्तु अश्राव्यं कथ्यते। तत् स्वगतम् इति कथ्यते। व्यक्तिविशेषाय श्रवणयोग्यं नियतश्राव्यं कथावस्तु। तदपि जनान्तिकम्, अपवारितं च कथ्यते।

### ५४. नेता (नायकः)कः ?

द्वितीयो रूपकभेदको भवति नेता। रूपकस्य नायकः फलस्य अधिकारी भवति। अयं नायकः विनीतः, मधुरः, त्यागी, दक्षः, प्रियंवदः, लोकप्रियः, पवित्रः, उत्साहसम्पन्नः, स्मृति-प्रज्ञा-कलायुक्तः, मानी, शूरः, दृढः, तेजस्वी, शास्त्रज्ञः, धार्मिकश्च भवति। एते नायकस्य सामान्यगुणाः सन्ति।

### ५५. नायकः कतिविधः ?

उपरि उक्तैः गुणैः युक्तः नायकः चतुर्विधः भवति – धीरोदात्तः, धीरोद्धतः, धीरललितः, धीरप्रशान्तः च। तत्र पराक्रमी, गम्भीरः, क्षमाशीलः, अविकत्थनः, स्थिरस्वभावः नायकः धीरोदात्तः। कलापरः, मृदुः, निश्चिन्तः नायकः धीरललितः। सामान्यगुणयुक्तः अमात्य-विप्रादिनायकः धीरप्रशान्तः। दर्प-मात्सर्यपूर्णः, मायाछद्मपरायणः, चञ्चलः, चण्डः नायकः धीरोद्धतः।

### ५६. नायकसहायाः के ?

प्रासङ्गिककथायाः नायकः पीठमर्दः भवति। सः नायकस्य अपेक्षया न्यूनगुणयुक्तः भवति। विट-चेट-दूतादि-नायकसहायाः भवन्ति। नायकविपरीतः, प्रतिकूलाचरणयुक्तः प्रतिनायकः। मन्त्री, ऋत्विक्, पुरोहितः, आचार्यः च नायकस्य धर्मसहायाः सन्ति। कुमारः, मित्रम्, आटविकः च दण्डसहायाः भवन्ति।

### ५७. नायिका का ?

नायकसाधारणगुणोपेता नायिका स्वीया, अन्या, साधारणी इति त्रिविधा भवति। शीलादिगुणयुक्ता स्वीया नायिका। सा मुग्धा, मध्या, प्रगल्भा इति त्रिविधा भवति। अन्यस्त्री अन्या नायिका कन्या परिणीता चेति द्विविधा। कलाकलापकुशला गणिका साधारणी नायिका। नायिकायाः स्वाधीनपतिकादयः अष्टौ अवस्थाः भवन्ति।

### ५८. वृत्तिः अर्थात् का ?

नायकस्य व्यवहारः वृत्तिः उच्यते। वृत्तयः नाट्यमातरः। सा च कैशिकी, सात्त्वती, आरभटी, भारती इति चतुर्विधा भवति। गीत-वादन-विलासयुक्ता कैशिकी वृत्तिः। नायकस्य शोकरहितः शौर्य-सत्य-त्याग-दयादिगुणयुक्तः व्यापारः सात्वती वृत्तिः। माया-ऐन्द्रजाल-सङ्ग्रामादि-व्यापारः आरभटी वृत्तिः। भाषायाः वृत्तिः भारती वृत्तिः। शृङ्गारे कैशिकी, वीरे आरभटी, रौद्र-बीभत्सादौ सात्वती, सर्वेषु रसेषु भारती वृत्तिः भवति। पुनश्च देश-भाषा-क्रिया-वेशादेः भिन्न-भिन्न-प्रवृत्तयः नायकस्य भवन्ति।

**५९. कः रसः** ?

रूपकस्य आस्वाद्यं तत्त्वं रसः भवति। नाट्ये अष्टौ रसाः भवन्ति। शृङ्गारः, वीरः, करुणः, अद्भुतः,हास्यः, भयानकः, बीभत्सः, रौद्रः च। नाट्ये शान्त-रसः न भवति अतः अष्टौ एव रसाः नाट्ये भवन्ति। रसानां विषये पूर्वं चर्चा कृता एव, अतः अत्र विस्तरेण न लिख्यते।

## ५.२ रूपकाणां भेदाः

**६०. कतिविधं नाट्यम्** ? **अथवा कतिविधं रूपकम्** ? **इति पश्यामः**

नाट्यं वा रूपकं दशविधं भवति। नाटकम्, प्रकरणम्, भाणः, प्रहसनम्, डिमः, व्यायोगः, समवकारः, वीथी, अङ्कः, ईहामृगः च दशरूपकाणि।

**६१. नाटकम् अर्थात् किम्** ?

नाटके ख्यातं कथावस्तु भवति। तत्र धीरोदात्तः नायकः, वीरः वा शृङ्गारः मुख्यरसः, पञ्च सन्धयः तथा च पञ्च वा दश अङ्काः भवेयुः। यथा अभिज्ञानशाकुन्तलम्।

**६२. प्रकरणम् अर्थात् किम्** ?

प्रकरणे कविकल्पितं कथावस्तु, मुख्यः शृङ्गारः रसः, धीरप्रशान्तश्च नायकः स्यात्। यथा मृच्छकटिकम्।

**६३. भाणः कः** ?

भाणे विभिन्नावस्थासम्प्राप्तः धूर्तचरितः नायकः, एकाङ्की, कविकल्पितं कथावस्तु चात्र भवति। यथा शृङ्गारसदनभाणः।

**६४. प्रहसनम् अर्थात् किम् ?**

प्रहसने कविकल्पितं कथावस्तु, हास्यरसः मुख्यः, तपस्वि-परिव्राजकादयः नायकाः च भवन्ति। यथा मत्तविलासः।

**६५. डिमः कः ?**

डिमे ख्यातं कथावस्तु, मुख्यरसः रौद्रः, चत्वारः अङ्काः, अत्यन्तम् उद्धताः बहवः नायकाश्च भवन्ति। यथा त्रिपुरदाहः।

**६६. व्यायोगः कः ?**

व्यायोगे ख्यातं कथावस्तु, एकः अङ्कः, धीरोद्धतः नायकः, शृङ्गारं हास्यं च वर्जयित्वा अन्ये रसाश्च भवन्ति। यथा मध्यमव्यायोगः।

**६७. समवकारःकः ?**

अस्मिन् रूपके प्रख्यातं कथावस्तु भवति। वीरः मुख्यरसः, त्रयः अङ्काः तथा पृथक् पृथक् कलायुक्ताः नैके नायकाः भवन्ति। यथा समुद्रमन्थनम्।

**६८. वीथी का ?**

वीथ्यां शृङ्गाररसस्य बाहुल्यं तथा एकः अङ्कः भवति। यथा जागरुको भव।

**६९. अङ्कःकः?**

अङ्के प्रख्यातं कथावस्तु, एकः अङ्कः तथा करुणः मुख्यरसः भवति। यथा कर्णभारः।

**७०. ईहामृगःकः ?**

ईहामृगे प्रख्यातम् उत्पाद्यं चेति मिश्रणात् मिश्रं कथावस्तु, धीरोद्धतः नायकः तथा एकः अङ्कः भवति। दिव्यसुन्दरीनिमित्तं तत्र युद्धं भवति।

## ५.३ प्रसिद्धानि रूपकाणि

**७१. प्रसिद्धानि रूपकाणि कानि ?**

रूपकाणां नामानि तथा तेषां सामान्यः परिचयः उपरि प्रदत्तः। तेषां रूपकाणां रचना भवति? प्रसिद्धानि रूपकाणि कानि ? सम्प्रति लोके प्रसिद्धानां केषाञ्चित् रूपकाणां परिचयः संक्षेपेण अत्र प्रस्तूयते।

१. **स्वप्नवासवदत्तम्**– इदं नाटकम् अस्ति। अस्य रचयिता महाकविः भासः। अत्र षड् अङ्काः, नायकः उदयनः, नायिका वासवदत्ता, मुख्यरसः शृङ्गारः तथा कथावस्तु कविकल्पितम् अस्ति।

२. **अभिज्ञानशाकुन्तलम्** – इदं प्रख्यातं नाटकम् अस्ति। अस्य कर्ता महाकविः कविकुलगुरुः कालिदासः अस्ति। अस्मिन् नाटके सप्त अङ्काः सन्ति। नायकः दुष्यन्तः, नायिका शकुन्तला, मुख्यरसः शृङ्गारः च अस्ति। अस्य कथावस्तु महाभारतात् स्वीकृतम् अस्ति।

३. **मृच्छकटिकम्**–इदं प्रकरणम् अस्ति। अस्य कर्ता महाकविः शूद्रकः अस्ति। प्रकरणस्य नियमानुसारम् अत्र दश अङ्काः सन्ति। नायकः चारुदत्तः, नायिका वसन्तसेना, मुख्यरसः शृङ्गारः तथा कविकल्पितं कथावस्तु अस्ति।

४. **रत्नावली**–एषा नाटिका महाकवि-हर्षेण रचिता अस्ति। अत्र चत्वारः अङ्काः सन्ति। नायकः उदयनः, नायिका रत्नावली ( सागरिका ), मुख्यरसः शृङ्गारः तथा कविकल्पितं कथावस्तु अस्ति।

५. **उत्तररामचरितम्**–इदं नाटकम् अस्ति। महाकविः भवभूतिः अस्य रचयिता अस्ति। अत्र सप्त अङ्काः सन्ति। नायकः श्रीरामः, नायिका सीता च अस्ति। अत्र मुख्यरसः करुणः अस्ति अतः एतत् नाटकं विशिष्टम्। अस्य कथावस्तु रामायणात् स्वीकृतम् अस्ति।

## ६. पञ्च महाकाव्यानि

### ७२. पञ्चमहाकाव्यानि कानि ?

श्रव्यकाव्ये मुख्यतया महाकाव्यं प्रसिद्धम् अस्ति। प्रसिद्धैः महाकविभिः रचितानि पञ्चमहाकाव्यानि सन्ति। तेषां संक्षेपतः परिचयः अत्र दीयते।

१. **रघुवंशम् –** रघुवंशस्य रचयिता महाकविः कालिदासः। अत्र नवदश सर्गाः सन्ति। रघुवंशस्य प्रसिद्धानां राज्ञां चरितम् अत्र वर्णितम्। तस्य उपरि मल्लिनाथस्य सञ्जीवनी टीका प्राप्यते।

२. **कुमारसम्भवम्** - अस्यापि रचयिता महाकविः कालिदासः। अत्र सप्तदश सर्गाः सन्ति किन्तु मल्लिनाथस्य सञ्जीवनी टीका अष्टमसर्गपर्यन्तमेव प्राप्यते। अत्र शिवपार्वत्योः विवाहः तथा कुमारस्य कार्तिकेयस्य उत्पत्तिः मुख्यतया वर्णिता अस्ति।

३. **किरातार्जुनीयम्**–एतस्य कर्ता महाकविः भारविः। अत्र अष्टादश सर्गाः सन्ति। पाण्डवानाम् अज्ञातवासे अर्जुनः तपः कृत्वा शिवस्य प्रसादात् पाशुपतास्त्रं प्राप्तवान् इति कथा अत्र अस्ति। अस्योपरि मल्लिनाथस्य घण्टापथटीका उपलभ्यते।

४. **शिशुपालवधम्**–अस्य कर्ता महाकविः माघः। अत्र विंशतिः सर्गाः सन्ति। शिशुपालस्य वधार्थं श्रीकृष्णस्य उपक्रमः तथा शिशुपालस्य वधः अत्र वर्णितः। अस्योपरि मल्लिनाथस्य सर्वङ्कषा टीका प्राप्यते।

५. **नैषधीयचरितम्**–अस्य रचयिता महाकविः श्रीहर्षः। अत्र द्वाविंशतिः सर्गाः सन्ति। नलस्य दमयन्त्याः च कथा अत्र वर्णिता अस्ति। अस्योपरि मल्लिनाथस्य जीवातुटीका उपलभ्यते।

* * *